Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धान्तसारसागर श्रीदेवेन्द्रसूरिविरचितं
श्रुतधरस्थविरमहर्षिरचितावचूरिसहितं

# श्राद्धदिनकृत्यसूत्रम्

सम्पादक
पू. आ. श्रीराजशेखरसूरिः

प्रकाशक
अरिहंत आराधक ट्रस्ट

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ धरणेन्द्र पद्मावती संपूजिताय ॐ ह्रीँ श्रीं श्रीशङ्खेश्वरपार्श्वनाथाय नमः

॥ श्री दान-प्रेम-रामचन्द्र-हीरसूरीश्वरेभ्यो नमः ॥

ऐं नमः

## सिद्धान्तसारसागरश्रीदेवेन्द्रसूरिविरचितं
## श्रुतधरस्थविरमहर्षिरचितावचूरिसहितं

# श्राद्धदिनकृत्यसूत्रम्


卐 सम्पादकः 卐

**प.पू. आचार्यदेव श्रीमद्विजय प्रेम-हीर-ललितशेखरसूरीश्वराणां विनेयः**

**पूज्याचार्य श्री राजशेखरसूरिः**




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# 卐 सहयोगः 卐

परमपूज्याचार्यदेव श्री राजशेखरसूरि विनेयः प.पू. मुनिवर्य श्री दिव्यशेखरविजय म.

## 卐 सम्पूर्ण आर्थिक सहयोग दाता 卐

श्री सिसोदरा श्वे. मू. त. जैनसङ्घः

## 卐 प्रकाशक 卐

श्री अरिहंताराधक ट्रस्ट

વિ. સં. ૨૦૫૮, વીર સંવત્ ૨૫૨૮, ઇ.સ. ૨૦૦૨

કિંમત : રૂા. ૭૦.૦૦

**વિશેષ સૂચના** : આ પ્રત જ્ઞાનદ્રવ્યમાંથી છપાવી હોવાથી ગૃહસ્થે મૂલ્ય ચૂકવ્યા વિના એની માલિકી કરવી નહિ. વાંચવા માટે પ્રતનો ઉપયોગ કરવો હોય તો યોગ્ય નકરો જ્ઞાન ભંડાર ખાતે આપવો જરૂરી જાણવો.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# 卐 પ્રાપ્તિ સ્થાન 卐

**શ્રી સિસોદરા શ્વે. મૂ. ત. જૈન સંઘ**
ઠે. જૈન મંદિર,
મુ. સિસોદરા-૩૯૬ ૪૬૩ (ગણેશ)
સ્ટે. નવસારી, જીલ્લો-વલસાડ.

**શ્રી અરિહંત આરાધક ટ્રસ્ટ**
C/o. હિંદુસ્તાન મિલ સ્ટોર્સ, ૪૮૧, ગની એપાર્ટમેન્ટ,
મુંબઇ-આગ્રા રોડ, ભિવંડી-૪૨૧ ૩૦૫.
જીલ્લો થાણા (મહારાષ્ટ્ર)



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# આભારની અભિવ્યક્તિ

સિસોદરા જૈન સંઘે પૂર્વે 'સિરિ સિરિવાલકહા' વગેરે ગ્રંથોના પ્રકાશનમાં સંઘના જ્ઞાનનિધિનો ઉપયોગ કર્યો છે. વર્તમાનમાં મોક્ષમાર્ગ પ્રદર્શક **પ.પૂ.આચાર્યદેવ શ્રીમદ્ વિજય પ્રેમ-હીર-લલિતશેખરસૂરીશ્વરજી મહારાજના** શિષ્યરત્ન **પ.પૂ. આચાર્યદેવ શ્રી રાજશેખરસૂરિ મહારાજ** આદિ સાત પૂજ્યોની નિશ્રામાં તથા **પ.પૂ. સાધ્વી શ્રી સૌમ્યજ્યોતિશ્રીજી** આદિ સાધ્વીજી ભગવંતોની ઉપસ્થિતિમાં સિસોદરા ગામે શ્રી કુંથુનાથ જિનપ્રાસાદ પ્રતિષ્ઠા અર્ધ શતાબ્દિના ઉપલક્ષમાં અષ્ટાહ્નિકા મહોત્સવ વિ.સં. ૨૦૫૮ પો.વ. ૧૪ થી મ.સુ. ૬ સુધી ખુબજ ઉલ્લાસથી ઉજવાયો. આ પ્રસંગને પામીને સિસોદરા જૈન સંઘે પ્રસ્તુત પ્રતના પ્રકાશનમાં સંઘના જ્ઞાન નિધિનો સદુપયોગ કર્યો છે. તેમના આ સુકૃતની અમે ભૂરિ ભૂરિ અનુમોદના કરવા પૂર્વક તેમનો ખૂબ ખૂબ આભાર માનીએ છીએ.

**લિ. શ્રી અરિહંત આરાધક ટ્રસ્ટ**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# પુનઃ પ્રકાશન પ્રયોજન

શ્રાદ્ધ દિનકૃત્ય ગ્રંથ ઉપર એક સ્વોપજ્ઞ સંસ્કૃતટીકા છે, અને બીજી સંસ્કૃત અવચૂરિ છે. તેમાં સ્વોપજ્ઞ ટીકા બહુજ મોટી છે. અવચૂરિ સંક્ષિપ્ત છે. પ્રસ્તુત પ્રતમાં અવચૂરિનું મુદ્રણ કરવામાં આવ્યું છે. અવચૂરિના કર્તાનું નામ વગેરે જાણી શકાયું નથી. અવચૂરિમાં ઘણા સ્થળે શબ્દ પ્રયોગો સ્વોપજ્ઞટીકાને મળતા આવે છે. એથી સંભવ છે કે અવચૂરિકારે સ્વોપજ્ઞ ટીકાના આધારે જ થોડા ફેરફાર સાથે અવચૂરિની રચના કરી હોય, અને એથી જ કર્તા તરીકે પોતાના નામનો ઉલ્લેખ ન કર્યો હોય. મૂળ ગ્રંથકારનો પરિચય આ જ પ્રતમાં અલગ આપવામાં આવ્યો છે.

ગત વર્ષે આ ગ્રંથનો મારા કરેલા વિવેચન સહિત ગુજરાતી ભાવાનુવાદ પુસ્તક રૂપે પ્રકાશિત કરવામાં આવ્યો હતો. અનુવાદ કરતાં જણાયું કે મુદ્રિત પ્રત ઘણી અશુદ્ધ છે. આથી શુદ્ધ પ્રતનું પ્રકાશન ઘણું જરૂરી હતું. તથા મુદ્રિત પ્રતો અપ્રાપ્ય હોવાથી પણ આ પ્રતનું પુનઃ પ્રકાશન જરૂરી હતું. મારા શિષ્ય મુનિશ્રી દિવ્યશેખરવિજયજીની ઘણી સહાયથી ઘણી મહેનતથી પૂર્વ મુદ્રણમાં રહેલી અશુદ્ધિઓ દૂર કરી છે. છતાં અનુપયોગ આદિથી અશુદ્ધિઓ રહી ગઇ હોય તો પ્રતમાં સુધારી લેવા વિનંતી છે.

**આચાર્ય રાજશેખરસૂરિ**



For Private and Personal Use Only

# ગ્રંથકારનો સંક્ષિપ્ત પરિચય

**સ્વભાવ**-શ્રાદ્ધદિનકૃત્ય ગ્રંથના કર્તા આચાર્ય શ્રી દેવેન્દ્રસૂરિ શાંત સ્વભાવી, ક્રિયાપ્રવર્તક, સંવેગી, વિદ્વાન, પૂર્વકાળના ગીતાર્થોને યાદ કરાવે તેવા જ્ઞાની, ચારિત્રનિષ્ઠ, શાંત, ઉપદેશક, મોટાગ્રંથકાર અને શાસનપ્રભાવક હતા. આચાર્ય જગચ્ચંદ્ર-સૂરિએ ક્રિયોદ્ધાર કર્યો ત્યારે "આચાર્ય દેવેન્દ્રસૂરિ અને પંન્યાસ દેવભદ્ર ગણિ તેમના સહયોગી હતા. સંભવ છે કે આચાર્ય દેવેન્દ્રસૂરિને સં. ૧૨૮૫માં આચાર્યપદ મળ્યું હોય. તેમના શાંતરસવાળા વાત્સલ્યભર્યા મીઠા ઉપદેશથી જ અંચલગચ્છના ૪૪મા આચાર્ય મહેન્દ્રસિંહસૂરિએ સં. ૧૩૦૭ લગભગમાં થરાદમાં ક્રિયોદ્ધાર કરી શુદ્ધમાર્ગ સ્વીકાર્યો હતો.

મેવાડનો રાણો જૈત્રસિંહ, રાણો તેજસિંહ, રાણી જયતલાદેવી, રાણો સમરસિંહ વગેરે તેમના અનન્ય રાગી હતા. તેમના ઉપદેશથી રાણીજયતલાએ ચિત્તોડના કિલ્લા પર શામળિયા પાર્શ્વનાથ ભગવાનનું જિનાલય બંધાવ્યું. રાણા તેજસિંહે પણ મેવાડમાં અમારિપાલન કરાવ્યું હતું. આચાર્યદેવેન્દ્રસૂરિવરે ગુરુદેવની સાથે શત્રુંજય, ગિરનાર, આબૂ વગેરે યાત્રાઓ કરી હતી.

આચાર્ય દેવેન્દ્રસૂરિ, આચાર્ય વિજયચંદ્ર, ઉપાધ્યાય દેવભદ્ર સં. ૧૩૦૧ના ફાગણ વદિ ૧૩ ને શનિવારે પાલનપુર પધાર્યા, ત્યાં વરહુડિયા આસદેવે उपासक सूत्रवृत्ति.

ગ્રં. ૧૧૨૮ લખાવી. આચાર્યદેવેન્દ્રસૂરિએ સં. ૧૩૦૨માં વીજાપુર (ઉજ્જેન)માં વરહુડિયા કુટુંબના વરહુડિયા વીરધવલ તથા ભીમદેવને દીક્ષા આપી, તેમનાં નામ મુનિ વિદ્યાનંદ, તથા મુનિ ધર્મકીર્તિ રાખ્યાં. સં. ૧૩૧૪માં તે બંનેને ગણિપદ આપ્યું.

**મહુવા-ગ્રંથ ભંડાર** - આચાર્યદેવેન્દ્રસૂરિ તથા આચાર્ય વિજયચંદ્રસૂરિના ઉપદેશથી મહુવાના સંઘે સં. ૧૩૦૬માં સરસ્વતી



For Private and Personal Use Only

ગ્રંથભંડાર બનાવ્યો. તેઓ ત્યારબાદ સં. ૧૩૦૭માં થરાદ પધાર્યા. ત્યાં તેમને આચાર્ય મહેન્દ્રસૂરિ મળ્યા. ત્યાર બાદ આચાર્ય-દેવેન્દ્રસૂરિ માળવા તરફ વિહાર કરી ગયા, અને લગભગ ૧૨ વર્ષે ગુજરાત પધાર્યા.

આ બાર વર્ષના ગાળામાં આચાર્ય વિજયચન્દ્રસૂરિ ખંભાતમાં ચૈત્યવાસીઓની પાસત્થાવાળી 'વડીપોષાળ'માં રહ્યા. ત્યાં તે ચૈત્યવાસીઓ સાથેનો મીઠો સંબંધ, શ્રાવકો પ્રત્યેનો ગાઢ પ્રેમ અને ઋદ્ધિગારવથી શિથિલાચારી-પ્રમાદી બની ગયા હતા. તેમણે 'આચાર્ય દેવેન્દ્રસૂરિની આજ્ઞા' છોડી, પોતાનો સ્વતંત્ર ગચ્છ બનાવ્યો.

આચાર્ય દેવેન્દ્રસૂરિ પોતાના સંવેગી પરિવાર સાથે ગુજરાતમાં આવ્યા, અને સં. ૧૩૧૯માં ખંભાત પધાર્યા. આચાર્ય વિજયચંદ્રસૂરિએ ગર્વના ઘેનમાં તેમનો વિનય-સત્કાર કર્યો નહીં, તેમજ શિથિલાચાર પણ છોડ્યો નહીં. આચાર્યદેવેન્દ્રસૂરિએ 'આ શિથિલાચારીઓની વડીપોષાળમાં ઊતરવાનું ઉચિત ન ધાર્યું. અને બીજા સ્થાનમાં ઊતરવાનો વિચાર કર્યો.

આ રીતે સં. ૧૩૧૯માં બે ગુરુભાઇઓ વચ્ચે ખંભાતમાં ભેદ પડ્યો. ઘણા વિચારશીલ શ્રાવકોને "આ બંને આચાર્યો વચ્ચે ભેદ પડે" તે ઠીક ન લાગ્યું. સંગ્રામ સોનીના પૂર્વજ "સોની સાંગણ ઓસવાલે" આ બંને શાખામાં કયી શાખા સાચી છે ? તેનો નિર્ણય કરવા તપસ્યા કરી, પ્રત્યક્ષપ્રભાવિ જિનપ્રતિમાની સામે ધ્યાન ધર્યું. શાસનદેવીએ સાંગણ સોનીને જણાવ્યું કે, "આચાર્ય-દેવેન્દ્રસૂરિ યુગોત્તમ આચાર્ય પુંગવ છે. તેમની જ ગચ્છપરંપરા લાંબા કાળ સુધી ચાલશે, માટે તારે તેમની ઉપાસના કરવી." (ગુર્વાવલી શ્લો. ૧૩૭-૧૩૮)

સંગ્રામ સોની ભીમદેવ ત્યાગ અને સંયમમાર્ગની તરફેણ કરતો હતો. તેણે આચાર્ય દેવેન્દ્રસૂરિને નાની પોષાળમાં ઉતાર્યા.





For Private and Personal Use Only

આથી આચાર્ય દેવેન્દ્રસૂરિનો શિષ્ય પરિવાર સં. ૧૩૧૯માં ખંભાતમાં લઘુ પોષાળના નામે પ્રસિદ્ધ પામ્યો. ''લઘુપોષાળ એ વાસ્તવમાં તપાગચ્છનું જ નામાન્તર છે.

ગચ્છભેદ- આચાર્ય વિજયચંદ્રસૂરિનો શિષ્યપરિવાર મોટી પોષાળમાં જેમનો તેમ શિથિલ બની રહ્યો. આ શિથિલ આચારના કારણે સં. ૧૩૧૯માં ખંભાતમાં જ તપાગચ્છની મૂળ શાખાથી બીજી જૂદી શાખા વડીપોષાળના નામથી અસ્તિત્વમાં આવી. આ સમયે મૂળ શાખાનું બીજું નામ તપાગચ્છ લઘુપોષાળ, લહુડીપોષાળ, લોઢી પોષાળ પડ્યું.

આચાર્યદેવેન્દ્રસૂરિના વ્યાખ્યાનમાં સંવેગ, ત્યાગના અમોઘ રસવાળો શાંતરસનો પ્રવાહ વહેતો હતો. તેઓ ખંભાતના ચોકમાં રહેલા ''કુમારપાલ વિહારના ઉપાશ્રયમાં'' ધર્મોપદેશ દેતા હતા. મહામાત્ય વસ્તુપાલ તેમને વંદન કરવા આવ્યો ત્યારે આચાર્ય મહારાજે ચાર વેદ ઉપર વ્યાખ્યાન આપ્યું. જેમાં જૈન અને જૈનેતર દર્શન સંબંધી સિદ્ધાંતોનું તલસ્પર્શી નિરુપણ કર્યું. મહામાત્ય વસ્તુપાલે વ્યાખ્યાનમાં સામાયિક લઇને બેઠેલાઓને ''મુહપત્તિની પ્રભાવના'' કરી. લગભગ ૧૮૦૦ મુહપત્તિઓ ત્યારે તેમણે વહેંચી. (ગુર્વાવલી-શ્લો. ૧૧૪)

પટ્ટધર આચાર્ય મહારાજ ત્યાંથી વિહાર કરતા પાલનપુર પધાર્યા. આચાર્ય મહારાજે અહીં સંઘની વિનંતીથી સં. ૧૩૨૨માં પાલનપુરમાં પલ્લવિયા પાર્શ્વનાથ ભગવાનના મંદિરમાં ઉપાધ્યાય વિદ્યાનંદગણિને આચાર્યપદ અને પંન્યાસ ધર્મકીર્તિને ઉપાધ્યાયપદ આપ્યું. આ સમયે મંદિરના મંડપમાં કેસરની દૈવી વૃષ્ટિ થઇ. લોકમાં આશ્ચર્ય અને આનંદ ફેલાયો.

આચાર્યશ્રીએ આચાર્ય વિદ્યાનંદસૂરિને ગુજરાતમાં વિચરવાની આજ્ઞા આપી. અને પોતે સં. ૧૩૨૪માં વિહાર કરતાં કરતાં ફરીવાર માળવા પધાર્યા. સંભવ છે કે, તેમણે ઉપાધ્યાય ધર્મકીર્તિને માળવાના વિહારમાં પોતાની સાથે રાખ્યા હોય.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

**સ્વર્ગ-** આચાર્યદેવેન્દ્રસૂરિ સં. ૧૩૨૭માં માળવામાં (અગર મારવાડના સાચોરમાં) કાળધર્મ પામ્યા.

આ સમાચાર મળતાં ભારતના જૈન સંઘમાં ભારે ગમગીની ફેલાઇ. ખંભાતના સંગ્રામ ભીમદેવે "તે દિવસથી અન્ન લેવાનો ત્યાગ કર્યો. સંગ્રામ સોની ભીમદેવે ૧૨ વર્ષ સુધી અનાજ ખાધું નહીં." સાથેના મુનિવરોએ માળવાથી ગુજરાત તરફ વિહાર કર્યો. આચાર્ય દેવેન્દ્રસૂરિએ "દેવેન્દ્ર અંકવાળા" ગ્રંથો બનાવ્યા, જેનાં નામ નીચે મુજબ જાણવા મળે છે.

૧. ધર્મરત્ન પ્રકરણ-ટીકા
૨. સુદંસણાચરિયં
૩, ૪, ૫. ભાષ્યત્રય ગા. ૧૫૨
૬. સિદ્ધ પંચાશિકા ગા. ૫૦
૭. સિદ્ધ પંચાશિકા-વૃત્તિ ગ્ર. ૮૭૫૦
૮. શ્રાદ્ધવિધિ કૃત્ય
૯. શ્રાદ્ધ પ્રતિક્રમણ સૂત્રવૃત્તિ (વંદારુવૃત્તિ) ગ્ર. ૨૭૨૦
૧૦. પંચ નવ્ય કર્મગ્રંથ.
   ૧. કર્મ વિપાક ગા. ૬૧
   ૨. કર્મસ્તવ ગા. ૩૪
   ૩. બંધવિધાન ગા. ૨૫
   ૪. ષડશીતિ ગા. ૮૬
   ૫. શતક ગા. ૧૦૦
૧૧. છ કર્મગ્રંથ ટીકા
૧૨. સાસય જિણથયં. ગા. ૨૪
૧૩. ધારણાયંત્ર

આ ગ્રંથો સિવાય તેમણે 'સિરિ ઉસહવદ્ધમાણ' વગેરે સ્તવનો તથા યુગપ્રધાન સ્વરૂપયંત્રની રચના કરી હતી. (જૈન પરંપરાનો ઇતિહાસ ભાગ ત્રીજામાંથી સાભાર અક્ષરશઃ સમુદ્‌ધૃત.)



For Private and Personal Use Only

ॐ

## ॥ श्री श्राद्धदिनकृत्यसूत्रान्तर्गतविषयक्रमः ॥


| विषय | गाथाङ्क |
|---|---|
| मङ्गलपूर्वकं ग्रन्थकारप्रतिज्ञा | १ |
| अष्टाविंशति द्वाराणि | २-७ |
| **१ नमस्कार द्वारे** | |
| निशाविरामे विनिद्रेण सुश्रावकेण जिनोत्तमनमस्करणम् | ८ |
| नमस्कारविधिः, 'नवकार' मन्त्रपठनं च | ९ |
| 'नवकार' मंत्रमाहात्म्यम् | १०-१२ |
| 'नवकार' मन्त्रस्यादरख्यापने आवश्यकभाष्यप्रमाणम् | १३-१४ |
| 'नवकार' मन्त्रानुसरणे विशेषकथनम् | १५ |
| उक्तार्थोपसंहारपूर्वकपमुपदेशः | १६ |
| दृष्टान्तपुरस्सरं विधिनाऽस्य पठनोपदेशः | १७ |
| अस्य पाठे ऐहिकामुष्मिकफलप्रदर्शनम् | १८ |
| **२. स्मरणद्वारे** | |
| द्वितीयद्वारस्यावयवार्थकथनम् | १९ |
| **३ व्रतद्वारे** | |
| तृतीयद्वारस्य बहुभङ्गसंभवत्वप्रदर्शनम् | २० |
| **४ योगद्वारे** | |
| षाण्मासिकतपःकायोत्सर्गे तद्विषयचिन्तनार्थं कथनम् | २१-२२ |
| **५ चैत्यवंदनद्वारे** | |
| स्नानविधानवस्त्रनिवसनपूर्वकं | |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




गृहबिम्बप्रमार्जनम् २३-२४
पूजाविधिः २५-२६
पूजाफलम् २७
पूजाफलत्वेन यथायोगं देवत्वादिषु दृष्टान्तप्रदर्शनम् २८
द्रव्यपूजानिगमनं भावपूजाप्रस्तावश्च २९
प्रथमदण्डकभणनविधिः ३०-३१
जिनमुद्रया चैत्यस्तवदण्डकस्य विधिवद्
भणनकथनम् ३२
कायोत्सर्गस्य दोषवर्जनं तस्मिंश्च
चिन्तनकथनम् ३३-३५

**६ प्रत्याख्यानद्वारे**

देवसाक्षिकं प्रत्याख्यानग्रहणोपदेशः ३६

**७ चैत्यगृहगमनद्वारे**

ऋद्धिमच्छ्राद्धस्य चैत्यगृहगमनविधिः ३७-३८
प्रभावना ३९-४४
प्रभावनाफलम् ४५
प्रभावनाफलस्यैव सदृष्टान्तं कथनम् ४६
दृष्टान्तद्वारेण प्रभावनायाः सर्वोत्तमं फलम् ४७
चैत्यगमनद्वारोपसंहारः ४८

**८ सत्कारद्वारे**

जिनगृहप्रवेशे पञ्चविधाभिगमप्रदर्शनम् ४९-५०
जिनगृहप्रवेशविधिः ५१
प्रदक्षिणाया नैषेधिक्याश्च भावनप्रकारः ५२-५६
गर्भगृहप्रवेशविधिः ५७-५८
पूजोपचारपुरःसरं भगवत्स्नपनविधिः ५९
ग्रन्थान्तरेणैतत्प्रतिपादनम् ६०
स्नपनादिपूजाप्रकारस्यैव प्रपञ्चः ६१-६९
आरात्रिकावसरे नाट्यविधानस्य




For Private and Personal Use Only

| | |
|---|---|
| सदृष्टान्तं निर्देशः | ७० |

**९ वन्दनद्वारे**

| | |
|---|---|
| द्रव्यपूजाशेषस्य कथनम् | ७१-७६ |
| ऋद्धिमत्पूजामुपसंहृत्येतरश्राद्धस्य चैत्यगमनविधेर्निरूपणम् | ७७-७८ |
| संभवद्विधेः कथनम् | ७९ |
| वन्दनविधिः | ८० |
| वन्दनफलम् | ८१ |
| वन्दनस्यैव फलं दृष्टान्तद्वारेण | ८२ |
| षड् वन्दनजन्यगुणाः | ८३ |

**१० प्रत्याख्यानद्वारे**

| | |
|---|---|
| गुरुसाक्षिकं प्रत्याख्यानकरणम्, | ८४ |

**१२ यतिपृच्छाद्वारे**

| | |
|---|---|
| गुरोः शरीरनिराबाधवार्तादिपृच्छनम् | ८४ |

**१३ उचितकरणीयद्वारे**

| | |
|---|---|
| तदनन्तरकरणीयस्य निर्देशः | ८४-८५ |

**११. श्रवणद्वारे**

| | |
|---|---|
| श्रवणविधिः | ८६-८९ |
| अस्यैवार्थस्य सविशेषं भावनम् | ९०-९३ |
| सशङ्कितानामर्थानां पृच्छा विचारविधिश्च | ९४ |
| संशयानुच्छेदे दूषणकथनम् | ९५ |
| संशयापोहपूर्वकं विदितपरमार्थेन भवितव्यमित्युपदेशः | ९६ |
| चैत्योद्धारचिन्तादिकृत्यकथनम् | ९७-९८ |
| चैत्योद्धारादिकृत्यमेव गार्हस्थ्यसारम् | ९९ |
| जीर्णोद्धारफलम् | १००-१०९ |
| जीर्णोद्धारनिगमना | ११० |
| जीर्णोद्धारचिन्तानन्तरं पुनः | |






For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




कृत्यान्तरकथनम् १११
चैत्यचिन्तां कुर्वतः कस्यचित्
चैत्यद्रव्यविप्रणाशोऽपि स्यादतस्तद्वक्तव्यतायाः
सदृष्टान्ताया निर्देशः ११२-११५
संकाशकथानकम् ११६-१२५
देवद्रव्यवक्तव्यतां सदृष्टान्तामभिधाय
तस्य साधारणद्रव्यस्य च तुल्यदोषोद्भावनम् १२६
चैत्यद्रव्यविनाशमुपेक्षमाणः साधुरपि
देशनादिभिरनिवारयन्
दोषभागित्याशयनिरूपणम् १२७
चैत्यद्रव्यविनाशस्य द्वैविध्यकथनम् १२८
चैत्यद्रव्यविनाशदोषस्य प्रसङ्गतो
गुरुद्रव्यविनाशदोषस्य च व्यवहारभाष्यगाथादिभिः
प्रदर्शनम् १२९-१३१
एतस्यैवार्थस्य समर्थनम् १३२
देवद्रव्यभक्षणे दोषोद्घाटनमन्यमतेन १३३-१३५
जिनद्रव्यवृद्धिकर्तुः फलं तस्य च
महासत्त्वता १३६-१४१
देवद्रव्यभक्षणादिषु स्वस्वफलम् १४२-१४४
देवद्रव्यविषयस्योपसंहारः १४५
श्रवणद्वार एव विधिविशेषकथनम् १४६
चैत्य एव साधवः किं न तिष्ठन्तीत्याद्याशङ्काया
व्यवहारगाथाभिर्निरसनम् १४७-१५०
चैत्यावस्थायित्वं व्युदस्य तत्रैव
व्याख्यानविधेः कथनम् १५१
किमेवं न निश्राकृतेऽपीत्यस्य निरूपणम् १५२
ततः किमिति प्रश्नस्योत्तरप्रदानम् १५३
मन्दश्रद्धत्वाच्च ते यदभिधारयन्ति




For Private and Personal Use Only

तन्निरूपणम् १५४
प्रस्तुतकथनम् १५५

## १४ व्यवहारशुद्धिद्वारे

पञ्चदशकर्मादानवर्जनायोपदेशः १५६-१५७
कूटवाणिज्यनिषेधः १५८
व्यवहारशुद्धेरेवोत्तरगुणभूतत्वदर्शनम् १५९-१६१
व्यवहारशुद्ध्यभावे सर्वस्य नैष्फल्यकथनम् १६२
एतस्यैवार्थस्य भावनम् १६३
व्यवहारशुद्धिविषयेऽन्वयव्यतिरेकावुपदर्श्य तद्विषय एवोपदेशप्रदानम् १६४
कुशीलानां संसर्गेण उभयलोकभ्रष्टता १६५-१६६
एतस्यैवार्थस्य सदृष्टान्तकथनम् १६७
कुमित्रससगस्य प्रतिजन्म दुःखावहत्वदर्शनम् १६८
कुत्रिमसुमित्रसंसर्गे दोषगुणाविष्करणपूर्वकं दृष्टान्तप्रदर्शनम् १६९
सत्सङ्गोपदेशः १७०

## १५ भोजनद्वारे

मध्याह्नसमयरूपभोजनवेलाप्राप्तौ सुश्रावकस्य गृहबिम्बपूजनवन्दनविधानम् १७१
निष्पन्नायां रसवत्यां साधुनिमन्त्रणविधिः १७२
गृहान्तर्गतसाधूनां प्रतिपत्तिपूर्वकं प्रतिलाभनविधिः १७३-१७४
दानक्रियायामुत्सर्गापवादयोः कथनम् १७५
उत्सर्गापवादौ प्रदर्श्य यद्विधेयं तस्य दर्शनम् १७६
स्वर्णरूप्यादिवर्जं यद्यतिजनयोग्यं तस्य प्रदर्शनम् १७७
संयमोपग्रहहेतुदानकथनम् १७८




For Private and Personal Use Only

| | |
|---|---|
| सुपात्रदानयत्नफलम् | १७९ |
| एतस्मिन्नेवार्थे विपाकश्रुतप्रदर्शितदशाख्यानकथनम् | १८० |
| दानस्यैवोभयलोकफलं सदृष्टान्तम् | १८१-१८३ |
| दान एव भक्तेराविर्भावनम् | १८४-१८५ |
| तत्र च कारणप्रदर्शनम् | १८६ |
| एतस्यैव दृष्टान्तपुरस्सरं दृढीकरणम् | १८७ |
| दानं दत्त्वा कर्तव्यभावना | १८८-१८९ |
| सर्वोत्तमदानस्य प्रदर्शनम् | १९० |
| दानेषु वसतेः प्राधान्यस्य सहेतुकमुपदर्शनम् | १९१ |
| वसतिदानस्यैहिकं फलम् | १९२ |
| वसतिदानस्य पारत्रिकं फलम् | १९३ |
| वसतिदानस्यैव पुनरैहिकामुष्मिकफलप्रदर्शनं सदृष्टान्तम् | १९४ |
| शय्यादातॄणां दिवश्च्युतानां सुखस्योपदर्शनम् | १९५ |
| शय्यादानं सर्वदानेभ्यःश्रेष्ठतममित्येतस्य सहेतुकमाविर्भावनम् | १९६ |
| न केवलं शय्यास्वाम्येव धन्यः किन्त्वनुमोदमाना अन्येऽपीत्येतस्य कथनम् | १९७ |
| शय्यादानमाहात्म्यस्य निगमनम् | १९८ |
| दानविधावेव कृत्यशेषस्योपदर्शनं कृत्यान्तरप्रस्तावनं च | १९९ |
| साधर्मिकवात्सल्यस्य कर्तव्यतयोपदेशः | २०० |
| साधर्मिकवात्सल्यकरणे श्रीवज्रस्वामिनां दृष्टान्तः | २०१ |
| साधर्मिकवात्सल्यं यथा विधेयं तथा सदृष्टान्तं तस्य कथनम् | २०२-२०७ |






For Private and Personal Use Only

वात्सल्यस्यैव राजग्रहाद्यापदुद्धरणतायाः
सदृष्टान्तं प्रतिपादनम् २०८
द्रव्यवात्सल्यमुपसंहृत्य भाववात्सल्यस्योपदेशः २०९
भाववात्सल्ये स्मारणादिप्रयोगः २१०
यस्त्वप्रीतिभयात् साधर्मिकमुपेक्षते
तं प्रत्युपदेशः २११
प्रमादवतां गरीयसामपि
गरीयस्तरोऽनर्थ इत्येतस्याशयस्य कथनम् २१२
प्रमादिनः साधर्मिकस्य धर्मादौ
कर्तव्यायाश्चोदनायाः प्रकारः २१३-२१९
भाववात्सल्यस्योपसंहारः २२०
अनुकम्पादानस्याप्यनिवारितत्वकथनम् २२१-२२२
भोजनद्वारे कर्तव्यशेषस्य कथनम् २२३
अत्रैव च विधिशेषप्रदर्शनम् २२४

**१६. संवरणद्वारे**

यथाविधि स्वाध्यायकरणोपदेशः २२५

**१७ श्रवणद्वारे**

आगमश्रवणफलभूतस्योत्सगविधेः प्रकटनम् २२६
एकभक्तं कर्तुमशक्तस्य विधिः २२७
रात्रिभोजनदोषाः २२८
निशाभोजिनां दृष्टान्तद्वारेणापायप्रदर्शनम् २२९

**१८ सत्कारद्वारे**

सायं पुनः पूजापूर्वकं जिनोत्तमवन्दनस्य
कथनम् २३०

**१९ वंदनादि (आवश्यक) द्वारे**

तृतीयपूजानन्तरं पौषधशालायां गत्वा विधिना
सामायिककरणस्य कथनम् २३१
सामायिकानन्तरं कर्तव्योपदेशः २३२



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रावकस्य कार्योत्पत्तौ सामायिके पारिते ततः क्षणिकत्वसद्भावे पुनः पुनस्तत्करणेन कालवृद्धेः फलप्रदर्शनम् २३३

श्रावकसामायिकमहत्त्वे प्रदर्शिते मा मुग्धमतेः साधुसामायिकविषये गौणबुद्धिरिति तत्प्राधान्यख्यापनपूर्वकमुपदेशः २३४

कृतसामायिकः प्रतिक्रमणवेलायामावश्यकं कुर्यात् २३५-२३६

नातिचाराणामेव प्रतिक्रमणं किन्तु चतुर्षु स्थानेष्वित्येतत्कथनम् २३७

पूर्वोक्तार्थस्यैव सविशेषेण प्रदर्शनम् २३८

अनुयोगद्वारोक्तस्यैव दर्शनम् २३९

आवश्यकस्यैवानुयोगद्वारोक्तपर्यायनामकथनम् २४०

प्रतिक्रमणस्थानानां दर्शनम् २४१

आवश्यककरणे विधिशेषकथनम् २४२

**२० यतिविश्रामणाद्वारे**

आवश्यकस्वाध्यायकरणपूर्वकं गुरोरग्रे सूत्रार्थपृच्छा २४३

**२१. उचितयोग (स्वाध्याय) द्वारे**

साधूनां विश्रामणं कृत्वा शेषकृत्यपृच्छनकथनम् २४४

**२२ गृहगमन (परिवार देशना) द्वारे**

निजगृहे गत्वा भार्यापुत्रादीनां पुरतो धर्मदेशनाकरणोपदेशः २४४-२४६

भार्यादीनां पुरतो धर्मदेशनाया अकरणे दोषोद्घाटनम् २४७-२४८

द्रव्यतो भावतश्च स्वजनादीनां चिन्तनावश्यकता २४९-२५०

धर्मदेशनाविधिः २५१





For Private and Personal Use Only

साधर्मिकभेदकथनम् २५२
साधर्मिकमध्ये निवासकरणोपदेशः २५३
सत्सङ्गोऽपि कुसङ्गवर्जनादेव फलवानिति तत्प्रतिषेधकथनम् २५४-२५६
अणुव्रताद्युपदेशः २५७-२५८
भोगोपभोगव्रतस्य विवरणम् २५९-२६०
सचित्तानामेव केषाञ्चिद् द्रव्याणां प्रदर्शनम् २६१-२६३
उपसंहारपुरस्सरमुपदेशदानम् २६४
विकथानां प्रदर्शनम् २६५
हिंस्रप्रदानपापोपदेशयोरभिधानम् २६६-२६७
प्रतिदिनमुपयोगित्वेन यतनाया उपदेशः २६८
यतनां विना तपसोऽपि नैरर्थक्यकथनम् २६९
श्रावकधर्मोपसंहारपूर्वकं श्राद्धाभिग्रहकथनप्रतिज्ञा २७०
श्रावकधर्मोपदेशसमर्थनपूर्वकं विशेषाभिग्रहनिरूपणम् २७१-२७२
लोचदिने घृतदानं कर्तव्यमित्येतस्मिन् भूताचार्यगाथायाः प्रमाणम् २७३
अभिग्रहनिगमना, स्वजनानामेव च धर्मे स्थिरीकरणार्थं मनुष्यत्वादिसामग्रीदौर्लभ्यप्रस्तावना २७४
एतस्यैवार्थस्य सूत्राष्टकेन भावना २७५-२८२
जिनधर्मस्यैवोपमानैः स्तवनम् २८३-२८६
दृष्टान्तोपदर्शनद्वारेण जिनधर्मस्यैव सर्वोत्तमत्वख्यापनम् २८७-२९१
तस्मिन् धर्म एवोद्यमकरणार्थमुपदेशः २९२
जिनपूजादिविषयत्वमेव धर्मस्येति तस्योपदेशः २९३
धर्मोद्यमेनैव मनुष्यत्वादिदुर्लभसामग्रीसार्थक्यम् २९४




For Private and Personal Use Only

धर्मदेशनाद्वारनिगमनपूर्वकमुत्तरग्रन्थसंबन्धार्थ-
निरूपणम् २९५

## २३. विधिशयन द्वारे

भुवननाथवन्दनचैत्यवन्दनानन्तरं
सर्वजीवक्षामणा २९६-२९८
क्षामणानन्तरं जिनसमक्षमालोचना २९९-३००
अङ्गीकृतभोगोपभोगादि मुक्त्वा नमस्कारावधिं
यावत्सर्वपापपरिहारार्थकथनम् ३०१-३०४

## २४. अब्रह्मत्याग द्वारे

प्रायः श्रावकेण ब्रह्मचर्यवता भाव्यं, तच्च
मोहजुगुप्सात एवेति तज्जुगुप्सार्थमुपदेशः ३०५
गृहवासादनिर्वर्तनस्यैव हेतुद्वारेण
निन्दनम् ३०६-३०७
गृहवासस्वरूपं परिभाव्यात्मनो जुगुप्सा ३०८
मुनिमार्गप्रव्रजने भावना ३०९

## २५ स्त्रीशरीरस्वरूप चिंतन द्वारे

स्त्रीकलेवरस्यानर्थनिदानत्वकथनम् ३१०-३१२
शरीरस्वरूपस्य प्रदर्शनम् ३१३
योषिदङ्गतत्त्वभावनम् ३१४
अस्यैवार्थस्य भावना ३१५
युवतिपञ्जरबद्धपुरुषाणां क्लेशस्यैव
दृष्टान्तद्वारेण प्रकटनम् ३१६

## २६. स्त्रीसङ्गानिवृत्त बहुमान द्वारे

योषिद्विरतेषु बहुमानप्रदर्शनम् ३१७-३१९
आत्मने आत्मन आशंसार्थस्य कथनम् ३२०
परमेष्ठिभगवन्तं चित्ते स्थापयित्वा
ब्रह्मचर्यपूर्वकं निद्रासेवनम् ३२१





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**२७ बाधकदोषविपक्ष चिंतन द्वारे**


संसारस्य दुःखहेतुत्वचिन्तनम् ३२२
संसारहेतुकर्मपरिहारार्थमुपदेशः ३२३
संसारहेतून्निराकृत्य मोक्षस्मरणार्थमादेशः ३२४


**२८. धर्माचार्यस्मरण द्वारे**


मूलगुणकथनपूर्वकं संयमोद्युक्तानामाचाराः सविस्तरम् ३२५-३२८
पिण्डविशुद्ध्याद्युत्तरगुणप्रस्तावे प्रथमं पिण्डस्यैव प्राधान्यान्नवकोट्द्विारेण तद्विशुद्धिदर्शनम् ३२९
सूरिगुणानां निर्देशः ३३०-३३१
सर्वगुणार्थमुपदेशः ३३२
ईदृक्सूरिदुर्लभत्वप्रतिपादनपुरस्सरं स्वपरोपकारकत्वस्य आवेदनम् ३३३
उत्तमश्रावकस्योत्तममनोरथप्रकटनम् ३३४
प्रस्तुतशास्त्रस्योपसंहारः ३३५
प्रस्तुतशास्त्रश्रवणादिभावितमतीनामन्त-र्मुखीभूतानां प्रशंसा ३३६
प्रस्तुतशास्त्रोक्तविधानमनुवर्तमानानां सुश्रावकाणां फलदर्शनम् ३३७
छद्मस्थत्वात् सूत्रकृतः स्वोच्छेकपरिहारः ३३८-३३९
यथैतत्सूत्रप्रणयनमकारि तथा तदाविर्भावनम् ३४०
एतदध्ययनादावाशंसाद्वारेण तात्कालिकफलकथनम् ३४१
एतच्छास्त्रकरणजपुण्येन भविनां भवदुःखविनाशाशंसनम् ३४२
सर्वोपसंहारः ३४३




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ धरणेन्द्र पद्मावती संपूजिताय श्री शंखेश्वरपार्श्वनाथाय नमः ॥

॥ श्री दान-प्रेम-रामचन्द्र-हीरसूरीश्वरेभ्यो नमः ॥

## सिद्धान्तसारसागरश्रीदेवेन्द्रसूरि विरचितं
## श्रुतधरस्थविरमहर्षिरचितावचूरिसहितं

# श्राद्धदिनकृत्यसूत्रम्

ॐ नमो वीतरागाय । ॐ नमः श्रुतज्ञानाय ।

**वीरं नमिऊण तिलोयभाणुं विसुद्धनाणं सुमहानिहाणं ।**
**वुच्छामि सड्ढाण दिणस्स किच्चं, जिणिंदचंदाण य आगमाओ ॥१॥**

**व्याख्या :** श्रीवीरं नत्वा श्राद्धानां दिनकृत्यं वक्ष्ये इत्युक्तिलेशः । नमस्कारश्चतुर्धा-द्रव्यतो न भावतः पालकादीनाम् १, भावतो न द्रव्यतोऽनुत्तरसुराणाम् २, न द्रव्यतो न भावतः कपिलादीनाम् ३, द्रव्यतो भावतश्च सम्यग्दृष्टेरुपयुक्तस्य



For Private and Personal Use Only

सुसंवृतवचनस्य सुप्रणिहितगात्रस्य जिनादीन्नमस्कुर्वतः ४ । तत्र विघ्नव्रातोपशान्तये ऐकान्तिकाव्यभिचारिभाव-मङ्गलरूपेण तुर्यनमस्कारेण प्रणम्येति भावः । कीदृशं वीरम् ? '**तिलो०**' त्रिलोकीस्थितधर्मास्तिकायादिद्रव्यसमूहस्य युगपत्संशयोच्छेदकत्वेनोद्योतकत्वात् भानुरिव **त्रैलोक्यभानुस्त्रि**भुवनभास्करस्तम् । एतदेव भावयति-'**विशुद्धज्ञानं**', **विशुद्धं**-सकलज्ञानावरणक्षयोत्पन्नत्वाद्वितिमिरं **ज्ञानं**-केवलाख्यं यस्य तम् । पुनः कीदृशम् ? '**सुमहानि०**' तत्रेतरनिधानापेक्षयाऽक्षय्यत्वेन महच्च तन्निधानं च **महानिधानं**-नैसर्पादिरूपं, तस्मादपि भव्यसत्त्वानां दुर्गदौर्गत्यदुःखदारिद्र्योच्छेदकत्वेन सुगतिसुखसम्पत्सम्पादकत्वेन च **सुष्ठु**-सर्वातिशायि महानिधानम् । एवं च श्रीमहावीरस्य सुमहानिधानत्वेऽयं सम्प्रदायः-'एकदा श्रीवीरः श्वेताम्बीं नगरीं व्रजन् गोपालैर्वारितोऽपि कनकखलाख्यतापसाश्रमे मण्डूकीहन्तृतपस्वि १ ज्योतिष्क २ कनकखलाख्यतापसाश्रमस्थकुलपतिसुतकौशिककुलपति ३ चण्डकौशिककुलपतिजीवदृष्टिविषचण्ड-कौशिकसर्पप्रतिबोधनार्थं तत्रागतः । स स्वामिदर्शनेन जातजातिस्मृतिरनशनं गृहीत्वा सहस्रारे सुरोऽभूत् ।' इति कुगतिदौर्गत्यदलनात्सुखसम्पत्तिकरणान्महानिधिः । **वीर**पदेनापायापगमातिशयः १ । **त्रैलोक्यभानुरि**त्यनेन वचनातिशयः २ । **विशुद्धज्ञानमि**त्यनेन ज्ञानातिशयः ३ । **सुमहानिधानमि**त्यनेन पूजातिशयः ४ । तमेवं गुणविशिष्टं वीरं **नत्वा वक्ष्ये, श्राद्धाः**- श्रावकास्तेषां स्वरूपमिदम्-

**श्रद्धालुतां श्राति जिनेन्द्रशासने, धनानि पात्रेषु वपत्यनारतम् ।**
**करोति पुण्यानि सुसाधुसेवनादतोऽपि तं श्रावकमाहुरुत्तमाः ॥१॥**



For Private and Personal Use Only

एतच्च ऋद्धिप्राप्तमाश्रित्योक्तम् । इदं तु सर्वसाधारणम्- **संपत्तदंसणाई पइदियहं जइजणा सुणेई य । सामायारिं परमं जो खलु तं सावगं बिंति ॥१॥** अत्र च द्विविधेनाप्यधिकारस्तेषां श्राद्धानां **दिनस्य**-अहोरात्रस्य, मध्ये इति शेषः, **कृत्यं**- करणीयं 'नमस्कारेण विबोध' इत्यादिकं वक्ष्ये । अनेन चाभिधेयमावेदितम् । कुतः ? **'जिनेन्द्रचन्द्राणां चागमात्'** जिनाः- श्रुतावधिमनःपर्यायज्ञानिनस्तेषां विमलकेवलज्ञानपरमैश्वर्यसमन्वितत्वेन प्रधानत्वादिन्द्राः- समान्यकेवलिनस्तेष्वपि सर्वातिशयसम्पत्त्या चन्द्रवदाह्लादकत्वाज्जिनेन्द्रचन्द्रास्तेषा**मागमा**त्-तत्प्रणीतावश्यकोपासकदशादिसिद्धान्तात्समुद्धृत्येति । **च**शब्दाद् बहुश्रुताशठसमाचीर्णसम्प्रदायाच्च । उपायः प्रस्तुतमेवेदं शास्त्रम् । उपेयं तदर्थपरिज्ञानम् । प्रयोजनं तु प्रेक्षावत्प्रवृत्तिसामर्थ्यगम्यं कर्तृश्रोतृगतानन्तरपरम्परभेदभिन्नं चतुर्विधमपि वाच्यं, तत्र कर्तुरनन्तरं सत्त्वानुग्रहः, परम्परं त्वपवर्गप्राप्तिः, यदुक्तं-

**''सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् ।**
**करोति दुःखतप्तानां, सः प्राप्नोत्यचिराच्छिवम् ॥१॥**

श्रोतृणां त्वनन्तरं स्वकृत्याधिगमः, परंपरं तु तेषामपवर्गप्राप्तिः, यदुक्तं वाचकमुख्येन-

**''प्राप्तः स कल्पेष्विन्द्रत्वं वा, सामानिकत्वमन्यद्वा ।**
**स्थानमुदारं तत्रानुभूय सौख्यं तदनुरूपम् ॥१॥**



For Private and Personal Use Only

**नरलोकमेत्य सर्वगुणसंपदं दुर्लभां पुनर्लब्ध्वा**
**शुद्धः स सिद्धिमेष्यति भवाष्टकाभ्यन्तरे नियमात् ॥२॥ (प्रशम.)**

इति शास्त्रप्रस्तावनावृत्तार्थः ॥१॥

यदुक्तं श्राद्धानां दिनकृत्यं वक्ष्ये । अतस्तदभिधित्सुर्द्वारगाथाषट्कमाह-

**नवकारेण विबोहो १, अणुसरणं सावओ २ वयाइं मे ३ ।**
**जोगो ४ चिइवंदणमो ५, पच्चक्खाणं च विहिपुव्वं ६ ॥२॥**
**तह चेईहरगमणं ७, सक्कारो ८ वंदणं ९ गुरुसगासे ।**
**पच्चक्खाणं १० सवणं ११, जइपुच्छा १२ उचियकरणिज्जं १३ ॥३॥**
**अविरुद्धो ववहारो १४, काले तह भोयणं १५ च सवरण १६॥**
**चेइहरागमसवणं १७, सक्कारो १८ वंदणाईयं (इं च) १९ ॥४॥**
**जइविस्सामण २० मुचिओ, जोगो नवकारचिंतणाईओ २१ ।**
**गिहगमणं २२ विहिसयणं, सरणं गुरुदेवयाईणं २३ ॥५॥**



For Private and Personal Use Only

**अब्बंभे पुण विरई, मोहदुगंछा २४ सतत्तचिंता य ।**
**इत्थीकडेवराणं २५, तव्विरएसुं च बहुमाणो २६ ॥६॥**
**बाहगदोसविवक्खे २७, धम्मायरिए य उज्जुयविहारे २८ ।**
**एसो दिणकिच्चस्स उ, पिंडत्थो से समासेणं ॥७॥ ॥ दारगाहाओ ॥**

**व्याख्या-'नम०'** नमस्कारेण **विबोधो-**निद्रापगमः, श्रावकेण कार्य इति सर्वत्र गम्यम् १। **'अणु०'** नमस्कारपरावर्तना**दनु**-पश्चात्**स्मरणं** श्रावकोऽहमस्मीत्यादि २ । **'व०' व्रतान्य**णुव्रतादीनि मे कति सन्तीत्यादि ३ । **'जोगो'**त्ति, अत्र तावच्चतुर्वर्गाग्रणीर्मोक्षस्तस्यावन्ध्यकारणं सम्यग्ज्ञानदर्शनचारित्ररूपं रत्नत्रयं योगस्तस्य च सर्वातिचारविशोधकत्वेन षड्विधावश्यकं कारणमित्युपचारात् तदपि योगः, इहैवाग्रे एतद्द्वारं विवृण्वता सूत्रकृताऽस्यैव सूचयिष्यमाणत्वाद् ४ । **'चिइवंदणमो'**त्ति, **चैत्यवन्दनं** द्रव्यभावपूजारूपम् । ओ इति निपातः पूरणार्थः ५ । **'पच्चक्खाणं०' प्रत्याख्यानं** नमस्कारसहितादि । **विधिपूर्वं-**सूत्रोक्तविधिना नमस्कारपठनादिकं सर्वमेतत्कर्तव्यम् ६ ॥२॥

**व्याख्या-'तह चे०' तथा**शब्दो विधिपूर्वकमित्यस्यानुकर्षणार्थः । **'चेइह०'** जिनभवनव्रजनविधिः ७ । **'स०' सत्कारो-** माल्यादिभिरर्चनमर्हद्बिम्बानामिति गम्यते ८ । तेषामेव प्रसिद्धचैत्यवन्दनविधिना नमस्करणम् ९ । **'गुरुस०'** ततो गुरुसमीपे प्रत्याख्यानं, स्वयं गृहादिगृहीतप्रत्याख्यानस्य गुरुसाक्षिकविधानमित्यर्थः १० । **'सवणं०'** श्रवणमागमस्येति ११ । **'जइ०' यतिपृच्छा-** साधुशरीरसुखवार्तापृच्छनम् । एवं हि विनयः प्रयुक्तो भवति १२ । **'उचिअ०'**



For Private and Personal Use Only

**उचितं**-यतेर्ग्लानाद्यवस्थासु योग्यमौषधदानोपदेशादि, **करणीयं**- विधेयमन्यथा प्राक् पृच्छाया नातिसार्थकता स्यादिति १३ । **'अवि०' अविरुद्धो**- लोकलोकोत्तरानिन्दितो **व्यवहारो**- व्यवसायः १४ । **'काले'** मध्याह्नलक्षणे **तथा**- तेन वक्ष्यमाणप्रकारेण

**जिणपूया मुणिदाणं साहम्मियपूयणा उचियदाणं । परियणसंभालणयं पच्चक्खाणस्स संभरणं ॥१॥**

इत्यादिना **भोजनम्**-अभ्यवहारः १५ । **'संवरणं०'** भोजनानन्तरं संभवद्ग्रन्थिसहितदिवसचरिमादिप्रत्याख्यानस्य ग्रहणम् १६। **'चेईय०'** चैत्यगृहे आगमस्य श्रवणमिति विग्रहः । चैत्यगृहे हि प्राय आगमव्याख्यानं भवतीति । आगमव्याख्यास्थानान्तरोपलक्षणार्थं चैत्यग्रहणम्, न तु तत्रैव यत्यवस्थानसूचकं, महाशातनाहेतुत्वात्तत्रावस्थानस्य । एतच्चाग्रे सूत्रकृदेव प्रकटयिष्यति १७ । **'सक्का०'** विकालवेलायां जिनबिम्बार्चनम् १८ । **'वंदणा०'** गुरूणां **वन्दनं**-नमस्करणम् । आदिशब्दात्सामायिकादिषड्विधावश्यककरणमनुस्वारोऽलाक्षणिक इति १९ ॥३॥

**'जइवि०' यतीनां** स्वाध्यायसंयमवैयावृत्त्यादिभिः श्रान्तानां पुष्टालम्बनेन तथाविधश्रावकादेरपि देहखेदापनोदमिच्छतां **विश्रामणम्**-अङ्गमर्दनम् २० । **'उचि०' उचितः**- स्वभूमिकायोग्यो व्यापारस्तमेवाह-नमस्कारचिन्तनादिकः । आदिशब्दाच्छेषाधीतस्वाध्यायगुणनादिपरिग्रहः २१ । **'गिहगमण०'** स्वगृहगमनमेतच्च स्वयोगसिद्धत्वेनापार्थकत्वान्निजपरिवारस्य धर्मदेशनाकरणमिति ज्ञापयति २२ । **'विहि०'** विधिना **शयनं**- स्वापस्तमेव विधिमाह- **'सरणं०'** स्मरणं धर्माचार्यजिनादीनामादिशब्दाच्चतुःशरणादिपरिग्रहः २३ । ॥५॥ **'अब्बं०'** अब्रह्मविषये **पुनः**- प्रायेणेत्यर्थः, **विरतिः**- निवृत्तिः । सा च मोहजुगुप्सातः स्यान्**मोहस्य**- मोहनीयकर्मणो **जुगुप्सा**- सद्भूतदोषोद्भावनम् । अतः सैव



For Private and Personal Use Only

कार्या २४ । **'सतत्त०' सतत्त्वचिन्ता-** स्वरूपचिन्तनं **स्त्रीकडेवराणां-** योषिदङ्गानां, चशब्दात्तदासक्तचित्तानामिह परत्र वाऽपायचिन्तनम् २५ । **'तव्विर०' तस्मात्-** स्त्रीसङ्गादे**र्विरता**-निवृत्तास्तेषु **बहुमानो**-भक्तिनिर्भरा प्रीतिरिति २६ ॥६॥

**'बाहग०' बाधका:-** पीडाकारिणो धर्मकायस्येति शेषः । **दोषा-** विषयाभिलाषादयस्तेषां **विपक्षा-** भववैराग्यादयस्तान् शुभभावान् चिन्तयेत्पश्चिमरात्रौ जाग्रदवस्थायामिति गम्यम् २७ । **'धम्म०'** तस्यामेव जाग्रदवस्थायां **धर्माचार्या-** निजगुरवः **उद्यतविहारिण:-** शुद्धचारित्रिणस्तत्पार्श्व एव दीक्षाग्रहणाद्यधिकारः । अतस्तान् सदा कदा सेविष्येऽहमिति विचिन्तयेत् २८ । **च**शब्दः समुच्चये । उपसंजिहीर्षुराह-**'एसो०'** पूर्वोक्तो दिनकृत्यस्य समुदायार्थः, **से** तस्य श्रावकस्य ऋद्धिमदऋद्धिमद्भेदभिन्नस्य समासेन ज्ञातव्य इत्यर्थः । **तु**शब्दो यतीनां दशविधचक्रवालसामाचारीवच्छ्रावकस्यैतत्प्रतिदिनं कर्तव्यमिति द्योतयतीति द्वारगाथाषट्कसमुदायार्थः । अवयवार्थं तु प्रतिद्वारं सूत्रकृद्वक्ष्यतीति ॥७॥

यथोद्देशं निर्देश इति कृत्वा **'नमः'** प्रथमद्वारव्याचिख्यासयाह-

**निसाविरामंमि विबुद्धएणं, सुसावएणं गुणसायरेणं ।**

**देवाहिदेवाण जिणुत्तमाणं, किच्चो पणामो विहिणायरेणं ॥८॥**

**व्या०-'निसा०' निशाया-** रात्रे**र्विरामे**-ऽन्त्यमुहूर्तद्वयलक्षणे विनिद्रेण सुश्रावकेण, हेतुत्वेन विशेषणमाह- **'गुण०'** गुणा अक्षुद्रत्वादयोऽन्ये च भाषाकुशलत्वादयो बहवो गुणास्तेषां प्राचुर्यात्सागर इव गुणसागरस्तेन । **'देवा०'** देवा भवनपत्यादयस्तेषामैश्वर्यादिभिरधिका इन्द्रास्तेषामपि पूज्यत्वाद् देवाधिदेवास्तेषाम् । विशेष्यमाह-**'जिणु०'** जिनाः



For Private and Personal Use Only

सामान्यकेवलिनः । तेषु चतुस्त्रिंशदतिशयादिभि**रुत्तमाः**-प्रधानाः जिनोत्तमाः-तीर्थकृतः । तेषां विधेयः प्रणामो **'विधिना'** वक्ष्यमाणलक्षणेन बहुमानेन ||८||

तमेव विधिमाह-

**सिज्जाट्ठाणं पमुत्तूणं, चिट्ठिज्जा धरणीयले ।**
**भावबंधुं जगन्नाहं, नमुक्कारं तओ पढे ||९||**

**व्या०-'सिज्जाट्ठाणं' शय्यास्थानं-** पल्यङ्कादि **प्रमुच्य तिष्ठेदू**र्ध्वं आसितो वा धरणीतले **भावबन्धुं-** सर्वत्र साहाय्यकारित्वात्परमार्थबन्धुं । **जगन्नाथम्-** अप्राप्तमहाव्रतादिगुणप्रापकत्वेन प्राप्ताणुव्रतादिगुणकलापपरिपालकत्वेन च योगक्षेमकारित्वाद् विश्वस्वामिनं **नमस्कारं ततः पठेत्**-परावर्तयेदिति ||९|| यतः-

**मंताण मंतो परमो इमुत्ति, धेयाण धेयं परमं इमुत्ति ।**
**तत्ताण तत्तं परमं पवित्तं, संसारसत्ताण दुहाहयाणं ||१०||**

**व्या०-'मंताण मंतो०' मन्त्राणां**-गरुडमन्त्रादीनां मध्ये इति शेषः, **परमः-** प्रधानो**ऽयमि**त्ययमेव, द्रव्यभावविषापहारित्वात् । तथा **ध्येयानां-** सकलनिष्कलादीनां **ध्येयं परमम**यमिति सर्वार्थसाधकत्वात् । **तत्त्वानां-** परमार्थानां **परममतिशयेन पवित्रं**-पावनं **तत्त्वम**यमेव, कर्ममलकलङ्कापनयनकारित्वात् । केषामित्याह-**संसारसत्त्वानां-** चातुर्गतिकभव्यजन्तूनां **दुःखाहतानाम्**-असाततप्तानां द्विधाहतानां वा रागद्वेषाक्रान्तानामिति ||१०|| कुतः ?-



For Private and Personal Use Only

**ताण अन्न तु नो अत्थि, जीवाणं भवसायरे ।**
**बुड्डंताणं इमं मुत्तुं, नमुक्कारं सुपोययं ॥११॥**

**व्या०-'ताणं०'** त्राणमन्यन्नास्त्येव जीवानां भवसागरे ब्रुडतामिमं मुक्त्वा नमस्कारं **सुपोतकं-** सुबोहित्थमिति ॥११॥

अमुमेवार्थं सविशेषमाह-

**अणेगजंमंतरसंचियाणं, दुहाण सारीरियमाणसाणं ।**
**कत्तो अ भव्वाण भविज्ज नासो, न जाव पत्तो नवकारमंतो ॥१२॥**

**व्या०-'अणेग०'** अनेकजन्मान्तरसंचितानां **दुःखानां-** शारीरिकमानसानां रोगशोकादीनां, कारणे कार्योपचारात् तद्धेतुकर्मणामित्यर्थः, कुतश्च भव्यानां भवेन्नाशो न यावत्प्राप्तो नमस्कारमन्त्र इति ॥१२॥

अस्यादरख्यापनम् (नार्थम्) आवश्यकभाष्येण दर्शयति, भणियं चागमे-

**जलणाइ भए सव्वं, मुत्तुं एगंपि जहा महारयणं ।**
**अहवाऽरिभए गिन्हइ, अमोहसत्थं जह तहेह ॥१३॥**
**मुत्तुंपि बारसंगं, स एव मरणंमि कीरए जम्हा ।**
**अरिहंतनमुक्कारो, तम्हा सो बारसंगत्थो ॥१४॥**



For Private and Personal Use Only

**व्या०-'जलणा०'** । **'मुत्तुंपि०'** ज्वलनादिभये सर्वं कणकर्पासादिकं मुक्त्वा एकमपि यथा महारत्नं वैडूर्यादि, अथवाऽरिभये गृह्णात्यमोघशस्त्रं शक्त्यादि, यथा कश्चित् सकर्णविज्ञानस्तथेह मुक्त्वा द्वादशाङ्गं श्रुतकेवलिनापि स एव मरणे **क्रियते**- स्मर्यते यस्मादर्हन्नमस्कारः, उपलक्षणत्वात्सिद्धादिपरिग्रहः, तस्मात्स **द्वादशाङ्गार्थो**- द्वादशाङ्गरहस्यमिति । युग्मं ॥१३-१४॥

यैरस्य प्रणयनमकारि तेषां नमस्कारार्थमाह.

**तप्पणईणं तम्हा, अणुसरियव्वो सुहेण चित्तेण ।**
**एसो व नमुक्कारो, कयन्नुयं मन्नमाणेणं ॥१५॥**

**व्या०-'तप्पणई०'** तं नमस्कारं सूत्रादिरूपतया **प्रणयन्ति**- प्रकाशयन्तीत्येवं शीलास्तत्प्रणयिनः । यद्वा प्रणयनं प्रणयः- प्रकाशनं, तस्य प्रणयस्तत्प्रणयः, स विद्यते येषां ते तत्प्रणयिनोऽर्हद्गणभृदादयस्तेषाम् । तस्माद्धेतो**रनुस्मर्तव्यो**- ध्यातव्यः शुभेन चित्तेनैष एव नमस्कारः, कृतज्ञतां कृतार्थतां वात्मनो मन्यमानेनेति ॥१५॥

उक्तार्थमुपसंहरन्नुपदेशमाह-

**नवकाराओ अन्नो, सारो मंतो न अत्थि तियलोए ।**
**तम्हा हु अणुदिणं चिय, पढियव्वो परमभत्तीए ॥१६॥**

**व्या-'नवकार०'** नमस्कारादन्यः सारो मन्त्रो नास्ति त्रैलोक्ये तस्माद्धेतोर्हुः पूरणे, अनुदिनमेवायं पठितव्यः ॥१०॥

परमभक्त्येति ॥१६॥ दृष्टान्तपुरस्सरं विधिनाऽस्य पठनोपदेशमाह-

**उरगाईण वि मंता, अविहीए उ अहिज्जिया ।**
**विसं जओ न नासंति, तम्हा उ विहिणा पढे ॥१७॥**

**व्या०-'उरगा०'** उरगादीनामपि मन्त्रा अविधिना त्वधीता विषं यतो न नाशयन्ति, तस्मात्तु **विधिना-** विनय-बहुमानादिरूपेण पठेत् । पठनं चात्राध्ययनं परावर्तनं स्मरणं च ज्ञातव्यमिति ॥१७॥ तत् सूत्रं च-'नमो अरिहंताणं । नमो सिद्धाणं । नमो आयरियाणं । नमो उवज्झायाणं । नमो लोए सव्वसाहूणं । एसो पंच नमुक्कारो, सव्वपावप्पणासणो । मंगलाणं च सव्वेसिं, पढमं हवइ मंगलं' ॥ इत्यादि प्रसिद्धं सर्वसंमतं स्वयमभ्यूह्यम् ॥

अस्य पाठे ऐहिकामुष्मिकफलप्रदर्शनायाह-

जओ- **इहलोगंमि तिदंडी, सादिव्वं माउलिंगवणमेव ।**
**परलोए चंडपिंगल, हुंडियजक्खो य दिवुंता ॥१८॥ दारं १ ॥**

**व्या०-'इहलोगंमि तिदंडी'**, इह लोके पाठकजनापेक्षयात्रैव जन्मनि । **'तिदण्डी'**ति त्रिदण्ड्युपलक्षितः श्रावकसुतो दृष्टान्तः १ । **'सादिव्वं'**ति श्रावकसुताया देवतासान्निध्यम् २ । **'माउलिंगवणमेव'**त्ति **मातुलिङ्गवनं-**बीजपूरारामं, तेन सूचितः श्रावकश्चेति ३ । एवमेते **'इहलोगंमि'** इहलोकफलप्रतिपादका दृष्टान्ताः । तथा **परलो**केऽन्यभवे चण्डपिङ्गलः हुण्डिकयक्षश्च दृष्टान्ताविति गाथासमुदायार्थः । भावार्थस्तु सर्वोदाहरणानां पुलिन्द्रमिथुनकथा- ॥११॥

नकादवसेयः ||१८|| द्वारं १ |

व्याख्यातं प्रथमद्वारमधुना **'अणुसरणं सावउ'**त्ति द्वितीयद्वारावयवार्थमभिधित्सुराह-

**कोऽहं पुणो कंमि कुलंमि जाओ, किं सम्मदिट्ठी वयनियमधारी ।**

**उयाहु हं दंसणमित्तजुत्तो, एयं तु अन्नं च विचिंतइज्जा ||१९|| दारं २ ।**

**व्या०-'कोऽहं पुणो०'** सुप्तस्य किल विस्मृतेः प्रबुद्धेन द्रव्यादिस्मरणा कार्या । तत्र द्रव्यतः कोऽहं यतिर्गृही वा । पुनःशब्दात्क्षेत्रकालपरिग्रहः । तत्र क्षेत्रत आर्यदेशाद्युत्पन्नोऽहमिति । कालतः प्रत्यूषसमये विबुद्धोऽहमिति । भावतः कस्मिन्नुग्रादिके कुले जातोऽहमिति । भावमेव विशिनष्टि-किमहं सम्यग्दृष्टिः सन् व्रतनियमधारी । **व्रतानि-**मूलगुणा **नियमा-**उत्तरगुणाः । उताहो निपातोऽथवार्थे । अथवाऽहं दर्शनमात्रयुक्तः । यतोऽस्याभावे धर्मस्य सर्वथाप्यभावः । यदागमः-

**'दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं । सिज्झंति चरणरहिया, दंसणरहिआ न सिज्झंति ||१||**

ततः **'एयं तु'**त्ति, एतत्सम्यक्त्वं पालयितव्यमेव । तथा **'अण्णं च'**त्ति, अन्यच्च सम्यक्त्वगुणस्थानाद् भिन्नं देशविरतिरूपं पञ्चमं गुणस्थानं वक्ष्यमाणस्वरूपं विचिन्तयेदिति ||१९|| द्वारं २ ||

**'वयाइं मि'**त्ति तृतीयद्वारस्य बहुभङ्गसंभवत्वं दर्शयन्नाह—



For Private and Personal Use Only

**'इक्कं व दो तिन्नि व पंच सत्त, अणुव्वयाइं नियमे वयाइं ।**
**एक्केक्कभेएण दुहा तिहेणं, पक्खं च मासं अह जावजीवं ॥२०॥ दारं ३ ॥**

**व्या०-'एक्कं व दो०' 'एकं व'**त्ति स्थूलप्राणातिपातादीनां द्वादशैकैकसंयोगानां मध्येऽन्यतमदेकं वा व्रतम् । तथा स्थूलप्राणातिपातमृषावादादिपदद्वयात्मकषट्षष्टिद्विकसंयोगेष्वन्यतमे द्वे वा व्रते । तथा स्थूलप्राणातिपातमृषावादादत्तादानादिपदत्रयविंशत्युत्तरद्विशतसंयोगेष्वन्यतमानि त्रीणि वा व्रतानि । वा शब्दाच्चतुष्कसंयोगादिपरिग्रहः । **'पंच सत्त०'** पञ्च सप्तेति पदद्वयमेवं योजनीयम्- **'अणुव्वयाइं'**ति, आद्यानि पञ्चाणुव्रतानि मूलगुणाः । **'नियमे वया०' नियमे-**उत्तरगुणविषये सप्तान्त्यव्रतानि । अत्र भङ्गकसूचनार्थमाह-**'एक्केक्क०'** एकैकभेदेन व्याख्यास्यमाणलक्षणेन षष्ठभङ्गेन, तथा द्विधा त्रिविधेनेति प्रथमभङ्गेन । अत्राद्यन्तग्रहणात्षड्भङ्ग्यपि द्रष्टव्या । सा च पञ्चाणुव्रतान्याश्रित्य लेशतो दर्श्यते-स्थूलप्राणातिपातं न करोति न कारयति मनोवाक्कायैरिति प्रथमो भङ्गः १ । न करोति न कारयति च मनोवाग्भ्यां मनःकायाभ्यां वाक्कायाभ्यां वा सामान्यतो योगद्वयमङ्गीकृत्येति द्वितीयः, एवं सर्वत्र । ननु मनो विना कथं वाक्कायसंभवः ? उच्यते-अनाभोगेन विशेषोपयोगाभावाद्वा मनसो गौणत्वादसंज्ञिवन्मुख्यवृत्त्या वाक्कायव्यापारोऽवसेयः २ । न करोति न कारयति च मनसा वाचा कायेन वेति तृतीयः ३ । न करोति न कारयति वा मनोवाक्कायैरिति चतुर्थः ४ । न करोति न कारयति वा मनोवाग्भ्यां मनःकायाभ्यां वाक्कायाभ्यां वेति पञ्चमः ५ । न करोति न कारयति वा मनसा वाचा कायेन वेति ६ । अत्र श्रावकव्रतभङ्गप्रकरणप्रकारेणानया २३, २२, २१, १३, १२, ११ षड्भङ्ग्या



For Private and Personal Use Only

 

१२ व्रतैकैके द्विकादिसंयोगैः १३ कोटिशत ८४ कोटि १२ लक्ष ८७ सहस्र २ शतसंख्यश्रावकव्रतभङ्गाः स्युः । तत्र मम किं के कानि वा सन्तीति । अथ कालप्रमाणार्थमाह **'पक्खं०'** किं मयैतानि व्रतानि पक्षं मासं वा यावत्, अथवा यावज्जीवं गृहीतान्येवमनुस्मरतीति ॥२०॥ द्वारम् ३ ॥

साम्प्रतं 'योग' इति तुर्यद्वारं, तच्च लाघवार्थं दैवसिकावश्यकावसरे सभावार्थं वक्ष्यते । अत्र तु तप एव विशिष्टनिर्जराहेतुः । यदुक्तम्-

**'सव्वासिं पयडीणं परिणामवसादुवक्कमो भणिओ । पायमनिकाइयाणं तवसा उ निकाइयाणंपि ॥१॥'**

इत्यतः षाण्मासिकतपःकायोत्सर्गे तद्विषयचिन्तनार्थं सूत्रद्वयमाह-

**छण्हं तिहीण मज्झंमि, का तिही अज्ज वासरे ।**
**किं वा कल्लाणगं अज्ज, लोगनाहाण संतियं ॥२१॥**

**व्या०-'छण्हं'**ति मासाभ्यन्तर इति गम्यते । षण्णां तिथीनां सितेतराष्टमीचतुर्दशीपूर्णिमामावास्यालक्षणानां मध्ये का तिथिरद्य वासरे किं वाद्य कल्याणकम् इह भरतेऽत्रावसर्पिण्याम् । च्यवनजन्मादिभिरुपलक्षिता तिथिः कल्याणकम् । केषां ? लोकनाथानां **सत्कं-** सम्बन्धीति ॥२१॥

**पच्चक्खाणं तु जं तंमि, दिणंमि गिण्हियव्वयं ।**
**चिंतेऊणं सुसड्ढो उ, कुणइ अन्नं तओ इमं ॥२२॥ दारं ४ ॥**



For Private and Personal Use Only

**व्या०-'पच्चक्खाणं०'** प्रत्याख्यानं तु यदुपवासादि तस्मिन्नष्टम्यादिदिने ग्रहीतव्यम् तच्चिन्तयित्वा सुश्राद्ध-स्तुशब्दात्तथैव कृत्वा, **तत-** आवश्यकानन्तरं करोत्यन्यद् **इदं-** वक्ष्यमाणमिति ।।२२।। द्वारम् ४ ।।

पञ्चमं चैत्यवन्दनद्वारमाह-

**तसाइजीवरहीए, भूमीभागे विसुद्धए ।**
**फासुएणं तु नीरेणं, इयरेण गलिएण उ ।।२३।।**
**काऊणं विहिणा ण्हाणं, सेयवत्थनियंसणो ।**
**मुहकोसं तु काऊणं, गिहबिंबाणि पमज्जए ।।२४।।**

**व्या०-'तसाइ०'** । **काऊणं०'** **त्रसादिजीवरहिते-** उत्तिंगपनकादिजन्तुभिरसंसक्ते भूमिभागे **विशुद्धके-** विष-मशुषिरादिदोषैरदूषिते, प्रासुकेन तु नीरेण, तदभावे **इतरेण-** सचित्तेनापि गलितेनैव कृत्वा, **विधिना-** परिमितोदकस-म्पातिमसत्त्वरक्षणादियतनया स्नानम् । **श्वेतवस्त्रनिवसनः-** संवीतशुचिसितांशुकयुगलः । **मुखकोशं त्व**ष्टपुटपटप्रान्ते-नास्यनासिकाश्वासनिरोधं कृत्वैव गृहबिम्बानि प्रमार्ष्टि, लोमहस्तकेनेति शेषः । अत्र च यद्यपि षट्कायोपमर्दादिका काचिद्विराधना स्यात्तथापि कूपोदाहरणेन श्रावकस्य द्रव्यस्तवः कर्तुमुचितः ।। २३-२४ ।। पूजाविधिमाह-

**गंधोदएण न्हावित्ता, जिणे तेलोक्कबंधवे ।**
**गोसीसचंदणाईहिं, विलिंपित्ता य पूयए ।।२५।।**



For Private and Personal Use Only

**पुप्फेहिं गंधेहिं सुगंधिएहिं, धूवेहिं दीवेहि य अक्खएहिं ।**
**नाणाफलेहिं च घएहिं निच्चं, पाणीयपुन्नेहिं य भायणेहिं ॥२६॥**

**व्या०-'गंधोदएण०' 'पुप्फेहिं०' गन्धोदकेन-** घ्राणतर्पणघुसृणाद्युन्मिश्रोदकेन स्नपयित्वा जिनान् त्रैलोक्यबान्धवान् गोशीर्षचन्दनादिभिरादिशब्दात्कर्पूराद्यैर्विलिप्य च पूजयेत् । कैरित्याह-**पुप्फेही**त्यादि, **पुष्पै-** प्रत्यग्रकुसुमै-**र्गन्धै**र्वासै**र्धूपैः** कृष्णागुर्वाद्यैः । किं विशिष्टैः पुष्पाद्यैः ? **सुगन्धिभिः-** सद्गन्धबन्धुरैः । तथा **दीपैश्च** प्रदीपै**रक्षतैः** शाल्यादितन्दुलै**र्नानाफलैश्च** बीजपूराद्यैर्घृतैरित्यस्योपलक्षणत्वात् सर्वनैवेद्यै**र्नित्यं-** प्रत्यहं **पानीयपूर्णैश्च भाजनै**र्निर्मलोदकभृतशङ्खादिपात्रैरिति सूत्रद्वयार्थः ॥ २५-२६ ॥ पूजाफलमाह-

**जओ पूयापभावेणं, सुव्वए जिणसासणे ।**
**देवत्तं नरनाहत्तं, तित्थनाहत्तणं तहा ॥२७॥**

**व्या०-'जओ पूया प०' यतो-** यस्माद्धेतोः पूजाप्रभावेण श्रूयते जिनशासने, फलमिति गम्यते । किं तदित्याह-देवत्वं नरनाथत्वं तीर्थनाथत्वं चेति ॥२७॥ यथायोगं देवत्वादिषु दृष्टान्तानाह-

**थेरी कुरुनरिंदो य, सुव्वओ जिणसेहरो ।**
**सच्चई वासदेवो य, नारओ य महायसो ॥२८॥**



For Private and Personal Use Only

**व्या०-'थेरी०'** स्थविरा कुरुनरेन्द्रश्च सुव्रतो जिनशेखरः सत्यकिर्वासुदेवश्च नारदश्च महायशाः इत्यक्षरार्थः, भावार्थस्तु कथानकेभ्योऽवसेयस्तत्र देवत्वे स्थविरोदाहरणं, यथा-

``काकन्द्यां दरिद्रिणी काचित् स्थविरा प्रातर्नद्यां धौतपादाद्यङ्गी गृहीतवानेयपुष्पा भोजनार्थं शिरस्थकाष्ठभारा श्रीवीरस्य पूजनैकमानसा समवसरणप्रतोल्यां स्खलिता मृता, जितारि राज्ञा पृष्ट्यागतेन कारितदेहाग्निसंस्कारा, क्व इयं गतेति राज्ञा पृष्टे, प्राप्तसौधर्मकल्पोऽत्रैव धर्मं श्रोतुमागतोऽयम् । महाविदेहे कनकपुरेशः कनकध्वजोऽहिना भेकं, तं कुररेण, तं च अजगरेण गिल्यमानं निरीक्ष्योपनये नियोगिभिर्जनः, ते भूपैः, ते च मृत्युनोपद्रूयमाणाः, इति विमृश्य प्रव्रज्य मुक्तिं गमिष्यतीत्यवादीद्वीरः । पूजाविषये कुरुचन्द्रकथा, सा चाप्रतीतत्वान्न तन्यते । इदानीमष्टप्रकारपूजायां सुव्रतोपलक्षिताष्टवणिग्कथा । सा चैवम्-`महाविदेहे पुण्डरीकिण्यां कृतनाट्यविधिस्वभव्याभव्यत्वपृच्छादीन्रष्टौ देवानद्भुतरूपान् वीक्ष्य वरसेनचक्रिणा पृष्टे जिनः प्राह-अमी प्राग् धातकीखण्डे भरते महालयपुरे रुक्मिणीपुत्राः सुव्रतान्ताः २५ पूर्वलक्षान् यावदष्टप्रकारजिनार्चां कृत्वा ७ शुक्रे प्राप्तदेवत्वाः अत्रैव विजये नृपत्वं प्राप्य मुक्तिं यास्यन्ति इति । ईश्वरतया ख्यातः सत्यकिः आगाम्युत्सर्पिण्यां जिनार्चया कृतया सुव्रतनामैकादशोऽर्हन्निति तस्य कथा । तथा वासुदेवो नवमः कृष्णनामा श्रीनेमिनाथपूजनवन्दनतो द्वादशोऽर्हन्नममनामधेयो भवितेति तच्चरित्रम् । नारदविद्याधरस्तु शाश्वताशाश्वतचैत्योपासनत एकविंशतितमो मल्लनामा तीर्थकरो भविष्यतीति ॥२८॥



For Private and Personal Use Only

अथ द्रव्यपूजानिगमनभावपूजां प्रस्तावयन्नाह-

**अडप्पयारपूयाए, पूइत्ता जगबंधवे ।**
**मुद्दाविहाणजुत्तेणं, कायव्वं जिणवंदणं ॥२९॥**

**व्या०-'अडप्प०'** अष्टप्रकारपूजया पूजयित्वा जगद्बान्धवान् **मुद्राविधानयुक्तेन**-यथास्थानसत्यापितभाष्योक्तमुद्राविधिसमन्वितेन कर्तव्यं **जिनवन्दनमि**ति चैत्यवन्दना । सा च त्रेधा-

**'नवकारेण जहन्ना, दंडगथुइजुगलमज्झिमा नेया । संपुन्ना उक्कोसा विहिणा खलु वंदणा तिविहा ॥१॥'**

**'दंडगथुइजुगल'**त्ति चैत्यस्तवदण्डकैकस्तुतिप्रदानयुगलरूपेति । अत्र च सम्प्रदायादुत्कृष्टचैत्यवन्दना ईर्यापथिकीप्रतिक्रमणपुरस्सरं विधेयेत्यतः सैवादौ व्याख्येया । कायोत्सर्गे च चंदेसु निम्मलयरेत्यन्तश्चतुर्विंशतिस्तवश्चिन्त्यः । पारिते च समस्तोऽपि भणितव्यः । एवमीर्यापथिकीं प्रतिक्रम्य महावृत्तानर्थयुक्तानपुनरुक्तान्नमस्कारान् भणतीति ॥२९॥

साम्प्रतं प्रथमदण्डकभणनविधिं श्लोकद्वयेनाह-

**पंचंगनमणपुव्वं तु, मुद्धाणं धरणियले ।**
**तिन्नि वारे नियंसित्ता, वामं जाणुं च अंचिया ॥३०॥**

**काउण वत्थदेसेण, तओ वयणढंक्कणं ।**
**जोगमुद्दाइ भत्तीए, समं सक्कत्थयं भणे ||३१||**

**व्या०-'पंचंगनमणं०' 'काउण०'** नमस्कारपाठानन्तरं जानुद्वयकरद्वयशिरोलक्षणपञ्चाङ्गनमनपूर्वं, तुशब्दात्प्रतिलिख्य प्रमृज्य च भुवं, मूर्द्धानं धरणितले त्रीन् वारा**न्निवेश्य**-संस्थाप्य वामं जानुं **चाश्चित्वा-** किंचिदुन्नम्य, ततश्च वस्त्रदेशेन वदनपिधानं कृत्वा योगमुद्रया भक्त्या-

**धन्नोहं जेण मए अणोरपारंमि भवसमुद्दंमि । बुड्डंतेण जिणिंदो जं पत्तो जाणवत्तं व ||१||**

इत्यादिरूपया आनन्दाश्रुपूर्णलोचनः **सम्यगि**त्यस्खलितादिविधिना **शक्रस्तवं-** प्रणिपातदण्डकं भणेदिति गाथाद्वयार्थः । नमुत्थुणमित्यादिरूपः स च दण्डकः ||३०-३१||

तत उत्थाय स्थापनार्हद्वन्दनार्थं जिनमुद्रया चैत्यस्तवदण्डकं विधिवद्भणतीत्येतदेवाह-

**विसिट्ठवन्ननासेणं, भाविंतो य पयं पयं ।**
**जिणनाहस्स बिंबंमि, दिन्नदिट्ठी सुहासओ ||३२||**

**व्या०-'विसिट्ठ०' विशिष्टवर्णन्यासेन**-व्यक्ताक्षरपदसम्पत्सत्यापनेन तथा **भावयंश्च पदं पदम**भ्युपगमाद्युपयोगपरः प्रतिपदमर्थं चिन्तयन् । तथा **जिननाथस्य बिम्बे दत्तदृष्टिस्त्रि**दिग्निरीक्षणनिषेधेनाधिकृतजिनबिम्ब एव न्यस्तदृक् । तथा **शुभाशयो,** निदानाद्यदूषितचित्तः । एवंविधगुणश्चैत्यस्तवनं पठतीति प्रक्रमाल्लभ्यते ||३२|| द्वितीयो दण्डकः । ||१९||

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साम्प्रतं कायोत्सर्गस्य दोषवर्जनं तस्मिन् चिन्तनं च सूत्रकृदेवाह-

**घोडगलयमाईए, दोसे उस्सग्गसंतिए ।**
**काउस्सग्गे ठिओ वज्जे, नमुक्कारं विचिंतए ॥३३॥**
**घोडग लया य खंभे कुड्डे, माले य सबरि वहु निअले ।**
**लंबुत्तर थण उद्धी संजइ, खलिणा य वायसकविट्ठे ॥३४॥**
**सीसोकंपिय मूई, अंगुलि भमुहा य वारुणी पेहा ।**
**एए गुणविस दोसा, काउस्सग्गस्स वज्जिज्जा ॥३५॥**

(नाही करयल कुप्पर उस्सारिय पारियंमि थुई) पाठन्तरम् । दारं ५ ॥

**व्या०-'घोडगलय०'** अश्ववद्विषमपादः १ । वाताहतलतावत्कम्पमानः २ । स्तम्भे कुड्ये वाऽवष्टभ्य ३ । माले वोत्तमाङ्गं निधाय ४ । अवसनशबरीवद्गुह्याग्रे करौ कृत्वा ५ । वधूवदवनतोत्तमाङ्गः ६ । निगडितवच्चरणौ विस्तार्य मेलयित्वा वा ७ । नाभेरुपरि जानुनोरधश्च प्रलम्बमाननिवसनः ८ । दंशादिरक्षार्थमज्ञानाद्वा हृदयं प्रच्छाद्य ९ । शकटोद्धिवदङ्गुष्ठौ पार्ष्णी वा मेलयित्वा १० । संयतीवत्प्रावृत्य ११ । कविकवद्रजोहरणमग्रतः कृत्वा १२ । वायसवच्चक्षुर्गोलकौ भ्रमयन् १३ । कपित्थवत्परिधानं पिण्डयित्वा १४ । यक्षाविष्ट इव शिरः कम्पयन् १५ । मूकवद् हूं हूं



For Private and Personal Use Only

कुर्वन् १६ । आलापकगणनार्थमङ्गुली भ्रुवौ वा चालयन् १७ । **वारुणी**-सुरा, तद्वत् बुडबुडयन् १८ । अनुप्रेक्षमाणो वानर इवौष्ठपुटं चालयन् १९ । कायोत्सर्गं करोतीत्येकोनविंशतिदोषाः । प्रायः सूत्रे सर्वमप्यनुष्ठानं साधुमुद्दिश्योक्त-मतस्तद्विशेषमाह-'**नाहि**'त्ति नाभेरधश्चत्वार्यङ्गुलानि चोलपट्टः । '**करयल**'त्ति दक्षिणेतरपाणिभ्यां मुखवस्त्रिका रजो-हरणं च, कूर्पराभ्यां चोलपट्टश्च धरणीयः । **उस्सारिते**- पूरिते कायोत्सर्गे नमस्कारेण पारिते वन्द्यमानजिनस्तुतिर्भण-नीया । इति गाथाद्वयार्थः ॥३४-३५॥

ततः स्तुतिदानानन्तरमस्यामेवावसर्पिण्यां ये भारतवर्षे तीर्थकृतोऽभूवंस्तेषामासन्नोपकारित्वेन नामोत्कीर्तनाय चतुर्विंशतिस्तवादिसूत्राणि जयवीयरायान्तानि ।

अथ पञ्चमद्वारमुपसंहरन् षष्ठं प्रत्याख्यानद्वारमाह-

**वंदित्ता थुइथुत्तेहिं, गिहबिंबाणि सावओ ।**
**पच्चक्खाणं तओ गिण्हे, अप्पणो देवसक्खियं ॥३६॥ दारं ६ ।**

**व्या०-'वंदित्ता०'** वन्दित्वा स्तुतिस्तोत्रैर्गृहबिम्बानि श्रावकः प्रत्याख्यानं ततो गृह्णीयादात्मना देवसाक्षिक-मिति ॥३६॥

इति 'नवकारेण विबोहो' इत्यादि द्वारषट्कवर्णनं जातम् । साम्प्रतं सप्तमं चैत्यगृहगमनद्वारम् । तत्र तावत् तद्विधिं सूत्रद्वयेनाह- ॥२१॥

**तओ य हयगयाईहिं, जाणेहिं य रहेहि य ।**

**बंधुमित्तपरिक्खित्तो, घित्तुं पूयं स उत्तमं ॥३७॥**

**व्या०-'तओ य०' ततो-** गृहचैत्यार्चानन्तरं अश्वहस्त्याद्यैरादिशब्दात् पत्तिभि**र्यानैश्च**-शिबिकाद्यैः । **रथैः-** कर्णरथाद्यैः । सदा संयुक्त इति शेषः । **बन्धुमित्रपरिक्षिप्तः-** स्वजनसुहृत्परिवृतः । गृहीत्वा पूजाहेतुपुष्पादिद्रव्यम् । **स** ऋद्धिमान् श्राद्धः **उत्तमं-** वरम् ॥३७॥

**अन्नेसिं भव्वसत्ताणं, दायंतो मग्गमुत्तमं ।**

**वच्चए जिणगेहंमि, पभाविंतो य सासणं ॥३८॥**

**व्या०-'अन्नेसिं०'** अन्येषां भव्यसत्त्वानां दर्शयन्**मार्गं-** मोक्षपथमुत्तमम् । यतः-

**'कार्ये शुभेऽशुभे वापि प्रवृत्तिर्यैः कृतादितः । ज्ञेयास्ते तस्य कर्तारः पश्चादप्युपचारतः ॥१॥**

**'वच्चए०'** इति, व्रजति जिनगृहे प्रभावयंश्च शासनमिति ॥३८॥ प्रभावनामेव सूत्रषट्केन भावयति-

**अहो धन्नो उ एसो उ, अहो एयस्स जीवियं ।**

**अहो माणुस्सयं जम्मं, अहो एयस्स सुलद्धयं ॥३९॥**

**व्या०-'अहो०' अहो** इति प्रशंसागर्भविस्मयद्योतको निपातः । **धन्यः-** पुण्यात्मा । **तु**र्निश्चये । एष एव । अहो एतस्यैव धर्मकीर्त्योर्भाजनेन जीवितं, गण्यमिति शेषः । अहो मानुष्यकं च जन्मैतस्यैव सुलब्धकं स्वपरोपकारकर्तृ-

त्वात् ||३९||

**अहो भत्ती अहो राओ, अहो एयस्स आयरो ।**

**तिलोगनाहपूयाए, पुन्नवंतस्स पइदिणं ||४०||**

**व्या०**-अहो **भक्तिः**- शिरोनमनादिका बाह्या प्रतिपत्तिः । अहो **रागो**- रोमोद्गमनादिगम्यान्तरा प्रीतिः । अहो **एतस्यादरो**- देहशुद्ध्यादितत्परता त्रैलोक्यनाथपूजायां पुण्यवतः प्रतिदिनमिति ||४०||

**धन्ना एयस्स रिद्धिओ, धन्नो वायं परिस्समो ।**

**धन्नो य परियणो सयलो, जो एयमणुवत्तइ ||४१||**

**व्या०**-'**धन्ना एय०**' धन्या एतस्य ऋद्धयो दानभोगोपयोगित्वात् । धन्यो वायं परिश्रमः । वाऽप्यर्थे । **अयं**- प्रत्यक्षोपलभ्यमानः प्रत्यहं चैत्यगमनादिप्रयासोऽपि प्रेत्य सुखहेतुत्वात् । **धन्यः**- श्लाध्यतमः । यतः-

'**इहलोयंमि कज्जे सव्वारंभेण जह जणो तणइ । तह जइ लक्खंसेणवि परलोए ता सुही होइ ||१||**'

धन्यश्च परिजनः सर्वः य एन**मनुवर्तते**- सेवते । यतः विशिष्टजनसंसर्गोऽपि श्रेयस्कृत्, तथा चार्षम्-

'**सुंदरजणसंसग्गी सीलदरिद्दंपि कुणइ सीलड्ढं । जह मेरुगिरिलग्गं तणंपि कणगत्तणमुवेइ ||१|| ४१||**

**अहो एयस्स इत्थेव, जंमे चेव पसन्नओ ।**

**भयवं अरिहंतुत्ति, सव्वसुक्खाण दायगो ||४२||**



For Private and Personal Use Only

**व्या०-'अहो ए०'** अहो एतस्यात्रापि जन्मनि, एवोऽप्यर्थे, चैवो पूरणे, प्रसन्नको भगवान्नर्हन्नित्येवं **सर्वसौख्यानां**-नरस्वर्गापवर्गशर्मणां दायक इति ॥४२॥

**अन्नहा एरिसी रिद्धी, कहमेयस्स उत्तमा ।**
**रयणायरसेवाए हवंति, रयणवंतया ॥४३॥**

**व्या०-'अन्नहा०' अन्यथे**ति अर्हत्प्रसत्तिं विना ईदृग् ऋद्धिः कथमेत**स्योत्तमा-** त्यागादिगुणयुक्तत्वेन पुण्यानुबन्धिपुण्यहेतुत्वात् प्रधाना, सम्पन्नेति शेषः । मुख्यमर्थमन्वयेन समर्थयन्नाह- रत्नाकरसेवया भवन्ति रत्नवन्त इति ॥४३॥

**एएण पुन्नवतेणं, अन्नजम्मंमि वाविओ ।**
**पुन्नरुक्खो महाकाओ, सो इन्हिं फलिओ इमो ॥४४॥**

**व्या०-'एएण०'** एतेन पुण्यवताऽन्यजन्मन्युप्तः पुण्यवृक्षो महाकायः, स इदानीं फलितो**ऽयमि**ति प्रत्यक्षोपलभ्यमानः सुखसम्पत्तिफलभारेणेति सूत्रषट्कार्थः ॥ प्रभावनाफलमाह-

**एवं पसंसं पकुणंतयाणं, अणेगसत्ताण दुहाहयाणं ।**
**संमत्तरुक्खस्स महाफलस्स, तेसिं तु सो चेव य कारणं तु ॥४५॥**

**व्या०-'एवं पसंसं' एव**मुक्तप्रकारेण **तेषां** प्रशंसां प्रकुर्वतामनेकसत्त्वानां **दुःखाहतानां-** दौर्गत्याद्यसाततप्तानां सम्यक्त्ववृक्षस्य **महत्**-सर्वातिशायि मोक्षाख्यं फलं यस्यासौ महाफलः । यदुक्तम्-



For Private and Personal Use Only

 

**'तेलुक्कस्स पहुत्तं लद्धूणवि परिवडंति कालेणं । सम्मत्तं पुण लद्धुं अक्खयसुखं लहइ मुक्खं ॥१॥'** तस्य लाभे इति शेषः । **तेषां तु-** प्रशंसाकारिणां **स एव-** प्रभावकः **कारणं**-निमित्तम् । चतुशब्दाः पूरणे ॥४५॥

एतदेव सदृष्टान्तमाह-

**जत्तियगुणपडिवत्ती, सव्वन्नूमयंमि अविचला होइ ।**
**सच्चिय बीयं जायइ, बोहीए तेणनाएणं ॥४६॥**

**व्या०-'जत्तियगुण०' यावती**-यावन्मात्रा, **गुणाः** क्षान्त्यादयस्**तत्प्रतिपत्ति**रनुमत्यादिना स्वीकृतिः सर्वज्ञमते अविचला भवति, सैव बीजं जायते **बोधे**र्जिनधर्मप्राप्तेः स्तेनस्य **ज्ञातेन**- दृष्टान्तेन । स चैवम्-

कौशाम्ब्यां धनयक्षश्रेष्ठिनः क्रमाद्धर्मपालवस्तुपालौ, जने सम्यक् रुचित्वेनैकमनस्कतया ख्यातौ श्रीवीरसमवसरणे गतौ । तत्र धर्मपालो धर्मं श्रद्धत्ते नेतरः । अन्योन्यं विसंवादे जाते द्वितीये दिवसे श्रीवीरपार्श्वे पृष्टं धर्मपालेन, प्रत्युत्तरितं श्रीवीरेण । प्राक् भवे शालिग्रामे कुटुम्बिद्रङ्गिकस्य सुतौ निर्धनत्वादसम्प्राप्तभोगाङ्गौ युवां चौर्यं कृत्वा दण्डपाशिकत्रासितौ नश्यन्तौ महारण्ये तापनापरं मुनिं वीक्ष्यैको गुणप्रशंसां कुर्वन् बोधिबीजं प्राप नेतरः । तेनाधुनैवं विभाग इत्यर्थमवादीद्वीरः ॥४६॥

अथ दृष्टान्तद्वारेण प्रभावनायाः सर्वोत्तमं फलमाह- 

For Private and Personal Use Only

**अलद्धपुव्वं तु भवोयहिंमि, लहंति तित्थस्स पभावणाए ।**
**तित्थेसरत्तं अमरिंदपुज्जं, दसारसीहो इव सेणिओ वा ॥४७॥**

**व्या०-'अलद्ध०'** अलब्धपूर्वमेव भवोदधौ लभन्ते, जीवा इति शेषः । तीर्थस्य प्रभावनया तीर्थेश्वरत्वममरेन्द्र-पूज्यम् । काविव ? **दशार्हाः-** समस्तयदुवंशपूज्याः समुद्रविजयाद्या दश भ्रातरस्तेषां कुले शौर्याद्यतिशयेन सिंहः । कृष्णस्य तीर्थकरत्वहेतुथावच्चपुत्रप्रव्रज्याप्रभावनावक्तव्यतायां नेमिचरित्राऽवतारोऽपि स्यात् । श्रेणिकचरित्रं तु श्रीवीर-नमस्करणे प्रभावनायां सुज्ञातमेव ॥४७॥

चैत्यगमनद्वारमुपसंजिहीर्षुराह-

**'एवंविहाहिं वग्गूहिं, थुव्वंतो य पइदिणं ।**
**वच्चए जिणगेहंमि, जाव जिणबलाणयं ॥४८॥ दारं ७ ॥**

**व्या०-'एवंविहा०'** अहो धन्नो इत्यादि वाग्भिः स्तूयमानश्च प्रतिदिनं व्रजति जिनगेहे यावज्जिनबलानक-मिति ॥४८॥ द्वारम् ७ ॥ अष्टमं सत्कारद्वारं । तत्र च जिनगृहप्रवेशे पञ्चविधाभिगममभिधित्सुः सूत्रद्वयमाह-

**'पुप्फतंबोलमाईणि, सचित्ताणि विवज्जए ।**
**छत्तवाहणमाईणि, अचित्ताणि तहेव य ॥४९॥**

**व्या०-पुष्फतंबोल०** 'पुष्पतम्बोलादीनि, आदिशब्दात् सिद्धार्थकदूर्वादीनि सचित्तानि, तथाऽचित्तानि छत्रवाहनादीन्यादिशब्दात् खड्गकिरीटचामरपादुकादीनि च विवर्जयेत् । चशब्दाच्छेषाभरणाद्यमोचनमुत्तरासङ्गं मनसः एकाग्रतां च विधत्ते ॥४९॥

**काऊणं उत्तिमंगंमि, अंजलिं भत्तिसंजुओ ।**
**भणई दिट्ठे जिणिंदंमि, नमो भुवणबंधुणो ॥५०॥**

**व्या०-'काऊणं०'** कृत्वो**त्तमाङ्गे**-शिरस्य**ञ्जलिं**- मुकुलितकरयुगलरूपं भक्तिसंयुतो भणति दृष्टे जिनेन्द्रे 'नमो भुवनबन्धवे' इति ॥५०॥ अथ प्रवेशविधिमाह-

**निस्सीहियं च काऊणं, अग्गे मज्झे तहेव य ।**
**बंधुमित्ताइसंजुत्तो, करे तिन्नि पयाहिणा ॥५१॥**

**व्या०-'निसीहि०'** नैषेधिकीमेकां च कृत्**वाग्रे**- चैत्याग्रद्वारे, द्वितीयां **मध्ये**- जिनभवनस्यान्तः प्रदक्षिणाकरणकाले, तृतीयां तु गर्भगृहप्रवेशावसरे वक्ष्यति । यद्वैका नैषेधिकी गृहव्यापारनिषेधरूपा चैत्याद्यद्वारे, द्वितीया चैत्यव्यापारनिषेधरूपा गर्भगृहप्रवेशे, तृतीया **'तथैव चे'**ति वचनात् द्रव्यपूजानिषेधरूपा चैत्यवन्दनावसरे ज्ञेया । ततो बन्धुमित्रादिसंयुक्तः कुर्यात् तिस्रः प्रदक्षिणाः । नैषेधिकीप्रदक्षिणात्रिकग्रहणाद् दशापि त्रिकाण्यत्र द्रष्टव्यानि ॥५१॥

प्रदक्षिणां नैषेधिकीं च भावयन् सूत्रपञ्चकमाह-



For Private and Personal Use Only

**मणगुत्तो वयगुत्तो, कायगुत्तो जिइंदिओ ।**
**इरियाए उवउत्तो, वक्खेमाणं विवज्जए ॥५२॥**

**व्या०-'मणगुत्तो०'** मनोगुप्तो वचोगुप्तः कायगुप्तश्च । अत्र हेतुमाह-**जितेन्द्रियः-** सुसंवृतकरणः ईर्यायामुपयुक्तः । कथमित्याह-**'वक्खे०' व्याक्षिप्तत्वं-** गीतादिव्यग्रत्वं, तद्विवर्जयेत् ॥५२॥

**मुत्तूण जं किंचिवि देवकज्जं, नो अन्नमत्थं तु विचिंतइज्जा ।**
**इत्थीकहं भत्तकहं विवज्जे, देसस्स रन्नो न कहं कहिज्जा ॥५३॥**

**व्या०-'मुत्तूण०'** मुक्त्वा यत् किञ्चित् देवकार्यं नान्यमर्थं तु विचिन्तयेत् । स्त्रीकथां भक्तकथां च विवर्जयेत् । देशस्य राज्ञश्च न कथां कथयेत् ॥५३॥ भणितञ्च-

**मंमाणुवेहिं न वइज्ज वक्कं, न जम्मकम्माणुगयं विरुद्धं ।**
**नालीयपेसुन्नसुकक्कसं वा, थोवं हिअं धम्मपरं लविज्जा ॥५४॥**

**व्या०-'मंमाणु०' मर्मानुवेधि-** परस्यागम्यगमनप्रकाशनादि न वदेद्वाक्यं । न **जन्मकर्मानुगतं,** तत्रोपपतिपित्रादिभिर्दूषितं जन्म, कर्म तु परप्रेष्यतादि, ताभ्यामनुगतं तत्संयुक्तं । **विरुद्धं-** चौरोऽयमित्यादिकं । **अलीकं-** स्वस्यान्यस्य वा निःस्वादेरनिःस्वादि भणनम् । **पैशून्य**मसद्दोषारोपणम्, सुकर्कशं वा अरे दुरात्मन्नित्यादिकं । तर्हि कीदृग् वदेदित्याह-**स्तोकं-** मिताक्षरं, **हितं-** मधुरोक्त्या श्रोतुराह्लादकम् । **धर्मपरं-** पापान्निवर्तकं ब्रूयात् ॥५४॥



For Private and Personal Use Only

**जो होइ निसिद्धप्पा, निसीहिया तस्स भावओ होइ ।**
**अनिसिद्धस्स निसीहिय, केवलमित्तं भवइ सद्दो ॥५५॥**

**व्या०-'जो होइ०' यो भवति निषिद्धात्मा-** मनोवाक्कायैः कुव्यापारान्निषिद्ध आत्मा येन स तथा, नैषेधिकी तस्य **भावतः-** परमार्थतो भवति । अनिषिद्धस्य नैषेधिकी शब्दमात्रं केवलं भवति । पदव्यत्ययश्छान्दसत्वात् ॥५६॥

**मिहोकहा उ सव्वा उ, जो वज्जेइ जिणालए ।**
**तस्स निसीहिया होइ, इइ केवलिभासियं ॥५६॥**

**व्या०-'मिहो कहा०'** मिथःकथा मैथुनसम्बद्धाः कथाः, उपलक्षणत्वात् प्रागुक्तसर्वविकथाश्च, विवर्जयति जिनालये तस्य नैषेधिकी भवतीति केवलिभाषितमिति षट् सूत्रार्थः । ॥५६॥ गर्भगृहप्रवेशविधिमाह-

**पुणो निसीहियं काउं, पविसई जिणमंदिरे ।**
**पुव्वुत्तेण विहाणेण, कुणइ पूयं तओ विऊ ॥५७॥**

**व्या०-'पुणो निसीहि०'** पुनर्नैषेधिकीं कृत्वा प्रविशति जिनमन्दिरे, गर्भगृहे इत्यर्थः, **पूर्वोक्तविधानेन-** मुखकोशादिकरणरूपेण करोति पूजां ततो विद्वानिति ॥५७॥ किञ्च-

**कायकंडूयणं वज्जे, तहा खेलविगिंचणं ।**
**थुइथुत्तभणनं चेव, पूयंतो जगबंधुणो ॥५८॥**



For Private and Personal Use Only

**व्या०-'कायकं०'** कायकण्डूयनं वर्जयेत्, खेलविवेचनं स्तुतिस्तोत्रभणनं चैव पूजयन् जगद्बन्धूनिति ॥५८॥

स्नात्रविधिमाह-

**घुसिणकप्पूरमीसं तु, काउं गंधोदगं वरं ।**
**तओ भुवणनाहे उ, न्हवेइ भत्तिसंजुओ ॥५९॥**

**व्या०-'घुसिणक०' घुसृणं-** चन्दनं **कर्पूरं-** घनसारस्ताभ्यां मिश्रं, **तु**शब्दात् सर्वौषधिचन्दनादिपरिग्रहः । कृत्वा गन्धोदकं वरम् । ततो भुवननाथांस्तु स्नपयति भक्तिसंयुतः ॥५९॥

सूत्रकृदेव ग्रन्थान्तरेणैनमर्थं वक्ष्यमाणं च संवादयन्नाह- अन्यत्राप्युक्तम्-

**गंधोदएण न्हवणं, विलेवणं पवरपुप्फमाईहिं ।**
**कुज्जा पूयं फलेहिं, वत्थेहिं आभरणमाईहिं ॥६०॥**

**व्या०-'गंधोदए०'** गन्धोदकेन स्नपनं, विलेपनं च कुङ्कुमाद्यैरिति शेषः, प्रवरपुष्पादिभिः, आदिशब्दात् केतकीवालकाद्यैश्च कुर्यात् पूजां फलैः । वस्त्रैराभरणादिभिरादिशब्दादुल्लोचाद्यैश्चेति ॥६०॥

एनमेवार्थं किञ्चित् प्रपञ्चयन् सूत्रनवकमाह-

**सुकुमालेण वत्थेणं, सुगंधेणं तहेव य ।**
**गायाइं विगयमोहाणं, जिणाणमणुलुहए ॥६१॥**



For Private and Personal Use Only

**व्या०-'सुकुमालेण०'** सुकुमारेण वस्त्रेण सुगन्धिना तथैव गात्राणि विगतमोहानां जिनानाम् **'अनु'** इति स्नानादनन्तरं **रूक्षयेत्**-निस्नेहयेत् ॥६१॥

**कप्पूरमीसियं काउं, कुंकुमं चंदणं तहा ।**
**तओ य जिणबिंबाणी, भावेण मणुलिंपए ॥६२॥**

**व्या०-'कप्पूर०'** कर्पूरमिश्रितं कृत्वा कुङ्कुमं चन्दनं तथा । ततश्च जिनबिम्बानि **भावेन-** परमभक्त्याऽनुलिम्पते ॥६२॥

**वन्नगंधोवमेहिं च, पुप्फेहिं पवरेहि य ।**
**नाणापयारबंधेहिं, कुज्जा पूयं वियक्खणो ॥६३॥**

**व्या०-'वन्नगं०'** सद्वर्णसद्गन्धद्रव्यमध्येऽतिशायिगुणयोगाद्वर्णगन्धाभ्याम् **उपमा-**औपम्यं येषां तानि वर्णगन्धोपमानि, तैश्च पुष्पैः प्रवरै**र्नानाप्रकारबन्धैः-** प्रोतग्रथितादिभेदैः कुर्यात् पूजां **विचक्षणो-** नानापूजारचनाचतुरः ॥६३॥

**वत्थगंधेहिं पवरेहिं, हिययाणंददायए ।**
**जिणे भुवणमहिए, पूयए भत्तिसंजुओ ॥६४॥**

**व्या०-'वत्थगंधे०' वस्त्रैः** चीनांशुकाद्यै**र्गन्धै**र्वासैः प्रवरैः हृदयानन्ददायकान् जिनान् भुवनमहितांस्तु पूजयेद् भक्तिसंयुतः ॥६४॥



For Private and Personal Use Only

**संखकुंदोवमेहिं च, अक्खंडफलिएहि य ।**
**अक्खएहिं विसिट्ठेहिं, लिहए अट्ठमंगले ॥६५॥**

**व्या०-संख०** शङ्खकुन्दोपमैश्चाखण्डास्फुटितैश्चाक्षतैः शालितन्दुलाद्यैर्विशिष्टै**र्लिखति**-रचयत्यष्टमङ्गलानि ॥६५॥

**दप्पणभद्दासणवद्धमाण, सिरिवच्छमच्छवरकलसा**
**सत्थियनंदावत्ता, लिहिआ अट्ठट्ठमंगलया ॥६६॥**

**व्या०-'दप्पण०' दर्पण**-आदर्शः । **भद्रासनं**- वेत्रासनम् । **वर्धमानं**- शरावसम्पुटं, पुरुषारूढपुरुषो वा । श्रीवत्समत्स्यवरकलशाः । स्वस्तिकनन्दावर्तौ च प्रतीतौ । **लिखितानि**- श्रुते उक्तानि एतान्यष्टमङ्गलकानि । अष्टाष्टेत्यत्रैकस्यापि मङ्गलस्याष्टेति संज्ञा । यथैकस्यापि पूजामहस्याष्टाहिकेति । यद्वा प्रत्येकमष्टाष्टसंज्ञानीति ॥६६॥

**कुसुमेहिं पंचवन्नेहिं, पूयए अट्ठमंगले ।**
**चंदणेण विसिट्ठेण, दले पंचंगुलीतलं ॥६७॥**

**व्या०-'कुसुमेहिं०'** कुसुमैः पञ्चवर्णैः पूजयत्यष्टमङ्गलानि चन्दनेन **विशिष्टेन**- कुङ्कुममिश्रेण दद्यात्पञ्चाङ्गुलीतलं, हस्तकमित्यर्थः ॥६७॥

**कुसुमेहिं पंचवन्नेहिं, पूयए भत्तिसंजुओ ।**
**चंदणेण तहेवावि, तओ पंचंगुलीतलं ॥६८॥**



For Private and Personal Use Only

**'कुसुमेहिं०'** स्पष्टा ॥६८॥

**अगरकप्पूरमीसं तु, दहे धूवं वियक्खणो ।**
**आरत्तियाइपज्जंतं, करे किच्चं तओ पुणो ॥६९॥**

**व्या०'अगर०'** अगरकर्पूरमिश्रं तु दहेद्**धूपं**-तुरुक्खसिल्हकादिरूपं **विचक्षण**स्तुरुक्खसिल्हकादिधूपविधिकुशलः । अयं च पूजाविधी राजप्रश्नीयोपाङ्गेऽप्यस्ति ॥६९॥ आरात्रिकावसरे च नाट्यं विधेयमतस्तत्सदृष्टान्तमाह-

**देविंददाणविंदेहिं, नारएणं जहा कयं ।**
**पभावईइ देवीए, तहा नट्टं करे विऊ ॥७०॥**

**व्या०-'देविंद०'** देवेन्द्रदानवेन्द्राभ्यां नारदेन यथा कृतं, नाट्यमित्यत्रापि सम्बध्यते, प्रभावत्या च देव्या, तथा नाट्यं कुर्याद् विद्वानिति ।

देवेन्द्रकथा- विंशतिसुव्रततीर्थकृत्श्राद्धस्य कार्तिकश्रेष्ठिनो जीवो देवेन्द्रशक्रो विशाखापुर्यां बहुपूर्णकोद्याने स्थितस्य श्रीवीरजिनस्याग्रे यथा सप्रभेदं नाट्यं कृतवान् ॥

अथ चमरेन्द्रकथा-विन्ध्याद्रिस्थबिभेलग्रामवासिनो वैराग्येण गृहीततापसव्रतस्य षष्ठाशिनः पूरणेभ्यस्य जीवो दानवेन्द्रश्चमरेन्द्रः शक्रपराभूतः स्वीकृतश्रीवीरशरणत्वेन प्राप्तसम्यक्त्वः सुसुमारपुरे स्थितस्य श्रीवीरस्याग्रे नाट्यं चकार ।



For Private and Personal Use Only

अथ प्रभावती कथा- चम्पायां नगर्यां सुवर्णकारोऽनङ्गसेनोऽत्यन्तस्त्रीलोलो बहुद्रव्यदानेन कृतपञ्चशतपत्नीकः, पञ्चशैलाभिधानद्वीपस्थविद्युन्मालिदेवे च्युते तत्पत्नीहासाप्रहासाभ्यां विप्रतारितो, द्रव्यकोटिदाने वृद्धनाविकेन तद्द्वीपे नीतोऽपि मनुजत्वात्ताभ्यां पश्चात्प्रेषितो । नागिलमित्रेण बोधितोऽपि इङ्गिनीमरणं प्रपद्य विद्युन्माल्यभूत् । स च नन्दीश्वरद्वीपे नाटकावसरे मिलितसर्वदेवेष्वनिच्छन्नपि बलात्कण्ठपतितपटहो द्वादशदेवलोकवासिना पूर्वभवमित्रसम्बन्धेन नागिलदेवेन विद्युन्माली पृष्टः मामुपलक्षयसि ? तेनोक्तं, न, ततो नागिलदेवेन स्वं निवेद्य धर्मं स्वीकारितो । नागिलदेवेनोक्तस्य गोशीर्षचन्दनस्य दारुमध्ये क्षिप्तां देवाधिदेवप्रतिमां बोधिनिमित्तं कृत्वा, तस्मिन्नवसरे कस्यचिद्वणिजस्तत्र समायातस्य दुर्वातेन स्खलिते प्रवहणे षण्मासं यावत्सङ्कटान्निस्तार्याऽर्पयित्वा च तां, अद्य तव प्रवहणं ममानुभावात् प्रातर्वीतभयनगरकूले प्राप्स्यतीत्यवादीत् विद्युन्माली । वणिजा तत्र प्राप्तेन प्राभृतपूर्वमेतस्य दारोर्देवाधिदेवप्रतिमा क्रियतामित्युक्ते उदायने राज्ञि मन्त्र्यादिकथिते ब्रह्मादिप्रतिमोपक्रमेऽपि कुठारप्रहारालगने, प्रभावत्या श्रीवीरजिनविचारकथने कुठारेण प्रदत्तेन प्रकटितायाः श्रीवीरप्रतिमाया अग्रे प्रभावती नाट्यं चकार । नाट्यविधौ निजपत्या शिरश्छायाऽदर्शनशुक्लधौतमार्गरक्तीभवनाद्युत्पातेन ज्ञातासन्नमरणा प्रव्रज्य तापसव्यतिकरेण स्वपतिं राजानं प्रतिबोधितवती चेत्यादि प्रभावतीकथा । तथा नारदेन तु नाट्यविधिर्यथा कृतस्तथा ग्रन्थान्तरादवसेयः ॥७०॥

द्वारम् ८॥



For Private and Personal Use Only

साम्प्रतं वन्दनमिति नवमद्वारम् । तच्च भावपूजारूपचैत्यवन्दनलक्षणं द्रव्यपूजाशेषं च षट्सूत्र्याह-

**पणिहाणं च काऊणं, करे अन्नं तओ इमं ।**
**नाणाविहाइ भत्तीए, उल्लोयं जिणमंदिरे ॥७१॥**

**व्या०-'पणिहाणं०' प्रणिधानं चे**त्यनेन सम्पूर्णचैत्यवन्दनविधिः सूचितस्ततः प्राग्वत् प्रणिधानावसानं चैत्यवन्दनं कृत्वा कुर्यादन्यद् **इदम्**-आसन्नोपदर्श्यमानतया प्रत्यक्षं । किं तदित्याह-नानाविधाभि**र्भक्तिभि**र्विच्छित्तिभिरुल्लोचं जिनमन्दिरे ॥७१॥ कैरित्याह-

**वत्थेहिं देवंगदुगल्लएहिं, पट्टेहिं खोमेहिं य उत्तमेहिं ।**
**सुवन्नरूप्पेहिं पवालएहिं, मुत्ताहलेहिं च महालएहिं ॥७२॥**

**व्या०-**वस्त्रै**र्देवाङ्गै**रिति देवदूष्यैः **दुकूलै**र्दुकूलाख्यवृक्षत्वज्जैः **पट्टैः**-कौशेयैः **क्षोमैः**- कार्पासै**रुत्तमैः**- प्रधानैः । कीदृशमित्याह- सुवर्णरूप्यैः प्रवालैर्मुक्ताफलैश्च **महालयै**र्महाप्रमाणैः, खचितमिति शेषः ॥७२॥

**सुवन्नजुत्तेहिं सुगंधएहिं, नाणापयारेहिं सुगच्छिएहिं ।**
**पुप्फाण गेहं तु करेइ रम्मं, सुभत्तिजुत्तो जिणमंदिरंमि ॥७३॥**

**व्या०-'सुवन्न०' सुवर्णयुक्तै**र्विशिष्टवर्णोपेतैः सुगन्धिभि**र्नानाप्रकारै**र्जलस्थलजैः सुग्रथितैः, पुष्पैरिति शेषः । पुष्पगृहं पुनः समवसरणाद्याकारं रम्यं करोति । सुभक्तियुक्तः इत्यसकृदभिधानं भावयुक्तस्यैव सकलक्रियाकलापो 

महानिर्जराफल इति दर्शनार्थम् । तच्छून्यस्य तु कीर्त्यादिप्रवृत्तस्य महतोऽप्यनुष्ठानस्य वैफल्याभिधानात् । उक्तं च-

**'क्रियाशून्यस्य यो भावो, भावशून्यस्य या क्रिया । एतयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥१॥' ७३॥**

**अत्थवंतेण सुद्धेणं, गीएणं करणाइणा ।**
**जिणाणं जियमोहाणं, गायए गुणपगरिसं ॥७४॥**

**व्या०-'अत्थवंतेण०'** जिनानां जितमोहानां **गुणप्रकर्ष-** दुस्तपतपोलक्ष्म्यादिरूपं गाययेत् । केन ? **गीतेन-** गान्धर्वेण, किंविशिष्टेन ? **अर्थवता-** वैराग्यैकरसयुक्तेन । पुनः किंभूतेन ? **करणादिना शुद्धेन-** त्रिस्थानकरणादिना विशुद्धेन । तत्र त्रीणि स्थानानि उरःप्रभृतीनि । तेषु करणेन-क्रियया विशुद्धं । तद्यथा- उरोविशुद्धं, कण्ठविशुद्धं, शिरोविशुद्धं च । तत्र यदि उरसि स्वरः स्वभूमिकानुसारेण विशालो भवति तत उरोविशुद्धं । स एव यदि कण्ठेन वर्तितो भवति, अस्फुटितश्च ततः कण्ठविशुद्धम् । यदि पुनः शिरः प्राप्तः स च सानुनासिको न भवति ततः शिरोविशुद्धं । यद्वा उरः-कण्ठ-शिरोभिः स्थानैः श्लेष्मरहितैर्यद् गीयते तत् त्रिस्थानकरणविशुद्धम् । आदिशब्दान्म-धुरादिगुणयुक्तेन प्रकर्षं यथा स्यादेवम् ॥७४॥

**ततं च विततं चेव, घणं सुसिरसुतालयं ।**
**आउज्जं एवमाईयं, वाए वायावए तओ ॥७५॥**



For Private and Personal Use Only

**व्या०-'ततं च विततं०' ततं च-** तन्त्रीयुक्तं वीणादि । **विततं चैव-** तालादि । **घनं-** कांस्यतालादि । **शुषिरं-** वंशादि । **सुतालकं-** यच्छास्त्रोक्तपाठशुद्धं । आतोद्यमेवमाद्यं वादयति स्वयमन्यैरपि वादयति, **सकः-** श्राद्धः ॥७५॥

**ठाणे ठाणे तओ तत्थ, सयं देइ दवावए**
**रासे य चच्चरीओ य, हिययाणंददायए ॥७६॥**

**व्या०-'ठाणे ठाणे तओ०' स्थाने स्थाने-** चैत्याग्राङ्गणादिरूपे ततस्**तत्र-** चैत्यपरिपाट्यादिकाले स्वयं दत्ते दापयति च रासकांश्च, मण्डलिकया गीतनृत्यविशेषात्तरण्डरसान् वा- चर्चरीश्च प्रसिद्धाः हृदयानन्ददायकानिति षट्-सूत्रार्थः ॥७६॥

ऋद्धिमत्पूजामुपसंहरन्नितरश्राद्धस्य चैत्यगमनविधिं द्विसूत्र्याह-

**एवं विही इमो सव्वो, रिद्धिमंतस्स देसिओ ।**
**इयरो नियगेहंमि, काउं सामाइयं वयं ॥७७॥**

**व्या०-'एवं विही०' एवमि**ति तओ य हयगयाइहीत्यादिना प्रकारेण चैत्यगमनादिविधिरयं सर्व ऋद्धिमतो **देशितः**-कथितः । **इतरो-**ऽनृद्धिप्राप्तः श्राद्धो निजगृहे कृत्वा सामायिकव्रतम् ॥७७॥

**जइ न कस्सावि धारेइ, न विवाओ य विज्जए ।**
**उवउत्तो सुसाहुव्व, गच्छए जिणमंदिरं ॥७८॥**



For Private and Personal Use Only

**व्या०-'जइ न क०'** स च यदि न कस्यचिद्धारयति, ऋणमिति गम्यते, न विवादश्च केनचित्सह विद्यते । तत ईर्यादिषूपयुक्तः सुसाधुवद्गच्छति जिनमन्दिरमिति । तत्र च 'तिन्नि निसीही' त्यादि यद् यद् भावपूजानुयायि तत्तदस्यापि तथैव द्रष्टव्यम् ॥७८ ॥

द्रव्यपूजायां तु पुष्पादिसामग्र्यभावात् संभवद्विधिमाह-

**काएण अत्थिज्जइ, किंचि कायव्वं जिणमंदिरे ।**
**तओ सामाइयं मुत्तुं, करेइ जं करणिज्जयं ॥७९॥**

**व्या०-'कायेण०' कायेन-** शरीरेणास्ति यदि किञ्चित् पुष्पग्रथनादि कर्तव्यं जिनमन्दिरे । ततः सामायिकं मुक्त्वा, कुर्याद् यद् करणीयं, सामायिककालस्य सावकाशत्वात् स्वायत्तत्वाच्च । प्रस्तावे चैत्यकरणे-

**'जीवाण बोहिलाभो सम्मद्दिट्ठीण होइ पियकरणं । आणा जिणिंदभत्ती तित्थस्स पभावणा चेव ॥१॥'**

इत्याद्यागमे विशेषपुण्यस्योक्तत्वाच्च ॥७९॥

'गुरुसगासे पच्चक्खाणमिति' १० द्वारे वन्दनकपूर्वाण्यालोचनक्षामणप्रत्याख्यानान्यतः प्राग्वन्दनविधिस्तत्सूत्राणि च व्याख्येयानि । प्रस्तुतमाह-

**अह धम्मदेसणत्थं च, तत्थ सूरी समागओ ।**
**पुव्वं पच्छा व दायव्वं, विहिणा वंदणं जओ ॥८०॥**



For Private and Personal Use Only

**व्या०-'अह धम्म०'** अथ शब्दः प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेषु । अत्र तु चैत्यगृहे गुरुवन्दनादिकार्ये समुच्चिनोतीति समुच्चये । तत्र धर्मदेशनार्थं चशब्दात् स्नात्राद्यवलोकनार्थं च **सूरि**राचार्यः समागतस्ततश्च पूर्वमिति धर्मदेशनायाः प्राक् पश्चाद्वा **विधिना-** पूर्वोक्तस्वरूपेण **वन्दनं-** द्वादशावर्तवन्दनं दातव्यं, तस्य सूरेरिति शेषः । यतो वक्ष्यमाणहेतुतया इति ॥८०॥ तमेवाह-

**नीयागोयं खवे कम्मं, उच्चगोयं निबंधए ।**
**सिढिलं कम्मगंठिं तु, वंदणेणं नरो करे ॥८१॥**

**व्याख्या-**नीचैर्गोत्रं कर्म पूर्वबद्धं क्षपयति । उच्चैर्गोत्रं नितरां बध्नाति । शिथिलं ज्ञानावरणीयादिकर्मग्रन्थिं पुनर्वन्दनेन नरः कुर्यादिति ॥८१॥ अस्य फलं दृष्टान्तद्वारेणाह-

**तित्थयरत्तं संमत्त-खाइयं तह सत्तमीइ तइयाए ।**
**आउं वंदणएणं, बद्धं च दसारसीहेणं ॥८२॥**

**व्याख्या-'तित्थयरत्तं०'** गाथेयं भावितार्थैव, प्रागुक्तकृष्णचरित्रे स्वयं ज्ञेयेति ॥८२॥ पूर्वोद्दिष्टान् षट् गुणानाह-

**विणओवयार१ माणस्स भंजणा २ पूयणा गुरुजणस्स ३ ।**
**तित्थयराण य आणा ४ सुयधम्माराहणा ५ किरिया ६ ॥ ८३॥**

**व्याख्या-'विणओव०'** विनय एव **उपचारो-** भक्तिविशेषः । तथा **मानस्या**हङ्कृतेर्भञ्जनम् । गुरुजनस्य



For Private and Personal Use Only

पूजना । तीर्थकराणां चाज्ञा । श्रुतधर्माराधना । **अक्रिये**ति सर्वक्रियाविगमादचिरेण मोक्षश्च वन्दनेन स्यादिति ॥८३॥ द्वारम्९ ॥

साम्प्रतं दशमद्वादशत्रयोदशलक्षणद्वारत्रयाभिधित्सयाह-

**पच्चक्खाणं तु काऊण, (द्वा०१०) पुच्छए (द्वा० १२) सेसकिच्चयं ।**
**कायव्वं च मणे काउं तओ, अण्णं करे इमं ॥८४॥**

**व्याख्या-'पच्चक्खाणं०'** प्रत्याख्यानमिह नमस्कारसहितादि स्वयं गृहादौ गृहीतमपि गुरुसाक्षिकं विधेयमतस्तच्च कृत्वेति द्वारम् (१०) । अत्रैकादशं श्रवणद्वारमुल्लङ्घ्याल्पवक्तव्यत्वाद् यतिपृच्छा- उचितकरणीयद्वारद्वयमाह- **'पुच्छए०'** पृच्छति साधुधर्मशरीरनिराबाधवार्ताद्यशेषकृत्यम्, तच्च महानिर्जराहेतुः । यदुक्तम्-**अभिगमण-वंदण-नमंसणेण पडिपुच्छणेण साहूणं । चिरसंचियंपि कम्मं खणेण विरलत्तणमुवेइ ॥१॥** १२ द्वारं । **'कायव्वं०'** कर्तव्यं च स्वशक्त्यनुरूपं साधोर्ग्लानत्वादावौषधादिप्रदानलक्षणं **मनसि कृत्वा-** गृहाद्यागतानां साधूनामिदमौषधादि दास्येऽहमिति मनस्याधाय ततोऽन्यत्कुर्या**दिदं-** वक्ष्यमाणमिति ॥८४॥

यदुक्तमन्यद् कुर्यादिदं तदेवाह-

**साहुसाहूणिमाईणं, काऊणं च जहोचियं ।**
**समणोवासगमाईणं, वंदं वंदं ति जंपई ॥८५॥ दारं १२-१३॥**

**व्याख्या-**साधुसाध्व्यादीनामादिशब्दादवमग्नानां च, निश्राकृतचैत्ये तेषामपि सम्भवात्, **यथोचितं-** यथायोग्यं ॥४०॥

वन्दनं च्छोभवन्दनवाग्नमस्कारादिकं कृत्वा, यतोऽवमग्नानामपि कारणेन सूत्रे नमस्कारादेरुक्तत्वात् । तथा श्रमणोपासकादीनामादिशब्दात् श्राविकाणां चैवं वंदं वंदमित्यपभ्रंशभाषया जल्पति वन्दे वन्दे इति, वीप्सायां द्वित्वे सर्वान् श्रावकान् श्राविकांश्च नमस्कुर्वे इत्यर्थः ॥८५॥ द्वारम् १२-१३॥

अथ पूर्वोद्दिष्टं ११ श्रवणद्वारम् । तत्र तावत् श्रवणविधिं चतुःसूत्र्याह-

**नासन्ने नाइदूरंमि नेव, उच्चासणे विऊ ।**
**समासणं तु वज्जिजज्जा, चिट्ठिज्जा धरणीयले ॥८६॥**

**व्याख्या-'नासन्ने०' नासन्ने-** नातिनिकटे उपविशेदुच्छ्वासाद्यैर्गुरुं प्रति शिष्यस्याशातनासम्भावात्तथा नातिदूरे सम्यक्श्रवणाद्यसम्भवात् । नैव चोच्चासने **'विउत्ति'** विद्वान्- गुरुवरिवस्यानिपुणः, समासनं च वर्जयेत्, **तिष्ठेद्-** उपविशेद् **धरणीतले-** निर्जन्तुभूभागे ॥८६॥

**न पक्खओ न पुरओ नेव किच्चाण पिट्ठउ ।**
**न य ऊरुं समासिज्जा चिट्ठिज्जा गुरुणंतिए ॥८७॥**

**व्याख्या-'न पक्ख०' न पक्षतः-** पार्श्वयोरविनयसम्भवात् । **न पुरतो-** नाग्रतोऽन्यवन्दारूणां विबन्धकत्वात् । नैव **कृत्यानां-**गुरूणां पृष्ठतस्तेषां पश्चान्मुखनिरीक्षणेनाबाधासम्भवात् । न चोरुं समाश्रित्य अविनयभयादुरोरुपरि पादं निवेश्य तिष्ठेद् गुरूणामन्तिके ॥८७॥



For Private and Personal Use Only

**नेव पल्हत्थियं कुज्जा, पक्खपिंडं च संजए ।**
**पाए पसारए वावि, न चिट्ठे गुरुणंतिए ॥८८॥**

**व्याख्या-'नेव पल्ह०'** नैव पर्यस्तिकां कुर्याद्, संयत इत्यत्र प्रस्तावाद्देशसंयतः, पादौ प्रसार्यापि न तिष्ठेद् गुर्वन्तिके ॥८८॥

**निद्दं विकहं वज्जिजज्जा, काऊणं अंजलिं सिरे ।**
**कण्णंजलीहिं भत्तीए, घुंटे सिद्धंतमोसहं ॥८९॥**

**व्याख्या-'निद्दं विकहं०'** निद्रां विकथां च वर्जयित्वा कुत्वाञ्जलिं शिरसि कर्णाञ्जलिभ्यां भक्त्या सहर्षं पिबेद् भावरोगापहारित्वात्सिद्धान्त औषधमिव सिद्धान्तौषधं तत् । मकारोऽलाक्षणिकः । इति सूत्रचतुष्टयार्थः ॥८९॥

एनमेवार्थं सविशेषं भावयन्नाह-

**अन्नाणमोहमिच्छत्त-महावाहिविरेयणं ।**
**कुग्गहविसघत्थाणं, महामंतो जिणागमो ॥९०॥**

**व्याख्या-'अन्नाणमो०' अज्ञानं-** तत्त्वातत्त्वाज्ञता । **मोहो-** धनादिष्वतिगृध्रता । **मिथ्यात्वं** कुदृष्टिरक्तता । एतान्येव जीवस्यानन्तदुःखहेतुत्वान्महाव्याधयस्तेषां तत्कालक्षयकारित्वाज्जिनागमो **विरेचनं-** विरेकः । शय्यंभवचिलातीपुत्रगोविन्दवाचकादीनामिव । तत्र शय्यंभवकथा प्रसिद्धा ।



For Private and Personal Use Only

चिलातीपुत्रोदाहरणं त्विदम्- चिलातीपुत्रोऽपि प्राग्जन्मविराधितव्रतो महामोहमती राजगृहे धनश्रेष्ठिगृहाद्धनं तत्पुत्रीं च सुसुमामादाय पलायमानः पश्चादायातं ससुतं धनश्रेष्ठिनं वीक्ष्य सुसुमायाः शिरश्छित्त्वा किञ्चिज्जातसंवेगः साधुमालोक्य स्तोकाक्षरैर्मम धर्ममाख्याहीत्युक्तवान् । तेनोक्तमुपशमो विवेकः संवरश्च कार्यः । एषोऽप्येतत्पदत्रयं भावयन् पर्यस्तमहामोहमाहात्म्यः कायोत्सर्गस्थोऽसृग्गन्धागतवज्रतुण्डकीटिकाकोटिकृततितउकल्पकायो मनागपि तास्वप्रदुष्यन् सार्धदिनद्वयान्ते विपद्य सहस्रारे स्वर्गश्रियमशिश्रियत् ।

गोविन्दस्तु वादे विवदमानो जैनैरनेकशः पराजितो मिथ्यात्वमथितसत्पथस्तान् विजेतुकामः स्थविरान्तिके प्रव्रज्य पूर्वगतमधीयानोऽपगतमिथ्यात्वामयो वाचकपदमाससादेति । तथा कुमानुषोपदेशादनुपकृतोपकारिषु तीर्थकरादिष्वपि विप्रतारकाभिप्रायः । स एव विशिष्टचैतन्यविनाशकत्वाद्विषं तेन ग्रस्तानामसुमतामचिन्त्यमाहात्म्येन सद्यः प्रशस्तचैतन्यसम्पादनात् महामन्त्रो जिनागमो यथा रोहिणेयादीनाम् ॥९०॥

**धम्माधम्मं तहा किच्चं, जुत्ताजुत्तं तहेव य ।**
**देवा य देवलोगा य, सिद्धा नेरइया तहा ॥९१॥**

**व्याख्या-'धम्माधम्मं०'** धर्मश्चाधर्मश्च धर्माधर्मम्, तदागमेन विजानातीत्येतत्सर्वमपि योज्यम् । तत्र धर्मोऽहिंसादिलक्षणो जैनागमात् ज्ञायते । अधर्मोऽपि प्राणवधाद्यात्मकः । **तथे**ति तेनैव प्रकारेण, **कृत्यं**- कर्तव्यम् । तच्च द्वेधा । युक्तं चैत्यवन्दनादि । अयुक्तं कुतीर्थिगमनपरपाखण्डिप्रशंसादि । **तथैव चे**ति समुच्चये । तथा **देवा** भवनपति- ॥४३॥

 

व्यन्तरज्योतिष्कवैमानिकाद्याः । चशब्दस्तद्गतायुर्देहादिवक्तव्यतासंसूचकः । तथा देवलोकाश्च, **देवानां-** सुरादीनां **लोका-** आश्रयविशेषा देवलोकाः । **सिद्धाः**-निष्ठिता इत्यर्थः । तथा निरयेषु भवा नैरयिकास्ते च नरकनरकावासायुर्देहदुःखादिभिश्चिन्त्यन्ते । **तथे**ति समुच्चये ॥९१॥

**जं एमाइं पयत्था, आगमेण वियाणइ ।**
**उज्झित्ता सव्ववावारं, तओ य तं निसामए ॥९२॥**
**अन्नं च जीवाईणं, कुणई सद्दहणं तहा ।**
**ससंकियाण अत्थाणं, कुज्जा पुच्छं विअक्खणो ॥९३॥**

**व्याख्या-'जं एमाइ०' यद्**-यस्मात् कारणा**देवमादीन् पदार्था (न्)-** द्रव्यविशेषानागमेन विजानाति, जन्तुरिति शेषः । **उज्झित्ते**त्यादि, **ततश्च**-तस्माद्धेतोः **सर्वव्यापारम**न्यत्र मनोवाक्कायनिवेशमयमुज्झित्वा **तमा**गमं **निशामयति-** शृणोतीति ॥९२॥

अन्यच्चागममाकर्णयन् **जीवादीनां** नवपदार्थानां **तथा-** यथा सूत्रे ऽभिहितानां **श्रद्धानं**-अवितथमेतदिति प्रत्ययरूपं करोति, ते चामी- सर्वजीवाश्चैतन्येनैकधा, त्रसस्थावरभेदाभ्यां द्विधा, वेदैस्त्रिधा, गतिभिश्चतुर्धा, इन्द्रियैः पञ्चधा, कायैः षड्विधा, भ्वादिपञ्चस्थावरद्वित्रिचतुःपञ्चेन्द्रियभेदैर्नवधा । सूक्ष्म १ बादर २ द्वि ३ त्रि. ४ चतुः ५ असंज्ञि पञ्चेन्द्रिय ६ संज्ञिपञ्चेन्द्रिय ७ अपर्याप्तपर्याप्तभेदाभ्यां चतुर्दशधा । सूक्ष्मबादररूपा भू जल २ अनल ३ पवनानन्त- 

वनस्पति ५ जीवाः प्रत्येकवनस्पति ११ विकलेन्द्रिय १४ संज्ञि १५ असंज्ञि १६ पञ्चेन्द्रियाश्च पर्याप्तापर्याप्तभेदाभ्यां द्वात्रिंशत्, भव्यत्वाभव्यत्वाभ्यां चतुःषष्टिविधा वा, कर्मप्रकृतिभेदैर्बहुधा वा, पुनर्जीवानां देहायुर्भवकायस्थित्यादि वाच्यम् । आदेरजीवतत्त्वादिग्रहः इत्यादिप्रकारेणोक्तानां विचारस्तु सर्वेषां नवतत्त्वसंग्रहण्यादिग्रन्थेभ्यो ज्ञेयः । एतानि चेत्याकर्ण्य श्रद्दधतोऽपि चेत्कथञ्चित् कुत्रचिच्छङ्का स्यात्ततःकि विधेयमित्याह- सशङ्कितानामर्थानां पृच्छां कुर्याद्विचारविधिनिपुण इति ॥९३॥ तमेवाह-

**सम्मं वियारियव्वं, अत्थपयं भावणापहाणेहिं ।**

**विसए य ठावियव्वं, बहुसुयगुरुणो सगासाओ ॥९४॥**

**व्याख्या-'सम्मं वि०' सम्यक्-** 'सुत्तत्थो खलु पढमो' इत्याद्यागमोक्तप्रकारेण । इह सर्वत्र भगवदुक्ताङ्गैव सारं नापरं किंचिदित्येवं लक्षणमैदंपर्यं भावार्थः, चारयितव्यम्, किमित्याह- **अर्थपदं-** सशङ्कितसूत्रार्थपदं **भावनाप्रधानैः-** पूर्वापरसूत्रार्थसम्बन्धाविस्मृतिप्रधानैर्न तु सूत्रबहुविधमात्रदर्शनान्मूढचित्तैः । अतः परस्पराविरोधेन द्रव्यक्षेत्रकालभावानपेक्ष्य स्याद्वादमुद्रामनुल्लङ्घयद्भिर्विचार्यम् । न हिंस्यात्सर्वभूतानि मनोवाक्कायैरिति सामान्योक्तौ जिनालयकरणाभावप्रसङ्गे कृते विधिना करणे न दोष इत्युत्तरकरणमित्यादिप्रकारैर्विचार्य तत् सशङ्कितादिपदं **विषये च-** विध्यादिसूत्रगोचरे यत्रानुपतति तत्र स्थापयितव्यम् ॥९४॥ संशयानुच्छेदे दूषणमाह-

**संसया जायए मिच्छं, मिच्छत्ताओ भवो भवे ।**



For Private and Personal Use Only

**भवोदहिंपि पत्ताणं, जीवाणं दुहसायरो ॥९५॥**

**व्याख्या-संशयात्**-तत्त्वसन्देहलक्षणा**ज्जायते**- भवति **मिथ्यात्वं**- प्रथमगुणस्थानवर्तित्वम् । संशयो हि तत्त्वजिज्ञासानिरपेक्षो विपर्ययस्यापि समकक्षाजनकत्वात् मिथ्यात्वं भवति । मिथ्यात्वाच्च **भवो**- नारकतिर्यग्नरामरभवानुभवरूपः संसारो भवेत् । भवोदधौ च प्राप्तानां जीवानां **दुःखसागरो**- जन्मजरामरणादिक्लेशसमुद्रः स्यादिति ॥९५॥

उपसंजिहीर्षुराह-

**तम्हा नायतत्तेणं, सुत्तं अत्थं अहिज्जिउं ।**
**निस्संकिएण होयव्वं, अंबडो अभउ (यो) जहा ॥९६॥**

**व्याख्या-'तम्हा नाय०'** तस्मात् स्थितमेतत् ज्ञाततत्त्वेन सदुपायप्रवृत्तत्वात् विदितपरमार्थेन सूत्रमर्थं वाधीत्य निःशङ्कितेन भवितव्यमम्बडोऽभयश्च यथाऽभूत् । तत्कथा यथा-

एकदा श्रीमहावीरो विहरन् चम्पायां नगर्यां पूर्णभद्रचैत्ये समवासरत् । तदा तं वन्दितुं पुरीलोकसहितोऽम्बडाभिधः परिव्राट् समेतः । तं वीरं त्रिः प्रदक्षिणीकृत्य तदुपदेशं श्रुत्वा राजगृहे गन्तुमना यावदभूत् । तावता श्रीवीरेण तत्र नागरथिपत्नीसुलसायाः धर्मप्रवृत्तिकां मदादेशात्पृच्छेरित्युक्तो भगवति वीतरागत्वं सन्दिहानो गगनाध्वनाऽऽगत्य सुलसाया गृहे परीक्षां कर्तुं भिक्षाचररूपेण गृहप्रवेशे तयोक्तम्-'अहं शीलशालिभ्यः साधुभ्यः दानं ददामि नान्यस्य' । ततो



For Private and Personal Use Only

गेहान्निसृत्य प्राच्यां विद्याबलात् सम्यग् ब्रह्मणो रूपं विधाय ब्रह्मदेवमानिनां पौराणां धर्मं दिदेश । द्वितीयेऽह्नि दक्षिणस्यां विष्णुरूपं विधाय तद्भक्तानाम् । तृतीयेऽह्नि उत्तरस्यां हररूपं निर्माय तद्भक्तानाम् । उदीच्यां तु चतुर्थेऽह्नि तीर्थनाथरूपं विधाय समवसृत्यन्तश्चतुर्विधं धर्ममाचख्यौ । तत्रापि सुलसा नागता । तस्या आकारणार्थं तेन जने प्रेषितेऽप्यनागमने निश्चलसम्यक्त्वां तां वीक्ष्य परीक्ष्य च सर्वं प्रपञ्चं संहृत्याम्बडः सुलसागेहे गतः । तत्र च गृहचैत्यानि नित्यानित्यचैत्यानि च परस्परं वन्दितानि । तदा भगवतो धर्मप्रवृत्तिप्रश्नं तस्य मुखात् श्रुत्वा सा वीरं वन्दे । अम्बडेनोक्तम्-ब्रह्मादयः स्वयमवतीर्य पौराणां धर्मं प्रोचुः, तस्मिन्नवसरे त्वं कस्मान्नागता ? तयोक्तम्-'वीतरागं गतद्वेषं सर्वज्ञं वीक्ष्य परान् द्रष्टुमुत्सहेत कः' । एवं सुलसास्थैर्यं दृष्ट्वा शुभमनाः श्रीअम्बडः सम्यग् धर्मोन्नतिं कुर्वन् च्युतः स्वर्गे प्राप्तः । क्रमेण पञ्चदशो जिनेश्वरो भविष्यति । अभयस्य तु कथा श्रेणिकचरित्रादवसेया । संक्षेपेणात्र कथ्यतेऽभयश्च कश्चरमो राजर्षिरिति पृष्टे वीरेण तत्कालदीक्षितोऽयमुदायननृपश्चरमराजर्षिरित्युक्ते मनसि निश्चित्य राज्यास्वीकारेण प्रव्रजितः ॥९६॥

श्रवणद्वार एव चैत्योद्धारचिन्तादिकृत्यं द्विसूत्र्याह-

**निस्सामित्ता य सिद्धंतं, तओ किच्चं निरूवए ।**

**एयं च इत्थ कायव्वं, एयं उद्धरियव्वयं ॥९७॥**

**व्याख्या-'निस्सामि०'** निशम्य च सिद्धान्तं ततः **कृत्यं-** प्रस्तावाच्चैत्यसम्बन्धिकार्यं चिन्तयति । तदेवाह-



For Private and Personal Use Only

**एतच्चात्र-** मुखमण्डपाद्यविद्यमानं कर्तव्यं । **एतत्-** प्रेक्षामण्डपादि सदपि जीर्णत्वादुद्धर्तव्यम् ॥९७॥

**तं तु सव्वं निरूवित्ता, करे जं करणिज्जयं ।**
**सओ य परओ चेव, कायव्वं जिणमंदिरे ॥९८॥**

**व्याख्या-'तं तु सव्वं०'** तत्तु सर्वं **निरूप्य-** सम्यग् विचिन्त्य कुर्याद्यत्करणीयं, स्वशक्तौ सत्यामात्मनैव, तदभावे परतोऽपि कर्तव्यं जिनमन्दिरे, एतदेव गार्हस्थ्यसारं ॥९८॥ तथा चाह-

**तं नाणं तं च विन्नाणं, तं कलासु य कोसलं ।**
**सा बुद्धी पोरिसं तं च, देवकज्जेण जं वए ॥९९॥**

**व्याख्या-'तं नाणं०'** तदेव **ज्ञानं-** शास्त्रार्थपरिज्ञानं, सारमिति गम्यते, तदेव च **विज्ञानं-** क्रियासु दक्षत्वम्, तदेव **कलासु च-** विद्यादिषु कौशलम्, सैव **बुद्धिरा**यतिदर्शिता, तदेव च **पौरुषं**-शरीरादिसामर्थ्यं, **देवकार्येण-** चैत्यादिप्रयोजनेन **यद्-** ज्ञानादि व्रजत्युपयोगितामिति ॥९९॥

अथ जीर्णोद्धारफलं दशसूत्र्याह-

**जिणभवणाइं जे उद्धरंति, भत्तीए सडियपडियाइं ।**
**ते उद्धरंति अप्पं, भीमाओ भवसमुद्दाओ ॥१००॥**

**व्याख्या-'जिणभवणा०'** जिनभवनानि ये उद्धरन्ति **भक्त्या-** बहुमानेन, न तु कीर्त्यादिलिप्सया, **शटितानि-** जीर्णानि **पतितानि-** शिखरादिपातेन ते उद्धरन्त्यात्मानं **भीमात्-** जन्मजरामरणादिदुःखौघग्राहग्रसनरौद्रात् **भवस-**

**मुद्रा**न्नरकतिर्यग्नरामररूपसंसारसागरात् ॥१००॥ अथवा

**अप्पा उद्धरिओ च्चिअ, उद्धरियो तह य तेहिं नियवंसो ।**

**अन्ने य भव्वसत्ता, अणुमोयंता य जिणभवणं ॥१०१॥**

**व्याख्या-'अप्पाउ०'** आत्मा उद्धृत एव जीर्णोद्धारादिसत्कृत्यकरणात् । उद्धृतस्तथा च **निजवंशः-** पितापितामहादिपूर्वजसन्तानः, कदाचित्तस्य स्वर्गादिगतिगतस्याप्यवधिज्ञानादिविदिततत्सुकृतानुमोदनात्, पुत्रपौत्रादेर्वा सत्कृत्यप्रवृत्त्यादिना । **अन्ये च भव्यसत्त्वाः-** स्ववंशव्यतिरिक्ता आसन्नसिद्धिका अनुमोदमानास्तुशब्दस्य विशेषकृतत्वाच्छेषानुष्ठानविकला अपि । जिनभवनं तत्समारचितमिति शेषः ॥१०१॥

**खवियं नीयागोयं, उच्चागोयं च बंधियं तेहिं ।**

**कुगइपहो निट्ठविओ, सुगइपहो अज्जिओ य तहा ॥१०२॥**

**व्याख्या-'खवियं०' क्षपितं-** शुभपरिणामादुद्वलनाकरणादिना निर्नाशितं **नीचैर्गोत्रं-** कुत्सितकुलोत्पत्तिरूपं प्राग्बद्धस्पृष्टनिधत्तावस्थाभिः कृतसत्ताकम**प्युच्चैर्गोत्रं च-** बहुजनपूज्यताहेतुः सुकुलजन्मलक्षणं **बद्धमा**संकलितं, तैः **कुगतिपथश्च-** नरकाद्यध्वा **निष्ठापितः-** स्वगमनाविषयीकृतः, **सुगतिपथश्च-** देवगत्यादिमार्गोऽर्जितस्तथा ॥१०२॥

**इहलोगंमि सुकित्ती, सुपुरिसमग्गो य देसिओ होइ ।**

**अन्नेसिं भव्वाणं, जिणभवणं उद्धरंतेहिं ॥१०३॥** ॥४९॥

**व्याख्या-'इहलोगं०' इह लोके-** तस्मिन्नपि भवे **सुकीर्तिः-** सुश्लाघा, स्यात्तेषामिति शेषः । **सुपुरुषमार्गश्च-** सगरचक्रिपुत्रादिकृताष्टापदप्रभृतिमहातीर्थोद्धाररूपो **देशितः-** करणद्वारेण प्रकटितः । केषामित्याह- अन्येषां भव्यानां । किं कुर्वद्भिस्तैर्जिनभवनमुद्धरद्भिः ||१०३||

**सिज्झंति केइ तेण वि, भवेण इंदत्तणं च पावंति ।**
**इंदसमा केइ पुणो, सुरसुक्खं अणुभवेऊणं ||१०४||**
**मणुयत्ते संपत्ता, इक्खागकुलेसु तहय हरिवंसे ।**
**सेणावई अमच्चा, इब्भसुया चेव जायंति ||१०५||**

**व्याख्या-'सिज्झंति०' 'मणुय०' सिद्ध्यन्ति केचिद**शेषकर्मक्षीणांशास्तेनैव भवेन निर्वृतिं गच्छन्ति । अन्ये तु सावशेषकर्माण इन्द्रत्वं च प्राप्नुवन्ति । **इन्द्रसमाः-** शक्रसामानिकाः स्युः केचित्, पुनःशब्दाच्छेषा अपि महर्द्धिकाश्च । तत्र च सुरसौख्यमनुभूय मनुजत्वे सम्प्राप्ता इक्ष्वाकुकुले तथा च हरिवंशे **सेनापतयो-** हस्त्यश्वरथपत्तिरूपचतुरङ्गचमूनाथाः, महानरेश्वरा इत्यर्थः । **अमात्या-** महामन्त्रिणः । **इभ्यसुताश्चैव-** सार्थवाहपुत्राश्च जायन्ते || १०४-१०५||

**कलाकलावे कुसला कुलीणा, सयाणुकूला सरला सुसीला ।**
**सदेवमच्चासुरसुंदरीणं, आणंदयारी मणलोयणाणं ||१०६||**



For Private and Personal Use Only

**व्याख्या-'कलाकलावे०'** लिपिगणितादिकलासमूहे **कुशला:-** निष्णाताः । तथा **कुलीना:-** विशुद्धमातृपितृपक्षजाताः । **सदानुकूला:-** सदैव सर्वेषां स्वपरानपेक्षया हितकारिणः । **सरला-** अवक्राः । **सुशीला:-** अपकारिण्यप्युपकरणशीलाः । **सदेवे**त्यादि, देवाश्च मर्त्याश्च असुराश्च देवमर्त्यासुराः- सह देवमर्त्यासुरैर्वर्तन्ते ताः सदेवमर्त्यासुराः । ताश्च ताः सुन्दर्यश्च तास्तासां मनोलोचनानामतिशायिगुणयोगादानन्दकारिणः ॥१०६॥

**चंदुव्व सोमयाए, सूरो वा तेयवंतया ।**
**रइनाहुव्व रूवेणं, भरहो वा जणइड्डया ॥१०७॥**

**कप्पद्दुमुव्व चिंतामणिव्व, चक्की व वासुदेवा वा ।**
**पूइज्जंति जणेणं, जिन्नुद्धारस्स कत्तारो ॥१०८॥**

**भुत्तूण वरे भोए, काऊणं संजमं च अकलंकं ।**
**खविऊण कम्मरासिं, सिद्धिपयं झत्ति पाविंति ॥१०९॥**

**व्याख्या-'चंदु०', 'कप्पद्दुमु०' 'भुत्तूण०'** । त्रीण्यपि सुगमानि । नवरं **अकलङ्कं संयमम**िति, कषायकालुष्यविकलं यथाख्यातचारित्रमित्यर्थः ॥१०७-१०८-१०९॥ जीर्णोद्धारं निगमयन्नाह-

**इय जिन्नुद्धारो जिणवरेहिं, सव्वेहिं वन्निओ गुरुओ ।**
**मुक्खंगनाणसुरसंप-याण इह कारणं परमं ॥११०॥**



For Private and Personal Use Only

**व्याख्या-'इय जिन्नु०' इति-** पूर्वोक्तप्रकारेण जीर्णोद्धारो **जिनवरैः-** श्रुतादिजिनप्रधानैस्तीर्थकरैरित्यर्थः । **सर्वैः-** समस्तै**र्वर्णितो-** व्याख्यातो **गुरुको-** बृहत्तरः, द्रव्यस्तवमध्येऽयमेव ज्यायानित्यर्थः । कथमित्याह- **इह-** प्रवचने **मोक्षस्याङ्गान्य**वन्ध्यकारणानि **'नाणत्ति'** एकग्रहणे तज्जातीयग्रहणात् सम्यग्ज्ञानदर्शनचारित्राणि, तल्लाभस्येह भवे **कारणं-** निमित्तं परमम्, श्रीमन्मल्लिजिनायतनोद्धारकर्तृपुरिमतालपुरीयवागुरुश्रेष्ठ्यादीनामिव । तथाविधसंहननाद्यभावात्तद्भव एव सिद्धिमप्राप्नुवत्सु प्रेत्य सुरसम्पदां च कारणमेवासौ । यथा-आयान्त्यायतने यतो यतिजनाः, कुर्वन्ति सद्देशनां, श्रुत्वाताममलाशयः श्रयति सद्ज्ञानं तथा दर्शनम्, चारित्रं खलु देशतः स लभते द्राक् सर्वतोऽपि वा तत्, जीर्णोद्धारकरः क्रमात् सुरशिवश्रीभाजनं जायते इति ॥११०॥

जीर्णोद्धारचिन्तानन्तरं पुनः कृत्यान्तरमाह-

**पुणोवि चिंतए तत्थ, समुग्गाईण किच्चयं ।**
**अन्नं च दुत्थियं जं तु, तं सव्वं सुत्थियं करे ॥१११॥**

**व्याख्या-'पुणो वि०'** पुनरपि चिन्तयति (**'समुग्गाइण'**त्ति) सुरक्षणीयत्वेन रत्नसमुद्गकवत् समुद्गको देवगृहभाण्डागारः, आदिशब्दादायव्ययस्थानानि, तेषां **कृत्यं-** सम्यग् रक्षणादि, अन्यद्वा देवार्चकप्राहरिकादिकं **दुःस्थितं-** स्वस्वव्यापारातत्परं अल्पाजीविकादुःखितं वा तत्सर्वं सुस्थितं कुर्यादिति ॥१११॥



For Private and Personal Use Only

एवं च चैत्यचिन्तां कुर्वतः कस्यचित् चैत्यद्रव्यविप्रनाशोऽपि स्यादतस्तद्वक्तव्यतां सदृष्टान्तां चतुर्दशसूत्र्याह-

**भक्खेइ जो उविक्खेइ, जिणदव्वं तु सावओ ।**

**पन्नाहीणो भवे सो उ, लिप्पए पावकम्मणा ॥११२॥**

**व्याख्या-'भक्खेइ जो उविक्खे०'** नवरं **भक्षणं-** देवद्रव्यस्य तदुपचारस्य वा स्वयमुपजीवनं, **उपेक्षणं-** तदेव परस्य कुर्वतः शक्तितोऽनिवारणं, **प्रज्ञाहीनत्वम्-**अज्ञोद्धारदानादिना देवद्रव्यविनाशः ॥११२॥

**धम्मं सो न याणेइ, जिणं वा वि जिणागमं ।**

**भक्खेइ जो उविक्खेइ, जिणदव्वं तु सावओ ॥११३॥**

**व्याख्या-'धम्मं सो०'** नवरं भक्षणोपेक्षणयोः पुनर्ग्रहणमनयोरतिदुष्टताख्यापनार्थम् ॥११३॥

**अहवा नरयाउयं तेण, बद्धं चेव न संसओ ।**

**तत्तोवि सो चुओ संतो, दारिद्देण न मुच्चइ ॥११४॥**

**व्याख्या-'अहवा०'** सुगमा ॥११४॥

**पमायमित्तदोसेणं, जिणरित्था जहा दुहं ।**

**पत्तं संकाससड्ढेणं, तहा अन्नो वि पाविही ॥११५॥**



For Private and Personal Use Only

व्याख्या-'**पमाय०**' सुगमा ॥११५॥ संकाशकथानकं गाथादशकेनाह-

**संकास गंधिलावइ, सक्कवयारंमि चेइए कहवि ।**
**चेइय दव्वुवओगी पमायओ मरणसंसारे ॥११६॥**

**व्याख्या-'संकास०'** इह संकाशनामा श्रावकः स्वभावादेव भववैराग्यवान् गन्धिलावत्यामभूत् । स च शक्रावतारचैत्ये गृहव्याक्षेपादिकारणै**श्चैत्यद्रव्योपयोगी-** देवद्रव्योपजीवकः **प्रमादतो-**ऽज्ञानसंशयविपर्यासादनालोचिताप्रतिक्रान्तो मरणमाप । ततः संसारे ॥११६॥

**तन्हाछुहाभिभूओ, संखिज्जे हिंडिऊण भवगहणे । घायणवायणचुन्नण-वियणाउ पाविउं बहुसो ॥११७॥**

**व्याख्या-'तन्हा०'** तृष्णाक्षुदभिभूतः संख्येयानि **हिण्डित्वा-** भ्रान्त्वा भवग्रहणानि । तेषु च घातनवाहनचूर्णनरूपा वेदनाः प्राप्य **बहुशो-**ऽनेकश एकैकस्मिन् भवे इत्यर्थः । तत्र घातनमसिकुन्तादिभिश्छेदनं । वाहनं लवणगंत्र्याद्याकर्षणम् । चूर्णनं मुद्गरादिकुट्टनम् ॥११७॥

**दारिद्दकुलुप्पत्तिं, दरिद्दभावं च पाविउं बहुसो ।**
**बहुजणधिक्कारं तह, मणुएसु वि पाविउं बहुसो ॥११८॥**
**तगराए इब्भसुओ, जाओ तक्कम्मसेसयाओ अ ।**
**दारिद्दमसंपत्ति, पुणो पुणो चित्तनिव्वेओ ॥११९॥**



For Private and Personal Use Only

 

**केवलिजोगे पुच्छा, कहणे बोही तहेव संवेओ ।**
**किं इत्थमुचियमिण्हिं, चेइयदव्वस्स वुड्ढित्ति ॥१२०॥**
**गासच्छायणमित्तं, मुत्तुं जं किंचि मज्झ तं सव्वं ।**
**चेईयदव्वं नेअं, अभिग्गहो जावजीवाए ॥१२१॥**

**व्याख्या-**दरिद्रकुलोत्पत्तिमाजन्म दरिद्रभावं च तत्र प्राप्य बहुशः । तथा यतः कुतोऽपि निमित्तादनिमित्ताद्वा बहोर्जनस्य **धिक्कारम्-**अवर्णवादम् । तथेति समुच्चये । मनुष्येष्वपि समुत्पन्नो गर्हणीयमन्यदपि पुत्रकलत्रादिकं प्राप्य **बहुशः-** पुनः पुनः, बहुशोग्रहणं धिक्कारादिदुःखप्राचुर्यख्यापनार्थम् ॥११८॥

पश्चात्तगरायां पुरि इभ्यसुतः संजातः । कस्यां सत्यामित्याह-तत्कर्मशेषतायां तु **तस्य** चैत्यद्रव्योपयोगकालोपार्जितस्य **कर्मणो-** लाभान्तरायादेः **शेषो**ऽवशिष्टता, तस्य भावः । तस्यां सत्यामेव परं तत्रापि **दारिद्र्यं**-निर्धनत्वं, **असंप्राप्ति**र्वाञ्छितस्य । **पुनः पुन**रसकृच्चि**त्तनिर्वेदो** हृदयोद्वेगरूपोऽन्यदा च केवलियोगे जाते सति पृच्छा तेन कृता । यथा-भगवन् ! मया भवान्तरे किं कर्म कृतम्, येनासम्पद्यमानमनोरथोऽहं सम्भूतः । **कथने-** सङ्काशादिभवग्रहणवृत्तान्तस्य केवलिना कृते **बोधि**र्जिनधर्मप्राप्तिस्ततः संवेगस्तस्याजनि । पप्रच्छ च '**किमत्र-** चैत्यद्रव्योपयोगापराधे मम कर्तुमुचितमिदानीं, भणितं केवलिना, यथा-**चैत्यद्रव्यस्य-** जिनभवनबिम्बयात्रास्नात्रादिप्रवृत्तिहेतोर्हिरण्यादेर्वृद्धिः कर्तुमुचिता । ततोऽस्य ग्रासाच्छादनमात्रं मुक्त्वा यत्किञ्चिदन्यन्ममाधिकं व्यवहारतः सम्पत्स्यते तत् सर्वं चैत्यद्रव्यं ॥५५॥

ज्ञेयम्, न मया भोक्तव्यमित्यभिग्रहो यावज्जीवमभूदिति ||१२१||

**सुहभावपवित्तीए, संपत्तीऽभिग्गहंमि निच्चलया ।**
**चेईहरकारवणं, तत्थ सयाभोगपरिसुद्धी ||१२२||**

**व्याख्या-'सुहभाव०'** तस्यैवं महात्मनो गृहीतमहाभिग्रहस्य **शुभभावप्रवृत्तितो-**ऽतीव चैत्यद्रव्यदित्सावशादुत्लसद्विशिष्टाशयसंयोगाल्लाभान्तरायक्षयोपशमस्तस्माच्च **सम्पत्तिः-** प्रभूततरविभूतिसम्प्राप्तिस्तस्यां सत्यामपि **अभिग्रहे निश्चलता-** निजनियमे दृढता, न तु 'यथा लाभस्तथा लोभ' इति वचनात्तस्य तद्द्रव्यविषये स्वप्नान्तरेऽप्युपभोक्तुकामिता । ततः **'चेईहर०'** तस्यामेव तगरायां पुरि जिनायतननिर्मापणं विहितम् । **'तत्थ स०' तत्र-** चैत्यविधापने संश्चासौ आभोगश्च **सदाभोगः** शास्त्रपरतन्त्रो विमर्शस्तत्पूर्वं भूम्यादेः **परि-**समंताच्छोधनं सदाभोगपरिशुद्धिः । यदुक्तम्-

**'जिणभवणकारणविही सुद्धा भूमी दलं च कट्ठाई । भिइगाणं असंधाणं सासयबुद्धी(वुड्ढी) य जयणा य ||१||**

अस्याः किञ्चिद्व्याख्या- **शुद्धा भूमि**र्द्रव्यतोऽस्थिशङ्क्वादिशल्यरहिता, भावतः परानुपतापिनी शुद्धा भूमिः । दलं काष्टेष्टकादि तत्कारिभ्य उचितक्रयेण क्रीत्वा गवाद्यनाबाधया वाऽऽनीतं । **भृतकासन्धानम्-** कर्मकराणां वेतनाऽवञ्चनं । **स्वाशयवृद्धिः-** पश्चात्तापादिदोषरहितत्वेन निजचित्तोत्साहः । **यतना च** वस्त्रपूतोदकादिकेति । यद्वा तत्र चैत्यविधापने निषदनादौ क्रियमाणेऽपि **सदाभोगपरिशुद्धि**र्वक्ष्यमाणाशातनापरिहारः ||१२२||



For Private and Personal Use Only

**निट्ठीवणाइकरणं, असक्कहाणुचिय आसणाई य ।**
**आययणंमि अभोगो, इत्थ देवा उदाहरणं ॥१२३॥**

**व्याख्या-'निट्ठीवणा०'** निष्ठीवनादेः **करणं-** विधानं । आदिशब्दाच्छेषाशातनापरिग्रहः । तथाऽ**सत्कथा** राजकथाद्याः । **अनुचितासनादि चा**नुचितमासनं गुरुजनापेक्षया उच्चं समं वा । आदिशब्दात्पर्यस्तिकादि । असत्कथानुचितासनानामाशातनान्तर्गतत्वेऽपि पृथग्ग्रहणमेषां महावज्ञास्पदत्वेनातिशयवर्जनख्यापनार्थम् । एतत्सर्वं किमित्याह- **आयतने-** जिनगृहे अभोगो वर्तते, नञः कुत्सार्थत्वात् कुत्सितो भोगश्चैत्यगृहोपजीवनमभोगस्तस्य महाशातनाफलत्वेन दुर्गतिहेतुकत्वादिति । **अत्र-** भोगपरिशुद्धौ **देवा** भवनपत्यादय उदाहरणम् ॥१२३॥ एतदेव भावयति-

**देवहरयंमि देवा, विसयविसमोहिया वि न कया वि ।**
**अच्छरसाहिं पि समं, हासखिड्डाइं वि न कुणंति ॥१२४॥**

**व्याख्या-'देवहर०' देवगृहे-** नन्दीश्वरादिगतचैत्यभवनरूपे विषयविषविमोहिता अपि न कदाचिदपि अप्सरोभिरपि स्वप्राणाधिकप्रेमपदप्राप्ताभिः समं **हासं** प्रतीतं, **खेला-** क्रीडा आदिशब्दाच्चित्रचसूरीवचनपरिग्रहः । **अपि** शब्दात् स्थूलाशेषापराधावरोधो दृश्यः ॥१२४॥

**इय सो महाणुभावो, सव्वत्थ वि अविहिभावचाएण ।**
**चरिउं विसुद्धधम्मं, अक्खलिआराहओ जाओ ॥१२५॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**व्याख्या-'इय सो०' इत्ये**वमुक्तनीत्या **स** सङ्काशजीवो **महानुभावः-** समुद्घटितप्रशस्तसामर्थ्यः **सर्वत्र-** सर्वकृत्येष्व**विधिभावत्यागेना**नुचितप्रवृत्तिनिरोधेन **चरित्वा-** निषेव्य **विशुद्धधर्मं** श्रुतचारित्रलक्षणमस्खलिताराधको निर्वाणस्य साधकः सञ्जात इति गाथा चतुर्दशकार्थः ||१२५||

देवद्रव्यवक्तव्यतां सदृष्टान्तमभिधाय साम्प्रतं तस्य साधारणद्रव्यस्य च तुल्यदोषोद्भावयिषयाह-

**चेइयदव्वं साहारणं, च जो दुहइ मोहियमईओ ।**
**धम्मं च सो न याणइ, अहवा बद्धाउओ नरए ||१२६||**

**व्याख्या-'चेइय०' चैत्यद्रव्यं** प्रसिद्धम् । **साधारणं** च चैत्यपुस्तकापद्गतश्रावकादिसमुद्धरणयोग्यम् ऋद्धिमच्छ्रावककृतसमुद्गकरूपम् । ते द्वे अपि यो **द्रुह्यति-** विनाशयति **दोग्धि वा-** व्याजव्यवहारादिना तदुपयोगमुपभुङ्क्ते, **मोहितमतिकः-** क्लिष्टकर्मोदयात् मूढीकृतचेतस्कः । **'धम्मं चे'** ति प्राग्वदिति ||१२६|| अन्यच्च-

**चेइयदव्वविणासे, तद्दव्वविणासणे दुविहभेए ।**
**साहू उविक्खमाणो, अणंतसंसारिओ भणिओ ||१२७||**

**व्याख्या-'चेइय०' चैत्यस्य**-जिनायतनस्य **द्रव्यं**-हिरण्यसुवर्णादि तस्य विनाशे, तथा **तस्य-** चैत्यस्य **द्रव्यं** दारूपलेष्टिकादि, तस्य **विनाशने-** विध्वंसने, किंभूते ? **द्विविधे-** वक्ष्यमाणविनाशनीयद्विविधवस्तुविषयत्वेन द्विप्रकारे, केनचित् क्रियमाणे सति, **साधुः** सावद्यव्यापारनिवृत्तोऽपि **उपेक्षमाणो-** देशनादिभिरनिवारयन्न**नन्तसंसारिको-**



For Private and Personal Use Only

दुर्लभबोधिको भणितः । यदुक्तम्-'**चेइयदव्वविणासे, इसिघाए पवयणस्य उड्डाहे । संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥१॥**' विनाशो भक्षणोपेक्षणादिलक्षणोऽत्रावसेय इति ॥१२७॥ द्वैविध्यमेवाह-

**जोग्गं अईयभावं, मूलुत्तरभावओ अहव कट्ठं ।**
**जाणाहि दुविहमेयं, सपक्खपरपक्खमाई वा ॥१२८॥**

**व्याख्या-'जोग्गं अई०' योग्यं-** चैत्यनिमित्तं नव्यमानीतम् । **अतीतभावं-** लग्नोत्पाटितम् । अथवा मूलोत्तरभेदतः । तत्र मूलद्रव्यं स्तम्भकुम्भिकादि । उत्तरद्रव्यं तु च्छादनादि । तत्किमित्याह-'**कट्ठं**' ति, काष्टं, काष्ठस्योपलक्षणत्वादिष्टिकोपलादि च स्वपक्षपरपक्षजनितविनाशद्वैविध्याद्वा । तत्र स्वपक्षः साधर्मिकवर्गः । परपक्षो वैधर्मिकलोकः । एवमनेकप्रकारं तच्चैत्यद्रव्यं जानीहि द्विविधमिति ॥१२८॥

चैत्यद्रव्यविनाशदोषं प्रसङ्गतो गुरुद्रव्यविनाशदोषं च व्यवहारभाष्यगाथादिभिर्दर्शयति-

**चेइयदव्वं विभज्ज, करिज्ज कोइ नरो सयट्ठाए ।**
**समणं वा सोवहियं, विक्किजा संजयट्ठाए ॥१२९॥**

**व्याख्या-'चेइय०'** चैत्यद्रव्यं चौराः समुदायेनापहृत्य तन्मध्ये कश्चिन्नर आत्मीयेन भोगेन स्वयमात्मनोऽर्थाय मोदकादि कुर्यात् । कृत्वा च संयतानां दद्यात् । यो वा संयतार्थाय श्रमणं सोपधिकं विक्रीणीयात् । विक्रीय च तत् प्रासुकं वस्त्रादि संयतेभ्यो दद्यात् ॥१२९॥



For Private and Personal Use Only

**एयारिसंमि दव्वे, समणाणं किं न कप्पए घित्तुं ।**
**चेइयदव्वेण कयं, मुल्लेणं जं सुविहियाणं ||१३०||**
**तेणपडिच्छा लोए, वि गरहिया उत्तरे किमंग पुणो ।**
**चेइयजइपडिणीया, जो गिण्हइ सो वि हु तहेव ||१३१||**

**व्याख्या-'एयारिसं' 'तेणप०'** एताद्दशेन द्रव्येण, गाथायां सप्तमी तृतीयार्थे, यत् आत्मार्थं कृतं तत् श्रमणानां किं ग्रहीतुं कल्पते ? सूरिराह-यच्चैत्यद्रव्येण यच्च वा सुविहितानां मूल्येनात्मार्थं कृतं तद्वितीर्यमाणं न कल्पते । किं कारणमिति चेदुच्यते स्तेनानीतस्य **प्रतीच्छा**-प्रतिग्रहणं लोकेऽपि गर्हिता किमङ्ग पुनरुत्तरे, तत्र सुतरां गर्हिता । तत**श्चैत्य-यतिप्रत्यनीकात्**-चैत्ययतिप्रत्यनीकस्य हस्ताद् यो गृह्णाति सोऽपि, **हु**र्निश्चितम्, **तथैव**- चैत्ययतिप्रत्यनीक एव ||१३०-१३१||

एनमेवार्थं समर्थयन्नाह-

**चेइयदव्वं गिण्हित्तु, भुंजए जो उ देइ साहूणं ।**
**सो आणा अणवत्थं, पावइ लिंतो वि दिंतो वि ||१३२||**

**व्याख्या०-'चेइय०'** चैत्यद्रव्यमुपलक्षणत्वाद् गुरुद्रव्यं च पूर्वोक्तप्रकारं गृहीत्वा यः स्वयं भुङ्क्तेऽन्येभ्यश्च साधुभ्यो ददाति **स** साधुर्गृह्णानोऽपि दददपि भगवदा**ज्ञाभङ्गः**- प्रवचननिषिद्धाचरणरूपस्तम् । तथा**ऽनवस्था**- तत्समाचारदर्शनादन्येषामपि कुप्रवृत्तिरूपा, तां च प्राप्नोति । उपलक्षणत्वान्मिथ्यात्वविराधने च । तत्र मिथ्यात्वं यथा प्रतिज्ञा



For Private and Personal Use Only

तस्याकरणादलीकत्वं । विराधना तु संयमात्मप्रवचनोपघातभेदात्त्रिधा । तत्राद्याऽन्यायोपात्तवस्तुत्वात् १ । द्वितीया प्रत्यनीकदेवादिछलनरूपा २ । तृतीया प्रवचनमूलयतिचैत्ययोरुपद्रवेण स्तेनप्रतीच्छया च सुप्रतीतैव ॥१३२॥

वेदान्तेऽप्युक्तम्-

**देवद्रव्येण या वृद्धि-र्गुरुद्रव्येण यद्धनम् ।**
**तद्धनं कुलनाशाय, मृतोऽपि नरकं व्रजेत् ॥१३३॥**
**प्रभास्वे मा मतिं कुर्यात्, प्राणैः कण्ठगतैरपि ।**
**अग्निदग्धाः प्ररोहन्ति, प्रभादग्धो न रोहति ॥१३४॥**
**प्रभास्वं ब्रह्महत्या च, दरिद्रस्य च यद्धनम् ।**
**गुरुपत्नी देवद्रव्यं, स्वर्गस्थमपि पातयेत् ॥१३५॥**
**एवं जो जिणदव्वं तु, सड्ढो भक्खे उविक्खए ।**
**विसं सो भक्खए बालो, जीवियड्ढी न संसओ ॥१३६॥**
**जे पुणो जिणदव्वं तु, वुड्ढिं निंति सुसावया ।**
**ताणं रिद्धी पवड्ढेइ, कित्ती सुक्खं बलं तहा ॥१३७॥**



For Private and Personal Use Only

**पुत्ता य हुंति से भत्ता, सोंडीरा बुद्धिसंजुया ।**
**सव्वलक्खणसंपन्ना, सुसीला जणसंमया ॥१३८॥**
**संकासो विव भित्तूणं, कम्मगंठिं सुनिव्वुडो ।**
**जाहिही सो उ निव्वाणं, महासत्तो न संसओ ॥१३९॥**

**व्याख्या-देवद्रव्येण०, प्रभास्वे मा मतिं०, प्रभास्वं०, एवं जो०, जे पुणो०, पुत्ता य०, संकासो विव०,** अत्र च **'जे पुणो'** इत्यादौ बहुवचनोद्दिष्टानामप्येकवचननिर्देशादीदृशो महासत्त्वः कश्चिदेव भवतीति ज्ञापनार्थम् ॥१३३-१३९॥

महासत्त्वतामेवाह-

**नो माया नो पिया भज्जा, न सरीरं नेव बंधवा ।**
**पिच्छए तत्थ ठाणंमि, जत्थ अत्थं तु पिच्छए ॥१४०॥**
**अलुद्धो जो उ दव्वंमि, जिणदव्वं नेय वित्थरं ।**
**एएण सो महासत्तो वुच्चए, जिणसासणे ॥१४१॥**

**व्याख्या-'नो माया नो पिया०', 'अलुद्धो०'** यतो जीवः सर्वोऽपि धनार्थं बहूनपि क्लेशान् सहते । यथा-
**''यद् दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरम्, गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते ।**



For Private and Personal Use Only

**सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरम्, सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ||१||'**

यः पुनः सन्तोषसुधासारसंसारसिक्तस्वान्तवृत्तित्वात्तस्मिन्नपि द्रव्येऽलुब्धः सर्वथाप्यगृद्धः सन् जिनद्रव्यं सम्यग् रक्षणादिना विस्तारं नयति, स एतेन कारणेन महासत्त्व उच्यते जिनशासने इति ||१४||

देवद्रव्यभक्षणादिषु स्वस्वफलं त्रिसूत्र्याह-

**जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं ।**
**भक्खंतो जिणदव्वं, अणंतसंसारिओ होइ ||१४२||**
**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।**
**रक्खंतो जिणदव्वं, परित्तसंसारिओ होइ ||१४३||**
**जिणपवयणवुड्ढिकरं, पभावगं नाणदंसणगुणाणं ।**
**वड्ढंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो ||१४४||**

**व्याख्या०-'जिणपवयण०', 'जिणपवयण०' 'जिणपवयण०'** सुबोधाः । नवरं सति हि देवद्रव्ये प्रत्यहं जिनायतने पूजासत्कारसम्भवस्तत्र च प्रायो यतिजनसम्पातः । तद्व्याख्यानश्रवणादेश्च जिनप्रवचनवृद्धिः । एवं च ज्ञानादिगुणानां प्रभावना च १ । **परीत्तसंसारिक** इति आसन्नमुक्तिगमनादल्पभवस्थितिकः २ । तीर्थकरत्वलाभस्तु देवद्रव्यवृद्धिकर्तुरर्हत्प्रवचनभक्त्यतिशयात् सुप्रसिद्ध एव ३ || १४२-१४३-१४४|| उपसञ्जिहीर्षुराह-



For Private and Personal Use Only

 

**एवं नाऊण जे दव्वं, वुड्ढिं निंति सुसावया ।**
**जरामरणरोगाणं, अंतं काहिंति ते पुणो ||१४५||**

**व्याख्या-'एवं नाऊण०'** सुगमा । नवरं द्रव्यमिति प्रस्तावाद् देवद्रव्यम् ||१४५||

श्रवणद्वार एव विधिविशेषमाह-

**अह धम्मदेसणत्थं, तत्थ सूरी न आगओ ।**
**पुव्वुत्तेण विहाणेणं, वसहीए गच्छए तओ ||१४६||**

**व्याख्या-'अह धम्मदेसण०'** केनचित्कारणेन **तत्र-** चैत्ये धर्मदेशनार्थं सूरिर्नागतः । ततोऽसौ ऋद्धिमान् श्रावकः **पूर्वोक्तविधानेन-** हयगजप्रकारेण इतरस्तु सामायिकप्रतिपत्तिविधिना **वसतौ-** साधूपाश्रयं गच्छतीति ||१४६||

चैत्य एव साधवः किं न तिष्ठन्तीत्याद्याशङ्कां व्यवहारगाथाभिर्निरस्यन्नाह-

**जइवि न आहाकम्मं, भत्तिकयं तहवि वज्जयंतेहिं ।**
**भत्ती खलु होइ कया, जिणाण लोए वि दिट्ठंतो ||१४७||**

**व्याख्या-'जइवि न आ०'** यद्यपि भक्तिकृतमायतनादि भगवतां नाधाकर्म । तथापि तद्वर्जयद्भिः **खलु-** निश्चयेन भक्तिर्जिनानां कृता भवति । इदं तु लोकेऽपि दृष्टं ||१४७|| तदेव दर्शयति-



For Private and Personal Use Only

**बंधित्ता कासवओ, वयणं अट्ठपुड सुद्धपुत्तीए ।**
**पत्थिवमुवासए खलु, वित्तिनिमित्तं भया चेव ॥१४८॥**

**व्याख्या-'बंधित्ता का०' काश्यपः-** कौटुम्बिकः वृत्तिनिमित्तं भयाद्वा । पार्थिवस्थानीयायास्तीर्थकरप्रतिमाया भक्तिनिमित्तमायतनं साधवः प्रविशन्ति, न तु तत्रैव तिष्ठन्ति ॥१४८॥ कुत इत्याह-

**दुब्भिगंधमलस्सावी, तणुरप्पेसण्हाविया ।**
**दुहा वाउपहो चेव, तेणट्ठंति न चेइए ॥१४९॥**
**तिन्नि वा कड्ढइ जाव, थुईओ तिसिलोइया ।**
**ताव तत्थ अणुन्नायं, कारणेण परेणवि ॥१५०॥**

**व्याख्या-'दुब्भिगंध० तिन्नि वा कड्ढई०'** एषा तनुः स्नापितापि दुरभिगन्धप्रस्वेदपरिश्राविणी । तथा द्विधा वायुपथोऽधोवायुनिर्गम उच्छ्वासनिःश्वासनिर्गमश्च । तेन कारणेन चैत्यायतने साधवो न तिष्ठन्ति । अथवा श्रुतस्तवानन्तरं तिस्रः स्तुतीस्त्रि**श्लोकिकाः-** श्लोकत्रयप्रमाणा यावत् कर्षन्ति तावत्तत्र चैत्यायतनेऽवस्थानमनुज्ञातं । कारणेन कारणवशात् परेणाप्यवस्थानमनुज्ञातमिति । 'उज्जिंतसेलसिहरे' इत्याद्यपि बहुश्रुताचीर्णत्वादविरुद्धमेव । चतुर्थीपर्युषणाचरणावदिति ॥१४९-५०॥



For Private and Personal Use Only

एवं चैत्यावस्थायित्वं व्युदस्य तत्रैव व्याख्यानविधिमाह-

**निस्सकडे वा ठाइ, गुरू कइवयसहिओ इयरा व वसहिं ।**
**अह तत्थ अनिस्सकडं, पूरिंति तहिं समोसरणं ॥१५१॥**

**व्याख्या-'निस्संक०'** चैत्यानि तावच्छाश्वतादीनि चतुर्धा । तत्र शाश्वतचैत्यं नन्दीश्वरादिषु १ । भक्तिचैत्यम-निश्राकृतनिश्राकृतभेदात् द्विधा । तत्रानिश्राकृतं यत् साधुसत्तारहितं, यथा अष्टापदादिषु । निश्राकृतं यत्साधुनिश्रया क्रियते २ । मङ्गलचैत्यमुत्तरङ्गादिषु यथा मथुरायाम् ३ । साधर्मिकचैत्यं वारत्रिकप्रतिमादि ४ । तत्र निश्राकृते चैत्ये गुरुर्व्याख्यानार्थं कतिपयपरिणतसाधुसहितस्तिष्ठति । इतरे शिक्षकादयो व्रजन्ति वसतिम् । अथ च तत्रानिश्राकृतं चैत्यमस्ति तदा **'पूरिंति तहिं समोसरणं'** ति तत्र चैत्ये सपरिवारा आसत इति ॥१५१॥

किमेवं न निश्राकृतेऽपीत्याह-

**उसन्नावि तत्थेव, इंती चेइयवंदया ।**
**तेसिं निस्साइ तं भवणं, सड्ढाईहिं कयं परं ॥१५२॥**

**व्याख्या-'उसन्नावि०'** अवमग्ना अपि चैत्यवन्दनकास्तत्रायान्त्येव । यतस्तज्जिनभवनं श्राद्धादिभिः परं तेषां निश्रया कृतमिति ॥१५२॥ ततः किमित्याह-



For Private and Personal Use Only

**सेहाणं मंदसद्धाणं, दट्टुं ताण तु चिट्ठियं ।**
**मंदा सड्ढा जओ होइ, अणुट्ठाणे जिणाहिए ॥१५३॥**

**व्याख्या-'सेहाणं मं०'** तत्र **तेषां** पुनरवमग्नानां चेष्टितं 'दगपाणं पुप्फफल' मित्यादिकं दृष्ट्वा **शैक्षकाणाम**भिनवदीक्षितानां **मन्दश्रद्धानां** चातिपरिणामिकादीनां, मन्दा श्रद्धा यतो भवत्यनुष्ठाने जिनाख्याते व्रतसमित्यादिके क्रियाकलापे ॥१५३॥

मन्दश्रद्धत्वाच्च ते यदभिधारयन्ति तदाह-

**एएवि साहुणो लोए, अम्हे वि मलकिण्णया ।**
**एएण कारणेणं तु, वसहिं पेसंति साहुणो ॥१५४॥**

**व्याख्या-'एए वि सा०'** एवंविधा अप्येते साधवो लोके तावद्वन्दनादिभिः सत्क्रियन्ते । वयं पुनरेवमेव **मलक्लिन्नका-** मलाविलगात्रोपधयः । एवं च तेषां भगवदाज्ञामपह्नुवानानां भावचारित्रमप्यपैति । तेनैव कारणेन तान् साधून् शैक्षकान् वसतिं सूरयः प्रेषयन्ति ॥१५४॥ प्रस्तुतमाह-

**विहिणा तत्थ वंदित्ता, सुणित्ता धम्मदेसणं ।**
**तओ य घरवावारे, कुणई सुद्धे सुसावओ ॥१५५॥**



For Private and Personal Use Only

 

**व्याख्या**-'**विहिणा त०**' स द्विविधोऽपि श्रावकस्**तत्र**- वसतौ । **विधिने**ति नैषेधिकीत्रयकरणपूर्वकं प्रविश्य वन्दनकस्थानद्विनवत्यधिकशतसत्यापनक्रमेण वन्दित्वा गुर्वादीन् । श्रुत्वा च गुर्वन्तिके धर्मदेशनां ततश्च स्वस्थानमागत्य **गृहव्यापारान्**- स्वकुलोचितव्यवसायान् वक्ष्यमाणकर्मादानकूटक्रयादिदोषपरिहारेण **शुद्धान्** करोतीति ॥१५५॥

॥ इति द्वारसप्तकव्याख्या ॥

साम्प्रतं श्रवणद्वारानन्तरं चतुर्दशं व्यवहारशुद्धिद्वारं । तत्र प्रथमं पञ्चदशकर्मादानवर्जनाय द्विसूत्रीमाह-

**लक्खं विसं च लोहं च इंगाल-वणछेयणं ।**
**भाडिं फोडिं च, वज्जिज्जा दंतसंखवणिज्जयं ॥१५६॥**
**वज्जे रसकेसवाणिज्जं, तहा जंताण पीलणं ।**
**सर-दह-तलायसोसं, दवग्गिदावणयं तह ॥१५७॥**

**व्याख्या**-'**लक्खं विसं०**' तत्र **लक्खं**ति लाक्षा-मनःशिला-नीली-धातकी-टंकणादीनां विक्रयो लाक्षावाणिज्यम्, तद्वर्जयेदिति योगः । '**विसं चे**'ति विषायोऽस्त्रहलयन्त्रहरितालादीनां विक्रयो विषवाणिज्यम् । लोहस्य पृथगुपादानमतिसावद्यहेतुत्वख्यापनार्थम् २ । चशब्दाच्छकटकर्म । तच्च शकटस्य घटनखेटनविक्रयरूपम् ३ ॥ '**इंगाल**'त्ति अङ्गारभ्राष्टकुम्भायःस्वर्णकारिता, ठठारत्वेष्टिकापाकौ चेत्याद्यङ्गारकर्म ४ । **वणछेयणं**ति० छिन्नाछिन्नवनपत्रपुष्पफलविक्रयेण कणदलनादिना च वृत्तिर्वनकर्म ५। '**भाडिं**'ति शकटोक्षमहिषोष्ट्रखराश्वतरवाजिनां भारस्य वाहनाद् वृत्ति- 

For Private and Personal Use Only

भाटककर्म ६ । '**फोडिं**'ति सरःकूपादिखननशिलाकुट्टनादिस्फोटकर्म ७ । '**दंतसंखवणिज्जयं**'ति दन्तकेशनखशृङ्गत्वक्रोमकपर्दशङ्खशुक्त्यादीनां पञ्चेन्द्रियविकलेन्द्रियाङ्गानामाकरे क्रयो दन्तशङ्खवाणिज्यम् ८। तथा '**रसकेसवाणिज्जं**'ति० नवनीतवशामधुमद्यादिक्रयो रसवाणिज्यम् ९ । द्विपाच्चतुःपादविक्रयः केशवाणिज्यं, तच्च १० । तथाशब्दस्यानुक्तसमुच्चयार्थत्वान्निर्लाञ्छनकर्म च, तच्च नाशावेधाङ्कनमुष्कच्छेदनपृष्टगालनकर्णकम्बलच्छेदादीनि ११ । '**जंताण पीलणं**' ति तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् १२ । '**सरदहतलायसोसं**'ति सरोह्रदतटाकशोषः कृष्याद्यर्थं, तच्च १३ ।' '**दवग्गिदावणयं**'ति व्यसनात् पुण्यबुद्ध्या वा दवाग्निप्रज्वालनम् १४ । तथाशब्दादसतीपोषश्च । शारिकाशुकमार्जारश्वकुर्कुटकलाप्यादीनां वित्तार्थं दास्याश्च पोषणं, तच्च १५ । एतानि पञ्चदशकर्मादानानि । उपलक्षणत्वाच्चैषां बहुसावद्यगुप्तिपालनादिनियोगांश्च वर्जयेदिति सूत्रद्वयार्थः ॥१५६-१५७॥

अधुना कूटवाणिज्यनिषेधार्थमाह-

**कूडं माणं तुलं चेव, वज्जे तप्पडिरूवयं ।**
**लोए लोउत्तरे चेव, निंदियं जं वणिज्जयं ॥१५८॥**

**व्याख्या-'कूडं माणं०' मानं-** सेतिकाकर्षादि । तच्च **कूटं-** न्यूनाधिकम् । **तुला च-** तोल्यवस्तूपकरणम् । कूटत्वं तथैव । तथा **तत्प्रतिरूपकम्-तेषु** व्रीहिघृतमञ्जिष्ठादिषु **प्रतिरूपाणां-** तत्सदृशानां पलञ्जी-वशा-चित्रकादीनां प्रक्षेपो यत्र व्यवहारे स तत्प्रतिरूपकस्तं च, किं बहुना ? **लोके-** प्राकृतजने कूटक्रयादिवाणिज्यं **निन्दितम**ल्पसावद्यमपि ॥६९॥

यद्गर्हितं, **लोकोत्तरे च** तिलभाण्डशालादिकुत्सितं, तच्च वर्जयेदिति ||१५८|| व्यवहारशुद्धिमेवोत्तरोत्तरगुणभूतां त्रिसूत्र्याह-

**ववहारसुद्धी धम्मस्स, मूलं सव्वन्नु भासए ।**
**ववहारेणं सुद्धेणं, अत्थसुद्धी जओ भवे || १५९||**

**व्याख्या-'ववहार०'** अनन्तरोक्ता हि **व्यवहारशुद्धि**र्मनोवाक्कायावक्रतारूपा, सा च धर्मस्य **मूलमा**द्यं कारणं । **सर्वज्ञः**- तीर्थकृद् **भाषते**-'सोही उज्जुयभूयस्स धम्मो सुद्धस्स चिट्ठई' इत्यादि व्यक्तवाग्भिर्ब्रूते । यतो व्यवहारशुद्ध्यैव अर्थशुद्धिरपि भवेदतः सैव धर्मस्य मूलम् ||१५९||

**सुद्धेणं चेव अत्थेणं, आहारो होइ सुद्धओ ।**
**आहारेणं तु सुद्धेणं, देहसुद्धी जओ भवे ||१६०||**

**व्याख्या-'सुद्धेणं चेव०'** शुद्धेनैवार्थे**नाहारो** ऽशनादि 'नायागयाण'मित्यादिवचनबला**च्छुद्धो**-निर्दोषः । आहारेण पुनः शुद्धेन यतो देहशुद्धिर्भवेत् । बाह्यमलसद्भावेऽपि भगवदाज्ञावर्तित्वेन कर्ममलापगमात् ||१६०||

**सुद्धेणं चेव देहेणं धम्मजोग्गो य जायई ।**
**जं जं कुणइ किच्चं तु तं तं से सफलं भवे ||१६१||**

**व्याख्या-**'शुद्धेनैव च देहेन धर्मयोग्यस्तु जायते । यथा हि प्रक्षालिताङ्गः सदलङ्कारार्हो भवति, तथायमपीत्थं शुद्धदेहो धर्मरत्नालङ्कारयोग्यः स्यात् । ततश्च यत् यत् करोति **कृत्यं** देवार्चादानानुष्ठानादिकं तत्तत् **'से'** तस्य **सफलं**



For Private and Personal Use Only

स्वर्गमोक्षफलप्रदमेव भवेत् । उक्तञ्च-

**'तवनियमसीलकलिया, सुसावगा जे हवंति इह सुगुणा । तेसिं न दुल्लहाइं, निव्वाणविमाणसुक्खाइं ॥१॥'**

इति सूत्रद्वयार्थः ॥१६१॥ व्यतिरेकमाह-

**अन्नहा अफलं होइ, जं जं किच्चं तु सो करे ।**

**ववहारसुद्धिरहिओ य, धम्मं खिंसावए जओ ॥१६२॥**

**व्याख्या-'अन्नहा०' अन्यथे**ति व्यवहारशुद्ध्यादिविकलस्याफलमेव भवति । नञः कुत्सार्थत्वात् यत्कृत्यं सः कुर्यात्तत्तस्य निरर्थकं स्यादित्यर्थः । **यतो-** यस्माद्धेतोर्व्यवहारशुद्धिरहितश्च **धर्ममा**र्हतमशाठ्यसाध्यम् । **'खिंसावइ'**ति गर्हयत्यविवेकिलोकसार्थैरिति ॥१६२॥ एनमेवार्थं भावयन्नाह-

**धम्मखिंसं कुणंताणं, अप्पणो य परस्स य ।**

**अबोही परमा होइ, इइ सुत्ते वि भासियं ॥१६३॥**

**व्याख्या-'धम्मखिंसं०'** धर्मगर्हां कुर्वतां जन्तूनामात्मनश्च परस्य **चाबोधि**र्दुर्लभबोधिता कृता **परमा** प्रकृष्टाऽनन्तसांसारिकत्वरूपा भवति । इत्येतत्सूत्रेऽपि च्छेदग्रन्थलक्षणे भाषितं, तथा च तत्सूत्रम्-

**'तित्थयरपवयणसुयं, आयरियं गणहरं महिड्ढीयं । आसायंतो बहुसो, अभिनिवेसेण पारंची ॥१॥**



For Private and Personal Use Only

आशातनायाश्चात्र प्रवचनावर्णवादरूपायाः स्वयं कृताया आत्मनिमित्तपरकृतायाश्च परिहारोपाये प्रकर्षेण यतितव्यम् । अत्रार्थे श्रीवीरनिदर्शनं-श्रीवीरो पितृवयस्यदूइज्जंतगाख्यतापसाश्रमे चतुर्मासीस्थितोऽन्यत्र निस्तृणत्वाद् गोष्वाश्रमतृणान्याकर्षयत्सु ते तापसा यष्टिलोष्टादिभिः पीडयन्तो गत्वा कुलपतेः प्रोक्तवन्तः कीदृशोऽयं भगवन् भवद्वल्लभः देवार्यो यः स्वाश्रममपि न रक्षति । ततोऽसौ प्रभुसमीपमभ्येत्य विनष्टप्रायमाश्रममालोक्योक्तवान् 'वत्सैते नीडजा अपि स्वनीडं रक्षन्ति तत्किं न भवान्' इत्यभिधाय कुलपतौ गते स्वाम्येवमचिन्तयत्-एते दुर्लभबोधिकत्वाः सन्तो मानन्तसंसारिकतां प्रापन्निति विचिन्त्य वर्षारात्रेऽतिक्रान्ते ततोऽस्थिकग्राममगमत् । तत्र च ब्रह्मराक्षसं प्रतिबोधितवान् ॥१६३॥

एवं व्यवहारशुद्धिविषयेऽन्वयव्यतिरेकावुपदर्श्योपदेष्टुमाह-

**तम्हा सव्वपयत्तेणं, तं तं कुज्जा वियक्खणो ।**
**जेणं धम्मस्स खिंसं तु, न करेइ अबुहो जणो ॥१६४॥**

**व्याख्या-'तम्हा स०'** स्पष्टा ॥१६४॥ अन्यच्च-

**कुसीलाणं तु संसग्गी, धम्मखिंसाइ कारणं ।**
**इह लोए परलोए य, महादुक्खाण दायगा ॥१६५॥**

**व्याख्या-'कुसीलाणं०'** सुगमा, नवरं कुशीला द्यूतकृत्यपारदारिकविटनटादयः ॥१६५॥ किंच



For Private and Personal Use Only

**वरं वाही वरं मच्चू, वरं दारिद्दसंगमो ।**
**वरं अरन्नवासो य, मा कुमित्ताण संगमो ॥१६६॥**

**व्याख्या-'वरं वा०'** स्पष्टा ॥१६६॥ एनमेवार्थं सदृष्टान्तमाह-

**विसं हालाहलं भुत्तं, जह पाणा विणासए ।**
**एवं कुमित्तसंजोगो, दुक्खहेऊ न संसओ ॥।१६७॥**

**व्याख्या-'विसं हाला०'** स्पष्टा ॥१६७॥ अभ्युच्चयमाह-

**इक्कंमि चेव जम्मंमि, मारयंति विसाइणो ।**
**कुमित्ताणं तु संजोगो, जम्मे जम्मे दुहावहो ॥१६८॥**

**व्याख्या-'इक्कंमि०'** स्पष्टा ॥१६८॥ कुमित्रसुमित्रसंसर्गे दोषगुणाविष्करणपूर्वकं दृष्टान्तप्रदर्शनायाह-

**कुमित्तसंगमाओ य, लहंती पाणिणो दुहं ।**
**सुमित्ताओ परं सुक्खं, इत्थं नायं दिवायरो ॥१६९॥**

**व्याख्या-'कुमित्त सं०'** । अक्षरार्थः सुगमः । अत्र कथा यथा-इह भरते बङ्गदेशे विश्वापुर्यां जयराज्ञश्चतुर्भुजपुरोहितसुतो दिवाकरोऽभूत् परमत्यन्तव्यसनी । सुतोऽपि गुणवान् युक्तः । यतः-



For Private and Personal Use Only

**वरं गर्भश्रावो वरमृतुषु नैवाभिगमनम्, वरं जातः प्रेतो वरमपि च कन्यैव जनिता ।**
**वरं वन्ध्या भार्या वरमगृहवासे प्रयतितम्, न चाविद्वान् रूपद्रविणबलयुक्तोऽपि तनयः ॥१॥**

ततो म्रियमाणेन पित्रा 'वत्स ! सुसङ्गं, नतु कुसङ्गं कुर्या इत्युक्तः । यतः

**'जो जारिसेण मित्तिं, करेइ अचिरेण तारिसो होइ ।**
**कुसुमेहिं सह वसंता, तिलावि तग्गंधिया हुंति ॥२॥**
**अंबस्स य निंबस्स य, दुन्हंपि समागयाइं मूलाइं ।**
**संसग्गेण विणड्डो, अंबो निंबतणं पत्तो ॥३॥'**

तेन तथा प्रतिपन्नम् । कियद्भिर्दिनैः पुरोहितपदाच्च्युतः कस्मिन् ग्रामे जरत्ठकुरसेवां कृतवान् । तस्य भृत्यपिङ्गलेन सह मैत्रीं करोति । तथा च तत्पत्न्या मित्रसेनया सह मैत्रीं कुर्वन् राजप्रमुखजनान् रञ्जयति । अन्यदा राज्ञा 'समानशीलव्यसनेषु सख्यमि'ति तुर्यवृत्तपादं विधाय भणितम्-'एनां समस्यां यः पूरयति तस्य वरं ददामि' । इति श्रुत्वा दिवाकरेण पूरिता सा ।

**'मृगा मृगैः संगमनुव्रजन्ति, गावश्च गोभिस्तुरगास्तुरङ्गैः ।**
**मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समानशीलव्यसनेषु सख्यम् ॥१॥**



For Private and Personal Use Only

ततस्तुष्टेन नृपेणोक्तम्-`भद्र ! किं ददामि' । तेनोक्तम्-`मम दारिद्र्यक्षयं कुरु' । ततस्तेन सार्धाष्टमग्रामशतं दत्तम् । ततो राज्ञा जिह्वाच्छेदे दिष्टे, मित्रीकृतं पिङ्गलदासं जीवितदापनेन, पत्नीं चैकदा मयूरमांसदोहदपूरणेन मित्रसेनां दासीमुपकृतवान् । ततो राज्ञि क्रुद्धे जीवितव्यसन्देहं प्राप्तः । कुसङ्गतिं परीक्ष्य मङ्गलपुरे गत्वा पूर्णचन्द्र-राजसुतं गुणचन्द्रकुमारं दिवाकरः सेवते स्म । अन्यदा कुमरो विपरीतशिक्षिततुरगेणाटव्यां प्राप्तः तृषाक्रान्तोऽभूत् । दिवाकरोऽपि सार्धं पक्वामलकत्रयं लात्वा गतः । तं दृष्ट्वा कुमरोऽवदत्-त्वं मां पानीयं पाहि । ततस्तदभावे दिवाक-रेणामलकत्रयमर्पितम् । राजा सन्तुष्टः स्वगृहं प्राप्तः । ततः क्रमेण नृपेणाचिन्ति-नास्ति मूल्यमेतस्य त्रयस्य । ततः कियता कालेन गुणचन्द्रो राजाऽभूत् । तस्य सम्पूर्णदिनैः सुतो जातः । स परिवारपरिवृतः सदैव दिवाकरगृहे व्रजति । तदा मन्त्री चिन्तयति `चेत् राजा मम गुरुदोषं सहते, तदा ज्ञायते राज्ञ उत्तमत्वम् । ततो गृहागतः कुमरस्तेन लब्धलक्षेण प्रच्छन्नभूमिगृहे स्थापितः । भोजनसमये राज्ञा कुमरो भानूदयं यावत् शोधितः परं न लब्धः । कथितं च परिजनेन `स्वामिन् ! मन्त्रिगृहे प्रविशन् दृष्टः' । राज्ञा कुमरशुद्धिकरणविषये पटहो दत्तः । तावता दिवाकरेण मनोरथदत्तश्रेष्ठिगृहे गत्वोक्तम्-`श्रेष्ठिन् भार्याया दोहदोत्पत्तौ मया उन्मत्तेन कुमरो व्यापादितः । कृतं च रभसवृत्त्या-ऽकार्यम्' । तथा वसन्तसेनापणाङ्गनायाश्च गृहे निवेदितम् । ततो राज्ञः पुरः श्रेष्ठिना पणाङ्गनयापि चोक्तम्-मया हतोऽस्ति । ततो द्वयोरपि मन्त्रिपण्याङ्गनयोरभयदानप्रदानपूर्वं सुसंगतिं परीक्षितवान् । तदनु मन्त्रिणा राजा भोजना-र्थमाकारितः । राज्ञो भोजनं विधाय सर्वालङ्कारविभूषितः कुमार उत्सङ्गे मुक्तः । राज्ञा विस्मितेन तुष्टचित्तेन भणितम्-



For Private and Personal Use Only

'किं कृतं' ? स्वामिन् ! तव उत्तमत्वं व्यलोकि । तत उद्याने आनन्दनामा सूरिस्तत्रागतः । तमागतं श्रुत्वा दिवाकरो वन्दित्वोपविष्टः प्रश्नयति-'भगवन् सर्वोत्तमत्वं क्वाप्यस्ति' ? गुरुणोक्तम्-'शृणु' ।

क्षितिप्रतिष्ठितपुरे जितशत्रुराजा, मन्त्री सोमदत्ताख्यः । तेन मित्रत्रयं विहितं । तत्र सह १ पर्व २ प्रणाम ३ भेदात् त्रयं । अन्यदा राजा रुष्टः । ततो भयभीतो निशायामेकाकी सहमित्रगृहे प्राप्तः । ततः सहमित्रं कथयति तावन्मैत्री यावद् राजा न रुष्यति । ततस्त्वं गृहाद् व्रज । ततः पर्वमित्रगृहे, सोऽप्येवम् । ततः प्रणाममित्रगृहे । स उत्तमत्वात् प्रश्नं करोति, तव कीदृश्यवस्थेयम् ? मह्यं नृपः कुपितः । स भणति-सर्वथा भयं मा कुरु, अहं तव पृष्टिरक्षकः । ततः स निर्भयो जातः । तेन आचार्योपदेशात् सहमित्रसमं जीवं, पर्वमित्रसमं देहं, प्रणाममित्रसमं धर्मं ज्ञात्वा दिवाकरेण दीक्षा गृहीता । नरसुरऋद्धिं प्राप्य शिवं यास्यतीत्युत्तमसेवायां दिवाकरकथा ॥१६९॥ एवं कुमित्रसुमित्रसंसर्गफलं सदृष्टान्तमुपदर्श्य सत्सङ्गमुपदिशन्नाह-

**तम्हा जे सीलसंजुत्ता, गीयत्था पावभीरुणो ।**
**ते मित्ता सव्वहा कुज्जा, इच्छंतो हियमप्पणो ॥१७०॥**

**व्याख्या-'तम्हा जे सीलसं०'** तस्मादनन्तरोक्तकारणात् ये गृहस्थाः, किं विशिष्टाः ? **शीलसंयुक्ताः**-सदाचारवन्तः सद्व्रता वा, तत्र-

**''लोकापवादभीरुत्वं, दीनाभ्युद्धरणादरः । कृतज्ञता सुदाक्षिण्यं, सदाचारः प्रकीर्तितः ॥१॥**



For Private and Personal Use Only

तथा-'**विपद्युच्चैः स्थेयं पदमनुविधेयं च महताम्, प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।**
**असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यस्तनुधनः, सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥२॥'**

**गीतार्थाः-** सूत्रार्थवेदिनः साधवः । उक्तं च-

**'गीयं भन्नइ सुत्तं, अत्थो पुण तस्स होइ वक्खाणं ।**
**गीएण य अत्थेण य, गीयत्थं तं वियाणाहि ॥१॥**

तत्पर्युपासनेन श्रावका अप्युपचाराद्**गीतार्थाः** प्रवचनकुशला इत्यर्थः । तथा **पापभीरवो-** गाढकर्मबन्धभीरुत्वेन तीव्रारम्भत्यागिनः । तदुक्तम्-

**'वज्जइ तिव्वारंभं, कुणइ अकामो अनिव्वहंतो य ।**
**थुणइ निरारंभजणं, दयालुओ सव्वजीवेसु ॥१॥'**

तानेवंविधान् परमधार्मिकान् **मित्राणि-** विश्वासस्थानानि **सर्वथा-** मनोवाक्कायैः कुर्यात् । इच्छन् उभयलोकपथ्यमात्मन इति ॥१७०॥ द्वारम् (१४) । अधुना पञ्चदशं भोजनद्वारं विवृण्वन्नाह-

**तओ भोयणवेलाए, आगयाइ सुसावओ ।**
**पुइत्ता जहसत्तीए, गिहबिंबाणि वंदए ॥१७१॥**



For Private and Personal Use Only

**व्याख्या-'तओ भोयणवेलाए०' ततो-** न्याय्यव्यवसायानन्तरं **भोजनवेलायां-** मध्याह्नसमयरूपायां सात्म्यानुरूपायां वा **आगतायां-** प्राप्तायां सुश्रावकः गृहबिम्बानि यथाशक्त्या पूजयित्वा वन्दते प्रसिद्धचैत्यवन्दनविधिनेति ॥१७१॥ ततश्च-

**ढोइत्ता अग्गकूरं तु, तओ साहू निमंतए ।**
**दिट्ठा य नियघरे इंता, तओ गच्छिज्ज संमुहो ॥१७२॥**

**व्याख्या-'ढोइत्ता०'** निष्पन्नायां च रसवत्यां ढौकयित्वा **अग्रकूरं-** पुनर्गृहबिम्बानामग्रे प्रधानशाल्योदनाद्याहारं ततः साधून्निमन्त्रयते । अथ साधवः स्वयमेवाष्टगोचरचर्याक्रमेणोच्चनीचगृहाण्यटन्तः श्रावकेण निजगृहमागच्छन्तो दृष्टास्ततोऽसौ गच्छेत् संमुखमिति ॥१७२॥

गृहान्तर्गतानां साधूनां प्रतिपत्तिपूर्वकं प्रतिलाभनविधिं षट्सूत्र्याह-

**आसणेण निमंतित्ता, तओ परियणसंजुओ ।**
**वंदए मुणिणो पाए खंताइगुणसंजुए ॥१७३॥**

**व्याख्या-'आसणे०'** आदिशब्दान्मार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिंचन्यब्रह्मचर्याणां परिग्रहः ॥१७३॥

**देसं-खित्तं तु जाणित्ता, अवत्थं पुरिसं तहा ।**
**विज्जोव्व रोगियस्सेवं, तओ किरियं पउंजए ॥१७४॥**



For Private and Personal Use Only

**व्याख्या-'देसं खित्तं०' देशं-** मगधाऽवन्त्यादिकं साधुविहारयोग्यायोग्यरूपं, **क्षेत्रं-** संविग्नभावितमभावितं वा। तुशब्दाद् द्रव्यमिदं सुलभं दुर्लभं वा। **अवस्थां-** सुभिक्षादुर्भिक्षादिकाम्। **पुरुषमा**चार्योपाध्यायबालवृद्धग्लानसहासहादिकं च ज्ञात्वा। **'विज्ज०'** यथा भिषग् देशकालादि विचार्य व्याधिमतश्चिकित्सां करोत्येवं श्रावकोऽपि। ततः **क्रियामा**हारादिदानरूपां प्रयुङ्क्ते ॥१७४॥

दानक्रियायामेवोत्सर्गापवादौ दर्शयति-

**संथरणंमि असुद्धं, दुण्हवि गिण्हंतदिंतयाण हियं।**
**आउरदिट्ठंतेणं, तं चेव हियं असंथरणे ॥१७५॥**

**व्याख्या-'संथरणंमि०' संथरणे-** प्रासुकैषणीयाहारादिप्राप्तौ साधूनां निर्वाहे सति। **अशुद्धं-** द्विचत्वारिंशद्दोषदूषितमाहारादि। **द्वयोरपि-** गृहीतृदात्रो**रहितं**-संसारप्रवृद्धेरल्पायुष्कतायाश्च हेतुत्वादपथ्यं स्यात्। अपवादतस्तु **'आउरेत्यादि'**, आतुरो रोगी, तस्य दृष्टान्तस्तेन, यथा रोगिणः कामप्यवस्थामाश्रित्य पथ्यमप्यपथ्यं स्यात्- काञ्चित् पुनः समाश्रित्यापथ्यमपि पथ्यं स्यात्, एवमत्र। **'तं चेव०' तदेवा**शुद्धमपि गृहीतृदात्रो**र्हितम**वस्थोचितत्वात्पथ्यं स्यात्। क्वेत्याह-**असंस्तरणे-** अनिर्वाहे दुर्भिक्षग्लानाद्यवस्थायाम्। यतः-

**'सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जा। मुच्चइ अइवायाओ पुणो विसोही नयाविरई ॥१॥**

इत्याद्यागमाभिज्ञैर्यथावसरं बहुतरगुणलाभकाङ्क्षया गृह्यमाणं दीयमानं च न दोषाय ॥१७५॥ एवमुत्सर्गाप-



For Private and Personal Use Only

वादौ प्रदर्श्य यद्विधेयं तदाह-

**एवं देसं तु खित्तं तु, वियाणित्ता य सावओ ।**

**फासुयं एसणिज्जं च, देइ जं जस्स जुग्गयं ॥१७६॥**

**व्याख्या-'एवं देसं' एवमि**त्यातुरदृष्टान्तेन पूर्वोक्तं देशं क्षेत्रं च, तुशब्दादवस्थां पुरुषं च, विज्ञाय पुनः श्रावकः **यस्य** ग्लानबालादेर्यद्योग्यं **प्रासुकं-** निर्जीव**मेषणीयं च** उद्गमादिदोषरहितं तद् ददाति ॥१७६॥ स्वर्णरूप्य-पूगीफलादिपरिहारेण यद्यतिजनयोग्यं तद्दर्शयति-

**असणं पाणगं चेव, खाइमं साइमं तहा ।**

**ओसहं भेसहं चेव, फासुयं एसणिज्जयं ॥१७७॥**

**व्याख्या-'असणं पाणगं०' अशनमो**दनादि, **पानकं** सौवीरादि, **खादिमं** द्राक्षाखर्जूरादि, **स्वादिमं** नागर-मरिचादि । तथा **औषधम्-**एकमेव द्रव्यं, **भेषजं-** बह्वौषधसंयोगः । पुनः प्रासुकादिग्रहणं शुद्धदानस्यैवैकान्तनिर्जरा-हेतुत्वख्यापनार्थम् ॥१७७॥ एवं देहोपग्रहहेतुदानमुपदर्श्य संयमोपग्रहहेतुदानमाह-

**वत्थं पत्तं च पुत्थं च, कंबलं पायपुंछणं ।**

**दंडं संथारयं सिज्जं, अन्नह जं किंचि सुज्झइ ॥१७८॥**



For Private and Personal Use Only

**व्याख्या-'वत्थं०'** वस्त्रादीनां तावत्स्वरूपं प्रमाणं ग्रहणकारणं च किञ्चिदुच्यते, तत्र **वस्त्रमा**च्छादनं क्षौमिकौर्णिककल्पत्रयादिरूपम् । एषां प्रमाणम्-

**'कप्पा आयप्पमाणा, अड्ढाइज्जा य वित्थडा हत्था । दो चेव सुत्तिआ तु उण्णिओ य तइओ मुणेयव्वो ॥१॥**

कारणं पुनः- **'तणगहणाऽनलसेवानिवारणा धम्मसुक्कझाणट्ठा ।**

**दिट्ठं कप्पग्गहणं गिलाणमरणट्ठया चेव ॥२॥**

तथा **पात्रं** द्विधा पतद्ग्रहो मात्रं च । **'पुत्थ'** मिति पुस्तकम् । **कम्बलमि**ति चिलिमिलीत्यादिरूपम् । **पादप्रोञ्छनं**-रजोहरणं । **दण्डः** (बाहुप्रमाणः) । अर्धतृतीयहस्तप्रमाणः **संस्तारकः, शय्या** तु सर्वाङ्गीणा । अन्यन्मुखवस्त्रिकादिकं सर्वमेवोपकरणं उद्गमादिदोषरहितं तु सुसंयतेभ्यः श्रावको ददातीति ॥१७८॥ किमित्येतावान् सुपात्रदाने यत्न इत्याह-

**जओ सुपत्तदाणेणं, कल्लाणं बोहि उत्तमा ।**

**देसिया सुहविवागंमि, अक्खाणा दस उत्तमा ॥१७९॥**

**व्याख्या-'जओ सुप०' यतो**-यस्मात् कारणात्सुपात्रदानेन **कल्याणं**-सुर-मनुष्येषु विशिष्टविशिष्टतरसुखाऽनुभवनम् । तथा **बोधिरुत्तमा**-प्रतिजन्मोत्तमधर्मप्राप्तिश्च स्यादिति शेषः । अस्मिंश्चार्थे दर्शितानि सुखविपाके-एकादशाङ्गस्य विपाकश्रुतनाम्नः सुखविपाकाख्ये द्वितीयश्रुतस्कन्धे **आख्यातानि**-दशाध्ययनरूपाणि **उत्तमानि**-प्रधानानि ॥१७९॥ तान्येवाह-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**सुबाहु १ भद्दनंदी य, २ सुजाय ३ वासव ४ तहेव जिणदासा ५ ।**
**धणवइ ६ महब्बला, ७ भद्दनंदि ८ महचंद ९ वरदत्ता १० ||१८०||**

**व्याख्या-'सुबाहु०'** सुबाहुवक्तव्यताप्रतिपादिका ग्रन्थपद्धतिः सुबाह्वाख्यानकं । एवमन्यान्यपीत्यक्षरार्थः । भावार्थस्तु तच्चरितेभ्योऽवसेयः । तत्रेयं सुबाहुकथा-

'अस्मिन् भरतक्षेत्रे हस्तिशीर्षनगरम् । तत्रादीनशत्रुनृपस्तस्य धारिणी राज्ञी । तयोः कियता कालेन सिंहस्वप्नसूचितः पुत्रो जातः । तस्य सर्वगुणसुन्दरत्वात्सुबाहु नाम दत्तम् । स पञ्चभिर्धात्रीभिः पाल्यमानो वर्धते । स कियता कालेनाध्यापकेनाध्यापितः । क्रमेण यौवनं प्राप्तः । पितृभ्यां वधूस्थानार्थं ५०० प्रासादकरणेन ५०० राजकन्याः पुष्पचूलाप्रमुखाः परिणायितः । सदापि विषयसुखं भुङ्क्ते । एकदा पुष्पकरण्डकोद्याने श्रीवीरे समवसृते, वर्धापने राज्ञाऽर्धत्रयोदशलक्षदाने दत्ते, स स्यन्दनारूढो वन्दितुं गत्वोपदेशेन प्रबुद्ध्य श्राद्धधर्ममग्रहीत् । एष सुभगः सर्वजनेष्टः केन कर्मणेति गौतमेन पृष्टेऽस्य जीवेन प्राग्भवे हस्तिनागपुरे सूक्ष्मव्यवहारिगृहस्थेन तत्रागतः ५०० साधुपरिवृतः धर्मघोषाचार्यशिष्यः सुदत्तर्षिः प्रहृष्टेन विधिना मासक्षपणपारणे प्रतिलाभितो, भोगफलं कर्मोपार्जितम् । तावता पञ्चदिव्यानि प्रकटीभूतानि । दुन्दुभिः १ चेलोत्क्षेपो २ हिरण्यवृष्टिः ३ पञ्चवर्णा पुष्पवृष्टिः ४ सुदानं सुदानमिति देववाणी ५ एवंविधानि ५ दिव्यानि जातानि । तदा तत्र मिलितराजादिबहुलोकैः प्रशंसितः । सूक्ष्मो व्यवहारी मृत्वा सौभाग्यादिगुणयुतोऽयं सुबाहुनामा जातो । भगवन्नयं चारित्रं लास्यतीति गौतमेन पुनः पृष्टे लास्यतीत्यवादीद्वीरः ।



For Private and Personal Use Only

अथैकदा पौषधव्रतेऽष्टमतपसि परिणमति यत्र भगवान् विहरति ते ग्रामनगरराजाद्या धन्या इति चिन्तिते, सुबाहुना स्वबोधार्थमागतं वीरं वन्दित्वा पितरौ पृष्ट्वा व्रतं लास्यामीत्युक्तं । तदा पितृभ्यां बहुविलापकरणेऽपि कथयति न स्थास्यामीति यतोऽनित्यः संसारः । मृत्योर्बालस्य वृद्धस्य यौवनस्थस्य निःस्वस्य धनवतः कस्यापि चामोचकत्वात् । अहं युष्मत्पूर्वं पश्चाद्वा मरिष्यामीति न जानामि । विविधाधिव्याधिगृहं जर्जरगृहवद्विनाशिमृद्भाण्डवत्त्याज्यमेवेदं शरीरम् । स्त्रियो भोगाश्च त्याज्या एवेति युक्तिभिः पितरौ प्रबोध्यैकदिनराज्यं मानितम् । कृते राज्याभिषेके किं तुभ्यं ददामीति पित्रोक्ते, रजोहरणं पतद्ग्रहं च देहीत्युक्ते कुत्रिकापणाल्लक्षद्वयेन राज्ञा ते आनायिते । ततो गन्धोदकस्नानादिविधिना १०० स्तम्भपाञ्चालिकायुतायां सहस्रपुंवाह्यशिबिकायामारुह्य अग्रेसराष्टशतहयगजशतहयगजरथादिमहाविस्तरेण गत्वा श्रीवीरपार्श्वे प्रव्रजितः । ततः सुबाहुः षष्ठाष्टमादितपा एकादशाङ्गवित् मृत्वा सौधर्मे १ । ततोऽसौ मनुष्ये प्रव्रज्य २ सनत्कुमारे ३ मनुष्ये ४ ब्रह्मणि ५ मनुष्ये ६ शुक्रे ७ मनुष्ये ८ आनते ९ मनुष्ये १० आरणे ११ मनुष्ये १२ सर्वार्थे १३ विदेहे मनुष्ये दानात् १४ भवेषु मोक्षं यास्यतीति । ऋषभपुर १ वीरपुर २ विजयपुर ३ सौगन्धी ४ कनकपुर ५ महापुर ६ सुघोषपुर ७ चम्पा ८ साकेतेषु ९ यथाक्रमं धनावह सरस्वती १ कृष्णमित्र श्रीदेवी २ वासवदत्त कृष्णा ३ अप्रतिहत सुकृष्णा ४ प्रियचन्द्र सुभद्रा ५ बल सुभद्रा ६ अर्जुन तत्त्ववती ७ दत्त दत्तवती ८ मित्रनन्दि श्रीकान्ता ९ राजराज्ञीनां सुतानां क्रमात् भद्रनन्द्यादीनां प्राग्भवे महाविदेहे पुण्डरीकिणी विजयकुमार इषुकार ऋषभदत्तव्यवहारी २ कौशाम्बी धनपालनृप ३ मध्यममित्रा मेघरथनृप ४ मणिपतिका मित्रनृप ५ सोमणिपुर-



For Private and Personal Use Only

नागदत्त ६ महाघोष धर्मघोष ७ तेगिच्छि जितशत्रुनृप ८ शतद्वारपूर्विमलवाहननृप ९ रूपे प्रतिलाभितसाधूनां ५०० भार्या श्रीवीरपार्श्वे दीक्षा १४ भवमोक्षप्राप्त्यादिसर्वं सुबाहुचरित्राद्वाच्यम् । ||१८०||

सुपात्रदानस्यैहिकं फलं सदृष्टान्तमाह-

**इहयं चेव जम्मंमि, उत्तमा भोगसंपया ।**
**सिज्जंसो इव पावंति, मूलदेवो जहा निवो ||१८१||**

**व्याख्या**-अक्षरार्थः सुगमः, भावार्थस्तु कथागम्यः, तत्रेयं श्रेयांसकथा-गजपुरे बाहुबलिनृपपुत्रः सोमप्रभः । तस्य श्रेयांसनामा कुमारः । एकदा तस्मिन्नगरे श्रीवृषभजिनमागच्छन्तं दृष्ट्वा सन्मुखमागतः । तस्य भगवतः पादपङ्कजं नत्वा त्रिःप्रदक्षिणीकृत्य हर्षाश्रुनीरपूरेण प्रक्षालयन्नेवं हृदये चिन्तयति 'मया ईदृशं रूपं पुरा क्वापि दृष्टमस्तीति चिन्तयन् जातिस्मरणमवाप । तदनु वृषभं विज्ञाय नत्वा च भवजलधियानपात्रं मया लब्धमेतदित्यचिन्तयत् । तस्मिन्नवसरे केनापि इक्षुरसभृताः कुम्भाः प्राभृतीकरणार्थमानीताः । ततः कुमारो भणत्येवम्-'अमुं निर्दोषरसं गृहाण । ममानुग्रहं कुरु' । यावता जिनो गृह्णाति तावता हिरण्यवररत्नगन्धोदकपञ्चवर्णकुसुमानां सार्धत्रयोदशकोटीमाना वृष्टिर्जाता । भरतेऽस्मिन् प्रथमदानं सुदानं महादानमित्यम्बरे वाणी जाता । ततः सोमप्रभप्रमुखा लोकाः कृतपुण्यं धन्यं श्रेयासं प्रशंसन्ति । वर्षसहस्रान्ते श्रीऋषभजिनेन्द्रस्य घातिकर्मक्षये लोकालोकप्रकाशकरं केवलज्ञानं समुत्पन्नम्



For Private and Personal Use Only

। ततः श्रेयांसकुमारो धर्मं श्रुत्वाऽनवद्यां प्रव्रज्यां गृहीतवान् । घोरं तपः (कृत्वा) सिद्धिसुखं सम्प्राप्तः

सुपात्रदानप्रभावात् **'भवणं धणेण भुवनं, जसेन भयवं रसेण पडिहत्थो ।**
**अप्पा निरुवमसुक्खे, सुपत्तदाणं महग्घफलं ॥१॥'** इत्यात्मा निस्तारितः ॥

इति दानस्यैहिकफले श्रेयांसकथा । अथ मूलदेवकथा त्वियम्-अस्मिन् भरतेऽवन्त्याख्यो देशोऽस्ति । तत्र द्वादशयोजनायामा नवयोजनविस्तारा उज्जयिनी नगरी । तत्र रूपपात्रं कलाकुशला देवदत्ता पण्याङ्गना बहुधनापि अचलं सार्थवाहं दृष्ट्वा स्वं निःस्वं मन्यमाना तेन सह रमते । इतश्च पाटलीपुरे मूलदेवो नृपाङ्गजः सर्वकलावान् रूपवान् समग्रगुणयुक्तोऽपि द्यूतव्यसनदोषेण पित्राऽपमानितो नगराद्बहिर्निर्गत्य क्रमेण पृथिवीमतिक्रामन् उज्जयिनी-पुरीं ययौ । तेन तत्र गुटिकादिप्रयोगेण निर्मितानेकरूपेण कलाभिः सर्वोऽपि पुरीजनो विस्मापितः । तेन तत्र सर्वजनान् तृणप्रायो मन्यमाना रूपवती देवदत्ता पण्याङ्गना श्रुता । एषा मया रञ्जनीयेति विचिन्त्य विवर्णमात्मानं वामनं च विधाय तद्गृहासन्नदेवतायतने गत्वा जगौ गीतं । निशम्य तत् देवदत्ता चमच्चक्रे । ततस्तदाकारणार्थं कुब्जीं चेटीं प्रैषीत् । सा तत्र तं दृष्ट्वा तत आगत्याऽवदत् स सुन्दरो न श्रौति इति तस्या अग्र उक्तम् । पुनः प्रैषीत् । सा गत्वा तं प्राह-स्वामिन्नः स्वामिनी देवदत्ता युष्मान्नाकारयति । सोऽनाकर्णितकं कृत्वा तथैव पुनर्गीतं चक्रे । पुनः प्रोक्तं तया । तदासाववादीत् । केयं तव स्वामिनी । देवदत्ता वेश्येति तयोक्ते, अहं वेश्यासङ्गं न करोमीत्यवादीत्सः । तयोक्तं न



For Private and Personal Use Only

देवदत्ता पणाङ्गनासदृशी, गुणागुणविदग्रणीर्वर्तते । एवमुक्ते सति पृष्टेऽचालीत् । तावता मुष्टिनाहत्य पृष्टे तां कुब्जीं स सज्जीचकार । देवदत्तापि तं वृत्तान्तं विज्ञाय सविस्मया वरासनप्रदानादि स्वागतं तस्य व्यधात् । तदा वीणां वादयन् तत्रायातो वेणिकः । देवदत्ताऽवदत्-अविकला भव्या कला तव वर्तते । अथ वामनः किञ्चिद्धास्यं विधाय स्माह- कीदृश उज्जयिनीजनो भव्यः श्रुतः, सम्प्रति (कीदृशो) दृश्यमानोऽस्ति । तयोक्तम्-कुतः ? सोऽवदत् सगर्भेयं वीणा । ततस्तां पाणिनादाय तन्त्रीगर्भगतं कचं कृष्ट्वा दर्शयामास । ततो वीणानादेन रञ्जिता चिन्तयति खेचरः किन्नरो वा गायनः इति । ततः कृताञ्जलिसप्रश्रयं साऽभ्यधात्- 'स्वामिन् सद्यः स्वं रूपं दर्शय' । ततः स्वाभाविकं रूपं चक्रे तेन । समग्रगुणनिधान ! तवागमनेनानुग्राह्याहं प्रत्यहं' इत्यवदद्देवदत्ता । तेन तथैव विदधे । मूलदेवो द्यूतव्यसनदूषितो सर्वं हारयामास । पश्चाद्गणिकया प्रोक्तम् 'स्वामिन् द्यूतं मुञ्च' । परं सोऽपि मोक्तुं न क्षमः । पश्चात् तस्या अग्रेऽक्कया प्रोक्तम्-'धूर्तं निःस्वं मूलदेवं मुञ्च । अचलं निश्चलं स्वान्तं धनैर्धनदसंनिभं भज' । साख्यन्न द्रव्यरक्ताहं किन्तु गुणानुरागिणी, तेनैतां वार्तां मुञ्च । परीक्षार्थमिक्षुदण्डग्रहणार्थमक्काचलपार्श्वे चेटीं प्रैषीत् । अचलपार्श्वे गत्वा तयोक्तं । तेन इक्षुदण्डभृतं शकटं प्रेषितं । तद् दृष्ट्वा तयोक्तम्-'हे अम्बाऽहं किं हस्तिनी' । तथैव मूलदेवोऽपि याचितः । स तु सरसा सरला आदावन्ते च ताश्छित्त्वा निस्त्वचीकृत्याङ्गुलमानखण्डानि कृत्वा तथैवैलाद्यैर्वासयित्वा मल्लकसम्पुटे क्षिप्त्वा देवदत्ताकृते प्रैषीत्तद् दृष्ट्वा साप्यवोचत्-'मातर्निःस्वस्यापि विवेकं पश्य । तेन नातः परं वदेः । अक्काऽप्यूचे हे पुत्रि ? ते एष एव पतिर्भद्रङ्करो भवति । अथान्यदा नाटकेन नृपं चमत्कार्य देवदत्तया वरो न्यासीकृतः । ततः



For Private and Personal Use Only

कूटप्रयोगेणाचलेनावगणितो बेन्नातटं प्रति चलितोऽटव्यां पतितः। तावता कश्चिद्विप्रः समायातः। स पृष्टः। तेनोक्त-मटव्याः परतो वीरनिधानकं पुरं यास्यामि। मूलदेवेनोक्तमावां सार्थे व्रजिष्यावः। अवापतां व्रजन्तौ मध्याह्नसमये सरः। तत्र नीरेण मुखप्रक्षालनादिकं चक्रतुः। मूलदेवः पृथग् तरुतले उपविष्टः। विप्रस्तु अम्भःसिक्तान् सक्तू-नेकोऽपि रङ्कवदत्तुं प्रवृत्तः। मूलदेवेनाचिन्ति- एषोऽदनं कृत्वा ममापि किञ्चिदर्पयिष्यति। स त्वदनं कृत्वा मार्गं प्रस्थितः। प्राचलीद्राजपुत्रोऽपि श्वः प्रदास्यतीति चिन्तयन् एवं दिनद्वयत्रयगमने सोऽटवीं ललङ्घे। द्विजोऽवोचदयं पन्थास्तव चिन्तितपुरे यास्यति। राजपुत्रेण स प्रोक्तः किं ते नाम। सोऽवदत् पैतृकं 'सीद्धडो' लोककृतं 'निर्घृण-शर्म', इत्यभिधाद्वयं हृदि संस्थाप्याग्रे गच्छता एकस्मिन्नागते ग्रामे मूलदेवेन कुल्माषा गृहीताः। तान् लात्वा पुराद्या-वन्निःसरति तावद् मुनिर्दृष्टः। तं वीक्ष्य अहो मे भाग्यमिति हृदि दध्यौ। ततो निर्दोषाः कुल्माषास्ते तस्मै प्रदत्ताः। तं साधुं प्रतिलाभ्यानुमोदितवान्- **'धण्णाणं खु नराणं कुम्मासो हुंति हु पारणए।'** तावता तुष्टदेवतयोत्तरार्धेन वरं याचस्वेत्युक्ते पुनर्बभाण- **'मह देहि देवदत्तं दंतिसहस्सं च रज्जं च ॥१॥** ततो बेन्नातटं प्राप। तत्र स्वप्ने पूर्णचन्द्रं मुखे प्रविशन्तं वीक्ष्य, तस्य प्रश्नार्थमारामिकमाराध्य, पुष्पाणि लात्वा उपाध्यायपार्श्वे प्राप्ते सति, सगौरवं स्नपयित्वा भोजयित्वा च तेनासौ स्वपुत्रीं पर्यणाययत्। तत उपाध्यायेनोक्तम्-तव सप्तमदिनस्यान्ते राज्यं भावि। तदाऽपुत्रस्य राज्ञः पञ्चत्वभवनेन तस्य राज्यं जातम्। देवदत्तापि तत्रानीता। एकदा देवदत्ताप्रयोगेण उज्जयिन्या मूलदेवानयनार्थं राज्ञा अचलो निष्कासितः। मूलदेवविलोकनार्थं महासार्थेन पारसकूले गत्वा बहुपुण्यं लात्वा भव्यं प्राभृतं लात्वाऽगा-



For Private and Personal Use Only

न्नृपान्तिकम् । स च राज्ञा उपलक्षितः । न च तेन राजा । ततः सर्वपण्यविक्रये स धृतः ।' राज्ञोक्तम्-मामुपलक्षयसि ? तेनोक्तं रविवत्त्वां कोऽपि नोपलक्षयति । नृपेणोक्तम्-'भक्तिवाक्यैरलं, चेज्जानासि तदा ब्रूहि ।' स वक्ति 'न स्फुटम् ।' तावता देवदत्ता कृतस्फारशृङ्गारा राङ्गिरा तत्रागात् । तां समालोक्य स भीतः । तया भाणितोऽचल ! स एष नृपात्मजः । ततस्तेन विलक्षचित्तेन स्वागः सर्वमपि क्षामितम् । स्वामिंस्तव वचनं विना उज्जयिनीपतिर्मम प्रवेशं न दास्यतीति विज्ञप्ते नृपेणोक्तम्-'मया क्षान्तं, याहि, मम वचसा जितशत्रुनृपः पुरीप्रवेशं दास्यति । स तत्रागतः । मूलदेवस्य राज्यं श्रुत्वा सिद्धडोऽपि तत्रायातः । तस्यापि ग्रामः प्रदत्तः । तस्य क्रमेण स्वर्गमोक्षौ भविष्यतः । इति दानस्यैहिकफले मूलदेवकथा ॥१८१॥

दानस्यैवोभयलोकफलं सदृष्टान्तमाह-

**धन्नेणं सालिभद्देणं, कयवन्नेणं तहेव य ।**
**इहलोए परलोए य, जहा पत्ता य सुसंपया ॥१८२॥**
**अन्नो वि पाविही एवं, नत्थि इत्थं तु संसओ ।**
**पूइही मुणिणो, जो उ भत्तिमंतो सुसावओ ॥१८३॥ युग्मम् ।**

**व्याख्या-'धन्नेणं सा० ।' 'अन्नोवि पा०'** सुगमे । नवरं **इह लोके**-नर भवे । **परलोके**- सर्वार्थसिद्धादौ । दृष्टान्तास्तूच्यन्ते । तत्रेमौ धन्यशालिभद्रदृष्टान्तौ-



For Private and Personal Use Only

प्रतिष्ठानपुरे जितशत्रुनृपस्तस्य ग्रामेऽन्यग्रामस्यैकं कुलमागतमस्ति । तत्रैको दारको दाता विनीतो वृत्तितो लोकानां वत्सरूपाणि चारयामास । एकदा वत्सरूपाणि वने मुक्त्वा गृहमागत्योचे-'मातः ! सम्प्रति मे पायसं देहि । तदप्राप्तौ साऽरोदीत् । ततः प्रातिवेश्मिकीभिस्तस्या रुदनं श्रुत्वा दुःखकारणमापृच्छ्य क्षीरादिकं ददे । तया तत् पायसं खण्डाज्ययुतं संस्कृत्य सुतस्य परिवेषितम् । पश्चात् कार्यान्तरेण सा गृहान्तर्ययौ ।

इतश्च तत्सुकृतैराकृष्ट इव मुनिस्तद्गृहेऽगात् मासक्षपणपारणे । तं दृष्ट्वा भूरि भक्तिभागर्भको पाणिभ्यां पायसस्थालमुत्पाट्य समुत्तस्थौ वाचंयममुवाच- सद्वित्तचित्तपात्राणां मीलकः भगवन् त्रिवेणीसंगमो मया प्रापि । तदिदं पायसं गृहाण । ममानुकम्पां कुरु । मुनिना पात्रे धृते सति धन्यंमन्योऽर्भकः परमान्नं ददौ । तदा पात्रदानतोऽसौ मनुष्यायुर्बबन्ध । पुनर्मात्रा प्रदत्तं भूरि पायसं बुभुजे । स सायं वत्सरूपाणि विलोकयन् तं मुनिं प्रेक्ष्य सहर्षं नत्वोपाविशत् । तत्पार्श्वे धर्मदेशनां शृण्वानो विसूचिकया मृत्वा तत्र नगरे श्रेष्ठिपत्न्याः सुतो जातः । ततः श्रेष्ठी धनेनाधिकं ववृधे । तेन जन्मोत्सवे तस्य 'धन्य' इति नाम दत्तम् । ततः चतुर्णां सुतानां परीक्षायै श्रेष्ठिना द्वात्रिंशद्रूपकानर्पयित्वोक्तम्-'युष्माभिरेतान् पणायित्वा लाभो दर्शनीयः' । प्रवृत्ता व्यवहर्तुं ते । धन्यस्तु मेण्ढकं बलाढ्यं राजपुत्रस्य मेण्ढकेनायोधयत् । दीनाराणां सहस्रस्य पणीकरणे राजकुमारस्यैडके भग्ने सति कुमारो सहस्रं लात्वा गृहेऽगात् । भ्रातरोऽप्यलाभाः समायाताः । द्वितीयेऽह्न्यवदंस्ते 'पुनः परीक्षा क्रियताम् । पितृभ्यां तेभ्यः षष्टिः षष्टिश्च माषकाः प्रदत्ताः । सर्वादरेण क्रयविक्रयं कर्तुं प्रवृत्तास्ते । परं न लाभमाश्रिताः । धन्यस्तु उपायवित् विपणिमध्येऽस्थात् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ महाधनो नाम कृपणशेखरः श्रेष्ठी तत्र पुरे आसीत् । स नो धर्मे न स्वजने न दीने च किमपि दत्ते । न वस्त्राणि भव्यानि परिधत्ते । स गृहस्यान्तगर्तं द्रव्येण पूर्तवान् । तथा शुषिरां खट्वां वररत्नोच्चयेन गर्तोपरि तां निधाय मूर्च्छया मूढचित्तस्तिष्ठति । जराजीर्णोऽसौ मृत्युं प्राप्तः । ततः खट्वया सहोत्पाट्य श्मशाने मुक्तः । श्मशानेशेन सा विक्रेतुं पुरे नीता । तां धन्यः क्रीत्वा नीत्वा निजे निकेतने खट्वाया रत्नानि कृष्ट्वा तुष्टः पित्रोः समर्पयत् । ततः श्रीः प्रससार धन्यस्य कीर्तिरप्युज्ज्वला । तद्भ्रातॄणामधन्यानामतुच्छो मच्छरः । ते त्वां हन्तुं मन्त्रयन्तीति भ्रातृजाया सुतस्येव न्यवेदयत् । ततः सोऽवक् `नापराद्धं मया किञ्चिदमीषां । साऽवक् `वत्सेद्दक्षाः खलाः' । यतः-

**नाकारणरुषां सङ्ख्या, संख्याताः कारणक्रुधः ।**
**कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥१॥**

ततोऽचिन्ति न मे स्थातुमिहोचितमिति विमृश्यैकाकी निर्ययौ गेहात् । महीं बभ्रामान्यदा मार्गासन्नक्षेत्रस्थितेन वर्याकारं तं दृष्ट्वा कौटुम्बिकेनैकेन भोजनार्थं निमन्त्रितम् । भोजनोपविष्टे तस्य पन्त्या परमान्नं परिवेषितम् । कौटुम्बिकेन स्वर्णपूर्णः कलशः सीराग्रेण प्रकटीभूतो धन्याय ढौकितः `गृह्यतामेष निधिस्त्वद्भाग्यनिर्गतः । तं तस्मै दत्त्वा धन्यः क्रमाद्राजगृहं प्राप । तं कुसुमपालः स्वगृहे नीत्वा तस्य सद्भक्तिं व्यधात् । इतश्च शालिग्रामे संगमनामा गोपालो वत्सरूपाणि चारयामासेति । सर्वं साधुं प्रतिलाभ्य पुनरपि मात्रा परिवेषितभोजं यावत् धन्यस्य सद्दशमेव स सङ्गमः साधुं स्मरन् दिनात्ययेऽजीर्त्या मृतः । दानपुण्यतो राजगृहे गोभद्रस्य भद्रासुतोऽजनि । जन्मोत्सवे शालिभद्रेति नाम



For Private and Personal Use Only

दत्तं । धात्रीभिर्लाल्यमानो यौवनं प्राप्तः । तत्रत्यश्रेष्ठिभिर्द्वात्रिंशन्निजकन्यकास्तस्य परिणायिताः । ताभिः समं यथासुखं स रेमे ।

अथ श्रेणिकराज्ञः सोमश्री, शालिभद्रस्य स्वसा सुभद्रा, कुसुमपालस्य पुष्पवतीति पुत्र्य एकदिनजातत्वात् परस्परं सख्योऽभूवन् । आत्मभिः पतिरेक एव करिष्यत इति पुष्पवत्या सोमश्रियाः पुरः (उक्तम्), तया च राज्ञे विज्ञप्तम् । ततः श्रेणिकेन तिस्रोऽपि धन्यस्य परिणायिताः । धन्योऽपि भोगान् बुभुजे । स ताभिः सह गवाक्षे रममाणः पितरावद्राक्षीत् । तौ पितरावाकार्य सद्वस्त्राभरणैश्च भूषयित्वा सभार्योऽसौ प्रणनाम । कुतोऽत्रागमनं भवताम् । ताभ्यामुक्तं-`तव राज्यं श्रुत्वा ते भ्रातरस्त्रपमाणाः पुराद्बहिः स्थिताः सन्ति । ततो धन्योऽपि तेभ्यः पृथक् पृथक् ग्रामान् ददौ ।

गोभद्रोऽथ श्रीवीरपार्श्वे दीक्षामासाद्य स्वर्गलोकमवाप । प्राच्यपुण्यप्रकर्षाच्छालिभद्रस्य सोऽमरो वात्सल्यलालसोऽभूत् । ततस्तस्य प्रियायाः पादप्रोञ्छनार्थं भद्रया रत्नकम्बलग्रहणादि सर्वं प्रसिद्धमेव ।

इदानीमुद्याने धर्मघोषसूरिरागात् । तदुपदेशं श्रुत्वा संसारं त्यक्तुकामः `भगवन् केन कर्मणाऽङ्गिनामन्यो स्वामी न स्यादिति' पृष्टे सूरिरुचे- ये दीक्षां गृह्णन्ति ते नाथाः सर्वदेहिनां भवन्ति । शालिभद्र इति श्रुत्वा व्रतं गृहीतुकामः ``नैव प्रमाद्यमत्रार्थे' इत्युक्तः सूरिणा । ततो गृहे गत्वा निजाम्बामूचे । मातरहं व्रतं ग्रहीष्यामीत्युक्ते माताह-`वत्स ! दिव्यभोगैर्लालितस्त्वं, दुष्करं व्रतं कथं ग्रहीष्यसि' ? तद्ग्रहणं तस्य श्रुत्वा सुभद्रा शालिभद्रस्य स्वसा धन्यपत्नी रुदती धन्येन पृष्टा सती वदति-`मम भ्राता शालिभद्रः सौख्यानि मुक्त्वा व्रतेच्छुस्तुलनां कुर्वन्नस्ति



For Private and Personal Use Only

 

तेनाहं रोदिमि'। धन्यः प्राह-'सुत्यजा भोगास्तत्र का तुलना' ? तदा सहासं सा प्रोचे-'यद्येवं तर्हि युष्माभिः कस्मान्न त्यज्यन्ते'। धन्येनोक्तमेवमेव। ततस्तत्र समवसृतस्य श्रीवीरस्य पार्श्वे प्रव्रज्यां जग्राह। तं दीक्षितं श्रुत्वा शालिभद्रोऽपि तां जग्राह। ततस्तौ श्रीवीरसार्थे धन्यशालिभद्रर्षी चारित्रं निरतिचारं समाचरन्तौ विहरन्तौ पुनरपि श्रीवीरसार्थे राजगृहं समागतौ। वीरं प्रणन्तुं ययुर्जनाः। मासक्षपणपारणे धन्ययुक्तः शालिभद्रो भिक्षामटितुं प्रभुमापपृच्छे। स्वाम्याख्यन्मातृहस्तात्तेऽद्य पारणं भविष्यतीति ज्ञात्वा पुरान्तः सर्वत्र गत्वा भद्रागृहद्वारे क्षणमेकं तस्थतुः। परं मलक्लिन्नौ केनाप्यनुपलक्षितौ यावत्पुराद् बहिर्निर्गतौ तावताऽद्राक्षीत् धन्या शालिभद्रपूर्वभवप्रसूस्तया च पुरे प्रविशन्त्या दध्ना प्रतिलाभितौ। शालिभद्रोऽप्राक्षीत्-'हे नाथ ! कथं मे मातृतः पारणमजनि' ? सर्ववेदी पूर्वचरितं सर्वमाख्यत्। ततः पारणं विधाय वैभारमूर्ध्नि जग्मतुः। तत्र पादपोपगमं नामानशनं चक्रतुः।

अथ भद्रा श्रेणिकयुक्ता स्वामिनं नत्वा ततस्तत्र गत्वा तौ धन्यशालिभद्रर्षी नतौ, बहुविलापं कुर्वन्तीं दृष्ट्वा नृपस्तामूचे-'किं हर्षस्थाने विषीदसि, यतः पूर्वं दानवीरो भोगवीरश्च, साम्प्रतं तपोवीरः। यस्येदृशः पुत्रः सर्वजगज्ज्येष्ठः जगद्गुरुः। ततः पवित्रीकृतं भूतलं त्वया, तेन विषादं वृथा मा कृथाः'। सा नृपश्च तौ नत्वा गृहं जगाम। विधायानशनं विपद्य च तौ महर्षी सर्वार्थसिद्धे सुरोत्तमावहमिन्द्रौ जायेताम्। तत्र त्रयस्त्रिंशत्सागरोपमाणि यावत् सौख्यमनुभूय विदेहे समुत्पद्य प्रव्रज्य च शिवमेष्यतः।

॥ इति धन्यशालिभद्रकथा ॥ कृतपुण्यस्य कथा त्वियम्-



For Private and Personal Use Only

राजगृहनगरे श्रेणिकभूपोऽस्ति । तत्र धनेश्वरः सार्थपतिर्वसति । तस्य सुभद्रा नाम्नी प्रियास्ति । तयोः पुत्रः कृतपुण्यनामा, तस्य पितृभ्यां धन्या नाम्नी इभ्यपुत्री परिणायिता । परं यौवनेऽपि सतां संयोगाद्विषयेषु विमुखं तं विज्ञाय पितृभ्यां चिन्तितं-'कदाचिदेष प्रव्रज्यां ग्रहीष्यति, तदाऽस्माकं का गतिः ?' इति विचिन्त्य तं ललितगौष्ठिमध्ये निचिक्षिपतुः । विटनरसङ्गात्स व्यसनी जातः । वेश्यासक्तः सन् पितरौ न स्मरति । भोगार्थे पितरौ धनं प्रेषयतः स्म । तत्र तिष्ठतस्तस्य द्वादशाब्दानि क्षणवद् गतानि । मातापित्रादिभिराहूतोऽपि नागतः । धनं प्रेषयतोस्तयोर्धनं निष्ठितं । अथाकस्मात्तीव्रज्वरादिना तौ निमीलनं जग्मतुः । अन्येद्युः कुट्टिन्यादेशेन धनार्थं चेटी तस्यौकसि गता । तादृशे शटितपतिते गृहे संस्थितामनुमानेन तत्पत्नीं विज्ञाय प्राह-'कल्याणि कांते ! तवोपान्ते तेन धनार्थं प्रेषितास्मि' । सा जगौ-'अहं मन्दभाग्या कुतो धनं प्रेषयामि ? श्वश्रूश्वशुरौ दिवं गतौ । अधुना मत्पित्रार्पितेनैकेनांगभूषणेन मत्कान्तं प्रमोदय' । तद्भूषणमादाय तस्यै गृहस्वरूपमुक्त्वाऽर्प्पितं । तेन वेश्यायै तद्दत्तं । कुट्टिन्या स निःस्वो मत्वाऽपमानितः । ततोऽक्कादेशाद् भृत्यजनस्तस्याभिमुखं रजःप्रक्षेपादि कुरुते । तदानीमनङ्गसेना मातुरग्रे जजल्प-'हे मातः अस्य बहु धनमावाभ्यां भक्षितं, कथमधुनैवंविधा विडम्बना क्रियते ?' । अक्का जगौ-'आत्मनः कुलाचार एवंविधोऽस्ति' । तद्वार्त्तां श्रुत्वा विमनस्कः स्वगृहं गयौ । दूरतोऽपि कान्तमागच्छन्तं वीक्ष्य साऽभ्युत्थानासनोपवेशनाद्युचितं चकार । ततः कान्तस्य स्वगृहवृत्तान्तः प्रियया प्रोक्तः । तच्छ्रुत्वा सोऽचिंतयत्-'धिग्मम जीवितं, यन्मया पितरौ दुःखार्णवे क्षिप्तौ, पूर्वसंचितधनं निधनमानीतम्' इति पश्चात्तापपरः स तया संतोषितः-यद्भावि तद्भवति, यतः-



For Private and Personal Use Only

**''गते शोको न कर्त्तव्यो, भविष्यन्नैव चिन्तयेत् । वर्त्तमानेन, कालेन प्रवर्त्तन्ते विचक्षणाः'' ॥१॥**

इत्यादि प्रियावाचः श्रुत्वा स्वस्थः सन् पत्न्या दत्तद्रव्येण व्यापारं करोति । क्रमात्सुरतसौख्येन पत्न्याः पुत्रो जातः । अन्यदा लोकमुखेभ्यः-'धनेश्वरात्मजेन कुलं कलङ्कितं धनं च वेश्यासङ्गेन गर्त्तायां नीतं, न किमपि सुकृताय जातम्' इति श्रुत्वा प्रियां प्रत्याह-'अहं वाणिज्याय संप्रत्यत्रागतामुकसार्थवाहेन सार्धं अनेकजनपदावलोकनाय धनार्थं च यामि' । तया कुलयोषितोक्तं-'स्वामिन् ! तदेवं युक्तम्' । ततः स किञ्चित्क्रयाणकं लात्वा तस्मिन्सार्थे क्वचिद्देव-कुले खट्वायां शम्बलमोदकयुतः पत्न्या शायितः, ततो निवृत्ता सा ।

इतश्च तन्नगरे धनदेभ्यस्य चतस्रो वध्वः सन्ति, रूपवत्याख्या जनन्यस्ति । अन्यदा स धनदः सहसा तीव्रव्याधिना विपन्नः । ततस्तया रूपवत्या वधूराकार्य प्रोक्तं-यदि युष्माकं पतिमपुत्रकं राजा श्रोष्यति, तदा श्रियो ग्रहीष्यति, तेन भवतीभिर्न रोदितव्यं, असौ प्रच्छन्नभूमौ क्षेप्यः, तावदन्यः सेव्यो, यावद् भवतीनां पुत्रा भवन्ति' । ताभिस्तथैव कृतं । ततः कुलदेवीवचनेन श्वश्रूयुक्ताभिर्वधूभिर्देवकुलसुप्तस्तथावस्थः स गृहे आनीतस्तावता जागरितः, तस्य कण्ठमालम्ब्य सा स्थविरा रुदन्त्येवं जगौ-'हे वत्स ! निजमातरं विहाय बहुदिवसान् यावत् क्व स्थितः, इदानीं तव ज्येष्ठबन्धुर्विपन्नः, अतः परं पुत्र ! त्वयाऽन्यत्र न गन्तव्यं, स्वेच्छया बन्धुवधूभिः सह त्वं भोगान् भुङ्क्ष्व' । स दध्यौ-'यद्भावि तद्भवतु, सांप्रतं स्वर्गसुखमुपस्थितं' । एवं ध्यात्वा जगौ-'मातर्मम सर्वं विस्मृतं, अधुना पुण्येन मम मातुर्दर्शनं जातं, मातर्मया तवादेशः शिरस्यन्वहं धृतः' । ततस्ताभिः प्रियाभिः सह सुरतसुखमनुभवतो



For Private and Personal Use Only

द्वादश वत्सरा गताः । क्रमेण चतसृणां पुत्रा जाताः । एकदा वृद्धया तासां प्रोक्तं-'युष्माकं चत्वारः सुता बभूवुः, अथासौ यतः स्थानादानीतस्तत्रैव मुच्यतां, पुरुषस्य विश्वासो न युक्तः' । वधूभिरनिष्टमपि तद्वयेन प्रतिपन्नं । ताभिस्तामेव खट्वां सज्जीकृत्य शायितः, स्नेहतो रत्नानि मध्ये क्षिप्त्वा मोदकाश्चत्वारस्तदञ्चले बद्धाः । ततस्तस्मिन्नेव दिने स्थाने च स एव सार्थपोऽवततार । तमागतं विज्ञाय पूर्वप्रियया तत्रागत्य विलोकितं, पूर्वरूपेण सुप्तः पतिर्दृष्टस्तावता जागरितः सपुत्रां स्वपत्नीं ददर्श, सोऽचिन्तयच्च-'स्वप्नवत्किमिदमहो महदाश्चर्यं ! देवेन मनुष्येण वाऽत्र मुक्तः' । ततः पत्नीवाक्येन स्वगृहे समागतः । तया प्रोक्तं-परदेशे गत्वा किमुपार्जितं ?' लज्जितः स मौनं दधौ । ततः पुत्राय स मोदको दत्तः । तेन लेखशालायां गत्वा भक्षितः, तन्मध्याद्रत्नं निर्गतं, केनचित्कान्दविकेन तज्जलकान्तं शिशोर्हस्ते दृष्टं । स्वादिमेन तं विप्रतार्य गृहीत्वा गुप्तीकृतं । कृतपुण्योऽपि स्वमोदकतो रत्ननिर्गमनेन सहर्षो बभूव ।

अथैकस्मिन्दिने श्रेणिकस्य सेचनको हस्ती गंगामध्ये जलं पिबंस्तन्तुजीवेन गृहीतः । सेवकमुखेन तद्वार्त्तां ज्ञात्वा नृपेणाभयाय प्रोक्तं । तेन बुद्धिमता कोशागारे जलकान्तो विलोकितोऽपि न लब्धः, तदा पुरे पटहो दापितः 'यः कश्चिज्जलकान्तमणिमानेष्यति, तस्मै राज्यार्द्धयुतां स्वपुत्रीं राजा दास्यति' । तदा कान्दविकेन पटहं गृहीत्वा मणिर्नृपाय दत्तः । स जलकान्तो गजपार्श्वे मुक्तः, तेन तज्जलं द्विधाभूतं, तन्तुजीवो नष्टः, सेचनकारूढो नृपः स्वगृहमागत्याभयं रहस्यवक्-'आत्मनः पुत्री कान्दविकस्य कथं दास्यते ?' । सोऽवक्-'यस्येदं रत्नं, तं नरं प्रकटीकरिष्यामि' । ततो मान्त्रिणा पृष्टं-'भोः कान्दविक ! सत्यं ब्रूहि, क्वेदं रत्नं लब्धं, अन्यथा कम्बादिना निमीलनमवाप्स्यसि' । तदा



For Private and Personal Use Only

 

भयेन मूलतो वृत्तान्तः प्रोक्तस्तेन । ततो राज्ञा कृतपुण्याय राज्यार्द्धसहिता मनोरमा कन्या दत्ता । किंचिद्दत्वा कान्दविकोऽपि सन्मानितः । अथैकदा कृतपुण्येनाभयाय द्वादशाब्दिकं ज्ञातं प्रोक्तं-'अत्र पुरे मम चतुःपुत्रयुताश्चतस्रः पत्न्यो वर्तन्ते, ता दृष्ट्वोपलक्षयामि, परं गृहं न वेद्मि' । तेनोक्तं-प्रकटं करिष्यामि' । अथामात्यः प्रवेशनिर्गमार्थं द्वारद्वययुक्तः प्रासादोऽचीकरत् । मध्ये कृतपुण्याकृतिर्लेप्यमयी यक्षप्रतिमा स्थापिता । ततः स नगरे पटहं वादयामास-'एनं यक्षं नमस्कर्तुं पुत्रादियुताभिः स्त्रीभिरागन्तव्यं' । तदानीं सर्वा नगरनार्यः स्वापत्ययुता यक्षं प्रणम्य द्वितीयद्वारेण निर्यान्ति । इतश्च सा वृद्धा चतुर्वधूचतुःपुत्रयुता नन्तुमागात् । तदा स तामुपलक्ष्याभयायोक्तवान् । तावता ते चत्वारः पुत्रा यक्षाकृतिं दृष्ट्वा 'तात तात' इति जल्पन्तः कश्चिद्यक्षोदरे विलग्नः कश्चिच्छ्मश्रूणि । तदा तेनोक्तं-'अमी तव पुत्रा एतास्तव पत्न्यः' । ततो मन्त्रिणा तस्या गृहे गत्वा सर्वं तस्मै दत्तं । ततोऽनङ्गसेनापि तत्राकारिता । एवं तस्य सप्त प्रिया बभूवुः । अन्यदा श्रीवीरो जगद्बन्धुः समवसृतः । कृतपुण्यः श्रीजगदीशं वन्दितुं ययौ । सर्वज्ञधर्मदेशनान्ते कृताञ्जलिः स पप्रच्छ-'भगवन् ! केन कर्मणान्तरान्तरा संपत्तिर्विपच्चाभूत्' । जिनेश्वरः प्राह-'भोः कृतपुण्य ! पूर्वभवं शृणु-''श्रीपुरे गोपपुत्रो निःस्वः । एकस्मिन् दिने गृहे गृहे परमान्नं वीक्ष्य स्वाम्बामयाचत-'मातः ! मह्यं परमान्नं देहि' । तदभावेन रुदन्तीमवलोक्य प्रातिवेश्मिकयोषितो दुग्धादिकं तस्यै ददुः । तया तन्निष्पादितं । तत्पुत्राय परिवेष्य कस्मैचित्कार्याय बहिर्ययौ । इतो मासिकपारणे मुनियुग्ममागतं, तद् दृष्ट्वाऽसौ उल्लासेन पायसस्यैकभागं ददौ । पुनः स्तोकतरं विज्ञाय द्वितीयभागं, ततस्तृतीयभागं, एवं त्रीन् वारान् ददौ । क्रमेण स वत्सपस्त्वमभूः । पुराभवे



For Private and Personal Use Only

त्रिवारं विभज्य दानं ददौ, तेन तवान्तरान्तरा सुखमभूत्'' । इति श्रुत्वा स जातिस्मृत्या दृष्टप्राच्यभवो ज्येष्ठपुत्राय गृहभारं दत्त्वा स्वयं प्रव्रजितः, महातपसा च पञ्चमस्वर्गे गतः, ततः शिवं गमिष्यति इति ॥१८२॥ १८३॥

सम्प्रति दानस्योभयलोकफलदृष्टान्तानभिधाय तत्रैव भक्तिमाविर्भायन् द्विसूत्र्याह-

**मणेणं तह वायाए, काएणं च तहेव य ।**
**अप्पाणं कयकिच्चं तु, मन्नमाणो सुसावओ ॥१८४॥**
**एयं मे अत्थसारं तु, एयं वत्थं पडिग्गहं ।**
**जं मए अज्ज साहूणं, निग्गंथाणं तु नीणियं ॥१८५॥**

**व्याख्या-'मणेणं०'** । व्याख्या सुगमा । नवरं पुनः सुश्रावकग्रहणमनित्यवित्तादिपदार्थसार्थस्य सारासारतां स एव जानातीति ज्ञापनार्थम् । **'एयं मे'०** एतदेव मे**ऽर्थस्या**न्नापानादिपदार्थस्य **सारं-** प्रधानं, तथा एतद्वस्त्रं पतद्ग्रहश्च **'नीणियं'**ति ढौकितं दत्तमित्यर्थः ॥१८४-१८५॥ अत्र कारणमाह-

**न कयावि पुन्नरहियाणं, गेहे इंति सुसाहुणो ।**
**निम्ममा निरहंकारा, खंता दंता जिइंदिआ ॥१८६॥**

**व्याख्या-'न कया०'** स्पष्टा । नवरं **दान्ता** नोइन्द्रियदमेन ॥१८६॥ एतदेव दृष्टान्तपुरस्सरं दृढयति-



For Private and Personal Use Only

**कत्थ मरुत्थलीसु कप्पपायवो, मायंगगेहे मत्तअइरावणो।**
**दारिद्दगेहे य हिरन्नवुट्ठी, तिमिस्स गुहाए रयणप्पईवो ॥१८७॥**

**व्याख्या-'कत्थ मरु०'** मरुत्थलित्ति लुप्तसप्तम्येकवचनत्वात्**मरुस्थल्यां** प्रचण्डचण्डांशुकरनिकरसम्पर्कसन्तापमर्मुरायमानसिकताकणानुकृततप्तकवल्याम्, बदरीकरीरप्रमुखाधमभूमीरुहैरपि रहितसमस्तभूप्रदेशावल्यां, **कुत्रा**नल्पसंकल्पसन्दोहसम्पादनसमर्थः, प्रतिहतरौद्रदारिद्र्यमुद्रातपः **सुरकल्पपादपः** । तथा पतितातिबीभत्सगन्धसम्बन्धोद्धुरमृतगोकलेवरादिसमूहे **मातङ्गगेहे कुत्र** देवराजीविराजमानदेवराजसभालङ्करणप्रवणः समुदितो **मत्त ऐरावणः** । तथा धान्यभरासम्पूर्णजठरपिठरत्वेन कलहायमानदुर्दान्तडिम्भसन्दोहे **दरिद्रगेहे कुतः** कृतनयनमनस्तुष्टिः **सुवर्णवृष्टिः** । तथा गुरुतरतिमिरभरेण पदार्थसार्थावलोकनासहायां **तिमिस्रगुहायां कुत्र** देदीप्यमानसमस्तसमीपः सुष्ठु**रत्नप्रदीपः** । अयमात्राशयः-यथा मरुस्थल्यादिस्थानेष्वसंभावनीयशुभपदार्थप्रादुर्भावेषु कदाचन गुरुतरभाग्यसंभारलभ्या अपि सुरपादपादयो प्रादुर्भवन्ति ॥१८७॥ आह तथा-

**कत्थ एयारिसो साहू, कत्थ अम्हारिसत्ति चिंतए।**
**ता धन्नो सुकयत्थो हं, पूरा मज्झ मणोरहा ॥१८८॥**

**व्याख्या-'कत्थ एयारिसा साहू कत्थ अम्हारिसत्ति'** सूत्रपदं । कुत्र एतादृशाः स्वर्गापवर्गप्रगुणगुणमणिधरणसमुद्राः साधवः, कुत्रास्मादृशास्तथाविधवरेण्यपुण्यपुण्यविकला इति ॥१८८॥ परं यदेतादृशैरपि संयोगः समजनि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत्किमित्यत आह-

**ता धन्नो सुकयत्थोहं, पुन्ना मज्झ मणोरहा ।**
**जं मए परमभत्तीए, साहुणो पडिलाभिया ॥१८९॥**

**व्याख्या-'ता धन्नो०'** स्पष्टा ॥१८९॥ साम्प्रतं सर्वोत्तमं दानं प्रदर्शयन्नाह-

**तओ परमभत्तीए, वंदित्ता मुणिपुंगवे ।**
**सव्वदाणप्पहाणाए, वसहीए निमंतए ॥१९०॥**

**व्याख्या-'तओ परम०' ततो-**ऽन्नादिदानानन्तरं परमभक्त्या वन्दित्वा मुनिपुङ्गवान् **सर्वदानप्रधानया-** सर्वदातव्यवस्तूत्तमया मूलगुणादिदोषकालातिक्रान्तादिदोषरहितया वसत्या निमन्त्रयते ॥१९०॥

दानेषु वसतेः प्राधान्यं सहेतुकमुपदर्शयति-

**दाणाण दाणं वसही पहाणं, तद्दाणओ जं सयलंपि दिन्नं ।**
**सज्झायज्झाणासणपाणओही, सुक्खं बलं वुड्ढिचरित्तसोही ॥१९१॥**

**व्याख्या-'दाणाण०' दानानां** वस्त्रान्नपानादीनां मध्ये प्रधानं दानं वसतिरेव **यद्-**यस्माद्धेतोस्तद्दाने सकलमपि दत्तं मन्तव्यमिति, किं तद् ? स्वाध्यायध्यानाशनपानोपधयः, सौख्यं बलं वृद्धिश्चरित्रशुद्धिश्चेति । तत्र **स्वाध्यायो** वाचनादिः पञ्चविधोऽपि निराबाधायां वसतौ मासकल्पादिस्थितानां साधूनामस्खलितप्रसरः । **ध्यानं** च धर्मध्यानादि-



For Private and Personal Use Only

सुखसाध्यम् । तत्र क्षेत्रे च ये साधूनाम**शनपानोपधयः** संपनीपद्यन्ते । **सौख्यमि**ति साधारणशय्यासद्भावात् शरीरस्वास्थ्यं ।**बलमि**ति दशविधवैयावृत्त्योद्यतानां वातपित्तादिप्रकोपाभावाद्विशिष्टसामर्थ्यं ।**वृद्धिरि**ति निर्विघ्नाध्ययनादिना पुष्टिर्ज्ञानादीनामिति गम्यते । चारित्रशुद्धिः स्त्रीपशुपण्डकत्रससंसक्तादिदोषैरदूषितायां वसतौ वसतां सुप्रतीतैव । एतानि सर्वाण्यपि वसतेर्दानतः परमार्थतः शय्यातरेण दत्तानीत्यर्थः । अस्या अभावे तेषामप्यभावादिति ॥१९१॥ शय्यादानस्यैहिकं फलमाह-

**इहेव जंमंमि सुकित्तिभोगा, हवंति सत्ताण जिणा भणंति ।**
**विमुक्कमोहाण सुसंजयाणं, जे दिंति सत्ता वसहिं पहिट्ठा ॥१९२॥**

**व्याख्या-'इहेव जम्मं०'** इहैव जन्मनि तेषां सुकीर्तिरुत्तमाश्च भोगा भवन्ति सत्त्वानां जिना भणन्ति, अत्युग्रपुण्यस्य इहलोकेऽपि फलत्वात् । ये किमित्याह-**विमुक्तमोहानां**-वसत्यादिषु ममत्वरहितानां **सुसंयतानां**-साधूनां ये ददति सत्त्वा वसतिं प्रहृष्टाः, न तु परोपरोधादिपराधीना इति ॥१९२॥ पारत्रिकं फलमाह-

**देवा वि देवलोएसु, हुंति ते सुमहिड्ढिया ।**
**इंदा वा इंदतुल्ला वा, दिंति जे य उवस्सयं ॥१९३॥**

**व्याख्या-'देवा वि देव०'** देवाश्च देवलोकेषु भवन्ति । ते **सुमहर्द्धिकाः**-सुष्ठु अतिशयेन महती महाप्रमाणा ऋद्धिर्दिव्यविमानवनितादिका येषां ते तथा सुमहर्द्धिकाः । एतदेव विशेषयन्नाह-**इन्द्रा वा**-सौधर्मादिसकलकल्पाधि-



For Private and Personal Use Only

पतयः **इन्द्रतुल्या वा**-तत्सामानिकाः, ये किं ? ये ददति उपाश्रयं। **तुशब्दः** प्रहृष्टा इत्यस्यानुकर्षणार्थ इति ||१९३||

साम्प्रतमैहिकामुष्मिकफलं सदृष्टान्तमाह-

**अवंतीसुकुमालो य, वंकचूलो नराहिवो।**
**उप्पला गणिया चेव, दिट्ठंता एवमाइया ||१९४||**

**व्याख्या-'अवन्तीसुकुमालो य०'** अक्षरार्थः सुगमः। अवन्तीसुकुमालस्य वङ्कचूलस्य **'उप्पल'**त्ति भीमो भीमसेन इति न्यायात् पदेऽपि पदसमुदायोपचार इत्युत्पलमालेति दृष्टव्यम्।-

वसतिदानोपरि वङ्कचूलप्रबन्धस्त्वयम्-

ढीपुरीति पुर्यां विमलयशोराज्ञः पुष्पचूलापुष्पचूलाख्यौ पुत्रीपुत्रावभूतां। पुष्पचलस्तु प्रकृत्योल्लण्ठत्वाल्लोकैर्वङ्कचूल इत्यभिधानं कृतं। तदौद्धत्यं महाजनादाकर्ण्य राज्ञा क्रोधेन नगरान्निःसारितो महारण्ये गतः। तस्य पत्नी स्वसापि च स्नेहेन तदनुगते। भिल्लैः स स्वपल्ल्यां नीत्वा स्वभूपः कृतः। एकदा तत्र सिंहगुहापल्ल्यां सूरयः प्रापुः। वर्षाकाले वसतिस्तत्पार्श्वे तैर्याचिता। वङ्कचूलः प्राह- 'मम सीमानं यावद्धर्मो न वाच्यः, मौनेनात्र स्थेयं'। त ऊचुः- 'भवद्भिर्जीववधो न कार्यः' तेन स्वीकृतं। चतुर्मास्यन्ते विहारसमयस्तस्मै ज्ञापितः। यतः-

**समणाणं सउणाणं भमरकुलाणं च गोकुलाणं च। अनिआओ वसईओ सारईआणं च मेहाणं ||१||**

ततो गच्छद्भिस्तैः सह कश्चित्प्रदेशं गत्वा स्थितः। सूरिस्तमाह- 'हे भद्र त्वममुमभिग्रहं गृहाण, अज्ञातफलानि



For Private and Personal Use Only

नाद्यानि, सप्ताष्टपदान्यपसृत्य घातो देयः, राज्ञः स्त्री न सेव्या, ध्वांक्षमांसं न खाद्यं इति'' । सुकरत्वात्तेनात्तं व्रतैकदेशत्वं, गुरून्नत्वा गृहमगमत् । एकदा स सार्थं चौरैः सह हत्वाऽरण्ये प्रविष्टः । तत्र क्षुत्क्षामैरन्यलुण्टाकैः किम्पाकवृक्षफलानि भुक्तानि, स्वयं त्वज्ञातनामानि मत्वा नादत् । ते तु मृताः । ततोऽसौ दध्यौ-'अहो नियमफलं' । ततो रात्रौ स्वगृहे प्रविष्टः पत्न्या सह सुप्तैकनरं वीक्ष्य चुकोप । तं हन्तुमिच्छन् नियमं संस्मृत्य सप्ताष्टपदान्यपसृत्य खड्ग उद्यच्छति तावत्खड्गो द्वारे पश्चात्संघट्टितः । तद्रवेण स्वसा विनिद्रोत्थाय कस्त्वमित्यवदत् ।' ततः स्वरेण स्वसारं तां ज्ञात्वा पप्रच्छ-'कथमयं पुंवेषः कृतः ?' । साह-'नरवेषेण नटनृत्यं विलोक्यात्रैव सुप्ता' । तदाकर्ण्य स्वगुरुमश्लाघत । एकदा तत्रागतसूरिशिष्यान्नत्वा जिनप्रासादबिम्बविधापनदेशनां श्रुत्वा तस्यामेव पल्ल्यां चर्मणवतीनदीतीरे श्रीवीरप्रासादमकारयत्, तत्तीर्थं जातं । कालान्तरे एको नैगमः सभार्यस्तद्यात्रायै प्रस्थितः । क्रमेण चर्मणवतीं नदीमुत्तरितुं नावमारूढौ दम्पती । तच्चैत्यशिखरं वीक्ष्य चन्दनादिभृतस्वर्णकच्चोलेन तद्द्रव्यं क्षेप्तुमारब्धवती नैगमस्त्री । तावत्तस्या हस्तात्पतितं जलमध्ये । तदा वणिजाऽभाणि-''अहो इदं राज्ञः कच्चोलं ग्रहणके रक्षितं रत्नखचितं, किं प्रत्युत्तरं तस्मै दास्ये ?'' । ततस्तदाज्ञया धीवरो मध्ये प्रविष्टः । तत्रान्तः श्रीपार्श्वबिम्बाङ्के स्थितं गृहीत्वा दत्तं । तद्रात्रौ नाविकेन स्वप्नं दृष्टं-''नद्यां क्षिप्ता पुष्पमाला यत्र गत्वा तिष्ठति तत्र बिम्बं संशोध्य एकं वङ्कचूलाय देयं'' । तेन तथा कृते स तस्य दानं दत्त्वा श्रीवीरप्रासादस्य बहिर्मण्डपे श्रीपार्श्वबिम्बमस्थापयत् । ततो नव्यं चैत्यं कारयित्वा तद्बिम्बस्थापनार्थं बहिर्मण्डपाद् ग्रहीतुमारभन्ते बहुनराः । परं तद्बिम्बं तत्रैव तस्थौ । अद्यापि तथैवास्ते । ॥१०२॥

पुनर्धीवरेणोक्तं स्वामिन् ! तत्र द्वितीयं बिम्बं सुवर्णरथं चास्ति । ततो वङ्कचूलेन पृष्टा स्वपरिषत्-`भो जानीते कोऽप्यनयोर्बिम्बयोर्ज्ञातं' । केनाचित्स्थविरेणोक्तं ``देव ! पुरा प्रजापालनृपः शत्रुसैन्येन सार्धं योद्धुं गतः । तदा भीत्या तस्य स्त्री निजं स्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति मत्वा चमर्णवत्यां नौकायां प्रक्षिप्य स्थिता । इतश्च केनचित् खलेन नृपकथाशेषत्वमुक्तं । ततः सा तां नावमाक्रम्य जलतले प्राक्षिपत् । सा मृत्वा जिनध्यानेन सुरो भूत्वा एतद्बिम्बभक्तो जातो भविष्यति । अन्यथा महिमा कथं स्यात् । तत्रैकं बिम्बं भवद्भिरानीतं, द्वितीयं तत्रास्ति'' । इति श्रुत्वा तद्बिम्बग्रहणायानेकोपायानकार्षीत् । न च तन्निर्गतं । श्रूयतेऽद्यापि वर्षमध्ये एकदिने दर्शनं ददाति । अथ श्रीवीरबिम्बापेक्षया लघीयस्तरं श्रीपार्श्वनाथबिम्बं इति महावीरस्यार्भकोऽयं देव इति मत्वा चेल्लण इत्याख्यां लोका प्राचीकथन् । सा सिंहगुहापल्ली क्रमान्महापुरं जातं । अद्यापि श्रीवीरः सचेल्लणपार्श्वनाथः संघैर्यात्रोत्सवैराराध्यते इति । अन्यदा वङ्कचूल उज्जयिन्यां राजकोशाद् बाहिर्गोधापुच्छे विलग्य प्राविशत् । कोशो दृष्टः । राजाग्रमहिष्या रुष्टया पृष्टः-`कस्त्वं ?' । तेनोचे-`चौरोऽहं' ! तयोक्तं-`मा भैषीः, मया सह संगमं कुरु' । सोऽवोचत्-`का त्वं ?' । साप्यूचे-`नृपराज्ञ्यहं' । चौरोऽवादीत्-`यद्येवं तर्हि ममाम्बा भवसि अतो यामि' । इति श्रुत्वा तया स्वनखैः स्वाङ्गं विदार्य पूत्कृतिपूर्वकमाहूता रक्षकाः । तैर्बद्ध्वा रक्षितः । तदा छन्नो नृपोऽप्यचिन्तयत्-`अहो स्त्रीचरित्रं कीदृशं ?' । ततः प्रभाते सभायां तैः स नृपस्य पुरो नीतः । नृपेण बन्धनान्मोचितः, नत्वोपाविशत् । `कथं मन्मन्दिरे त्वं समागतः ?' इति नृपेण कथिते सति वङ्कोऽवदत्-`देव ! चौर्यायाहं प्रविष्टः, पश्चाद्युष्मद्देव्या दृष्टोऽस्मि' ।



For Private and Personal Use Only

यावदन्यन्न कथयति तावत्तुष्टो नृपस्तं पुत्रतयाऽरक्षत् । मार्यमाणां देवीं ररक्ष सः । `अहो नियमानां शुभं फलं इत्यजस्त्रं दध्यौ । एकदा नृपेण युद्धार्थे प्रेषितस्तत्राहवे गाढप्रहारार्दितः सेवकैः नृपाग्रे नीतः, बहुवैद्या आकारिताः, तैः काकमांसौषधं प्रोक्तं, स नेच्छति, तदा तन्मित्रजिनदासो भूपेनाहूतः । जिनदासोऽवन्तिं समागच्छन् वने द्वे देव्यौ रुदत्यौ अद्राक्षीत् । तेन पृष्टे-`किं रुदिथः ?' । ताभ्यामुक्तं-`देव्यावावां हि सौधर्मवासिन्यौ भर्तृवर्जिते, काकामांसमनश्नन् आवयोरेष पतिर्भवेत्, त्वद्वचसा नियमभंङ्गात्तस्य दुर्गतिर्भाविनीति रोदनहेतुः'' । तच्छुत्वा स आह-`अहं तं दृढं करिष्ये' । ततः स श्राद्धो नृपप्रेरितोऽपि तं प्राह-

**वरं मच्चु वरं वाहि वरं दारिद्दसंगमो । न पुन गहियवयभंगं कज्जमकज्जं च ॥१॥**

इत्यादिना विशेषप्रतिपन्नव्रतनियमोऽच्युतकल्पमगमत् । वलमानेन तेन सूर्यौ प्रोक्ते-`किमित्यधुनापि रूदिथः ? न तावत्स मांसं संग्राहितः' । ताभ्यामभिदधे-`स चाधिकाराधनावशादच्युतं प्राप्तः, ततो नाभवदस्मद्भर्ता' । इति श्रुत्वा श्राद्धो गृहमाससादेति । अस्य ढीपुरीतीर्थस्य निर्मापयिता वङ्कचूलः ।

उत्पलमालादीनां दृष्टान्ताः स्वयं वृत्तितोऽवसेयाः । अत्रावचूर्णौ गौरवभयान्न लिख्यन्ते **॥१९४॥**

शय्यादातॄणां दिवश्च्युतानां सुखमुपदर्शयन्नाह-

**लहंति सुक्खं तु अणुन्नतुलं, आउं सुदीहं अवमच्चुहीणं ।**

**सुदंसणा गाढसुगिज्झवक्का, विसाललच्छीइ जुया महप्पा ॥१९५॥**



For Private and Personal Use Only

**व्याख्या-'लहंति सुक्खं०'** सुगमम् । नवरं **'सुदंसण'**त्ति सुरूपाः सुसम्यक्त्वाश्च । **'गाढसुगिज्झवक्क'**त्ति **गाढं** भक्त्यतिरेकात् **सुष्ठु** अतिशयेन **ग्राह्यमा**देयं **वाक्यं** येषां ते तथा ||१९५||

यदुक्तं प्राग् शय्यादानं सर्वदानेभ्यः श्रेष्ठतमं तत्सहेतुकमाविर्भावयन्नाह-

**वायंति सत्थं तह चिंतयंति, पाढंति भव्वे तह सावयंति ।**

**कुणंति वक्खाणमणन्नसत्ती, धन्नस्स गेहे मुणिणो सयावि ||१९६||**

**व्याख्या-'वायंति०'** स्पष्टा । नवरं **'सावयंति'** त्ति एकेनापि भव्येन पृष्टमर्थं व्याकुर्वन्ति, व्याख्यानं तु परिषद्मध्ये ||१९६||

न केवलं शय्यास्वाम्येव धन्यः किन्त्वनुमोदमाना अन्येऽपीत्यत आह-

**राया देसो नगरं भवणं, तह गिहिवई य सो धन्नो ।**

**विहरंति जत्थ साहू, अणुग्गहं मन्नमाणाणं ||१९७||**

**व्याख्या-'राया देसो०' राजा** मूर्धाभिषिक्तो, **देशो नगरं भवनमि**ति, तात्स्थ्यात्तद्व्यपदेश इतिन्यायाद्देशनगरभवनस्था जना गृह्यन्ते । तथा **गृहपतिश्च** सामन्तादिर्धन्यः । यत्र किं ? विहरन्ति यत्र क्षेत्रे साधवः, किं कुर्वतामेषामित्याह-**अनुग्रहं-** महाप्रसादं मन्यमानानामिति ||१९७|| शय्यादानमाहात्म्यं निगमयन्नाह-

**जो देइ उवस्सयं, मुणिवराण गुणसयसहस्सकलियाणं ।**
**तेणं दिन्ना वत्थन्नपान-सयणासणविगप्पा ॥१९८॥**

**व्याख्या-'जो देइ०'** व्याख्या स्पष्टा ॥१९८॥ दानविधावेव कृत्यशेषमुपदर्शयन् कृत्यान्तरप्रस्तावयन्नाह-

**तओ तेसु नियत्तेसु, गच्छइ जाव दारयं ।**
**वंदित्ता मुणिणो ताहे, करे अन्नं तओ इमं ॥१९९॥**

**व्याख्या-'तओ तेसु०'** स्पष्टा ॥१९९॥ तदेवाह-

**साहम्मियाण वच्छल्लं, कायव्वं भत्तिनिब्भरं ।**
**देसियं सव्वदंसीहिं, सासणस्स पभावणं ॥२००॥**

**व्याख्या-'साहम्मियाण०' समानः-** सदृशो **धर्मो**-ऽर्हच्छासनं येषां ते साधर्मिकास्तेषां **वात्सल्यं-** वस्त्रान्नपानाद्यैः सन्मानं कर्तव्यं **भक्तिनिर्भरं-** बहुमानसारं, न तु कीर्त्याद्यर्थम् । कस्माद्धेतोरित्यत आह-यस्माद्देशितं सर्वदर्शिभिः शासनस्य प्रभावनमनन्तरदृष्टान्तप्रदर्शनद्वारेणेति ॥२००॥ तथा चाह-

**महाणुभावेण गुणायरेणं, वयरेण पुव्वं सुयसायरेणं ।**
**सुयं सरंतेण जिणुत्तमाणं, वच्छल्लयं तेण कयं तु जम्हा ॥२०१॥**



For Private and Personal Use Only

**व्याख्या-'महाणुभावेण०'** क्षीराश्रवादिमहालब्धिप्रभावयुक्तेन गुणाकरेणालुब्धत्वादिगुणनिवासेन **वज्रेण**-श्रीवज्रस्वामिना, **पूर्वमि**ति एदंयुगीनजनापेक्षमुक्तं, **श्रुतसागरेण** दशपूर्वपयःपारावारकल्पेन **श्रुतं-** जिनोत्तमानामागमं 'साहम्मियवच्छल्लंमि उज्जयेत्याद्यर्हद्वचनं स्मरता यस्मात्तेनापि साधर्मिकजनवात्सल्यं दुर्भिक्षाद्यापदुद्धरणरूपं कृतमित्यक्षरार्थः ||२०१|| एवं साधर्मिकवात्सल्यं व्यवस्थाप्य यथा तद्विधेयं तथा सदृष्टान्तं षट्सूत्र्याह-

**तहा सव्वपयत्तेणं, जो नमुक्कारधारओ ।**
**सावओ सोवि दट्ठव्वो, जहा परमबंधवो ||२०२||**

**व्याख्या-'तम्हा सव्वप०'** व्याख्या सुगमा । नवरं **नमस्कारधारक** इति दर्शनमात्रधारक इति ||२०२||

**विवायं कलहं चेव, सव्वहा परिवज्जए ।**
**साहम्मिएहिं सद्धिं तु, जओ एयं वियाहियं ||२०३||**

**व्याख्या-'विवायं कल०' विवादं-** राजकुलादौ पणादिमोचनम् । **कलहं-** राटिकरणं । **च**शब्दान्मुष्ट्यादिभिस्ताडनम् । एतानि तावदन्येनापि सह सुश्राद्धो न विधत्ते, साधर्मिकैः पुनः सार्धं सर्वथा परिवर्जयेत् । यत एतद्वक्ष्यमाणं पूर्वाचार्यै**र्व्याख्यातं**-प्रतिपादितमिति ||२०३||

**जो किर पहणइ साहम्मियंमि कोवेण दंसणमयंमि ।**
**आसायणं तु सो कुणइ, निक्किवो लोगबंधूणं ||२०४||**



For Private and Personal Use Only

**व्याख्या-'जो किर०'** व्याख्या स्पष्टा ॥२०४॥

**तं अत्थं तं च सामत्थं, विन्नाणं सुउत्तमं ।**
**साहम्मियाण कज्जंमि, जं विच्चंति सुसावया ॥२०५॥**

**व्याख्या-'तं अत्थं०' स** एवार्थो- धन-धान्यादिसंचयः सुष्टु-अतिशये**नोत्तमः**- प्रधानम्, तथा **तच्च सामर्थ्यं**- प्रभुत्वं शरीरवीर्यं वा, तथा तदेव **विज्ञानं**- राजकुलादौ विज्ञपनादिनैपुण्यं, यत्किंचित् साधर्मिकाणां कार्ये **व्ययन्ते**- चरितार्थयन्ति सुश्रावका इति ॥२०५॥

**अन्नन्नदेसाण समागयाणं, अन्नन्नजाईओ समुब्भवाणं ।**
**साहम्मियाणं गुणसुट्ठियाणं, तित्थंकराणं वयणेट्ठियाणं ॥२०६॥**

**व्याख्या-'अन्नन्न०' अन्यान्यदेशेभ्यः**- सुराष्ट्रमरुमालवाद्यपरापरमण्डलेभ्यः तीर्थयात्राद्यर्थं समागतानाम्, तथा **अन्यान्यजातौ**- प्राग्वाटपल्लीवालादिवंशे ब्राह्मणक्षत्रियादिकुले वा समुद्भवानां साधर्मिकाणाम्, किंविशिष्टानामित्याह- **गुणे**त्यादि, **गुणाः**- सम्यक्त्वाणुव्रतादयः क्षान्त्यादयश्च । तेषु **सुष्ठु**-अतिशयेन संस्थितानाम् । पुनः कीदृशानां ? **तीर्थकृतां वचने स्थितानाम्**-असद्ग्रहत्यागेन भगवदाज्ञानुपालकानामिति ॥२०६॥

**वत्थन्नपाणासणखाइमेहिं, पुप्फेहिं पत्तेहि य पुप्फलेहिं ।**
**सुसावयाणं करणिज्जमेयं, कयं तु जम्हा भरहाहिवेणं ॥२०७॥**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**व्याख्या-'वत्थन्नपाणासण०'** अक्षरार्थ : सुगमः, नवर**मन्नमि**ति दुर्भिक्षादौ धान्यमिति सूत्रषट्कार्थः । भरतदृष्टान्तो वृत्तितोऽवसेयः ॥२०७॥ वात्सल्यमेव राजग्रहाद्यापदुद्धरणरूपं सदृष्टान्तमाह-

**वज्जाउहस्स रामेणं, जहा वच्छल्लयं कयं ।**
**ससत्ति अणुरूवं तु, तहा वच्छल्लयं करे ॥२०८॥**

**व्याख्या-'वज्जाउह०'** । अक्षरार्थः सुगमः । भावार्थस्तु ज्ञातगम्यस्तद्वृत्तितोऽवसेयः ॥२०८॥ साम्प्रतं द्रव्यवात्सल्यमुपसंहरन् भाववात्सल्यमुपदिशन्नाह-

**साहम्मियाण वच्छल्लं, एयं अन्नं वियाहियं ।**
**धम्मट्ठाणेसु सीयंतं, सव्वभावेण चोयए ॥२०९॥**

**व्याख्या-'साहम्मियाण०' साधर्मिकाणां वात्सल्यमि**ति वात्सल्यमेतदनन्तरोक्तम् । तथा **अन्यदि**ति भाववात्सल्यं व्याख्यातमागमे एतदिति, किं तदित्याह- **धर्मस्थानेषु-** पूजानुष्ठानादिकृत्येषु **सीदन्तं-** प्रमाद्यन्तं, श्रावकमिति प्रक्रमाद् गम्यम्, **सर्वभावेन-** सर्वोद्यमेन **नोदयेत्-** स्मारणादिभिः शिक्षयेदिति ॥२०९॥ ता एवाह-

भणियं च- **सारणा वारणा चेव, चोयणा पडिचोयणा ।**
**सावएणावि दायव्वा, सावयाणं हियट्ठया ॥२१०॥**



For Private and Personal Use Only

 

**व्याख्या-'सारणा वारणा०'** विस्मृतस्य धर्मकृत्यस्य ज्ञापनं **स्मारणा** १ । तथा कुसंसर्गाद्यकृत्यस्य निषेधनं **वारणा** २ । एतयोश्च सततं क्रियमाणयोरपि कस्यचित्प्रमादबहुलस्य नियमस्खलनादौ युक्तं किमीद्दक्कुलोत्पन्नस्य तवेत्थं प्रवर्तितुमित्यादिवाक्यैः सोपालम्भं प्रेरणं **नोदना** ३ । तथा तत्रैवासकृत् स्खलितादौ धिग् ते जन्मजीवितमित्यादिनिष्ठुरवाक्यैः गाढतरप्रेरणा **प्रतिनोदना** ४ । उक्तं च-

**'पम्हुट्ठे सारणा वुत्ता, अणायारस्स वारणा ।**
**चुक्काणं चोयणा होइ, निट्ठुरं पडिचोयणत्ति ॥१॥'**

एताश्च सुश्रावकेणापि दातव्याः, न केवलं साधुनैवेत्यपिशब्दार्थः । केषामित्याह-श्रावकाणां **हितार्थाय**-उभयलोकसुखावहाप्रमादाय । श्रावकाणामित्यत्र बहुवचनं दुःषमादोषेण प्रमादपरप्राचुर्यख्यापनार्थमिति ॥२१०॥ यस्त्वप्रीतिभयात्साधर्मिकमुपेक्षते तं प्रतीदमाह-

**रूसउ वा परो मा वा, विसं वा परियत्तउ ।**
**भासियव्वा हिया भासा, सपक्खगुणकारिया ॥२११॥**

**व्याख्या-'रूसउ वा०'** स्मारणादौ क्रियमाणे कश्चि**द्रुष्यतु**- रोषं वा विदधातु **पर :-** आत्मव्यतिरिक्तः, कश्चिच्च सहिष्णुतया वा मा रौषीत् । कस्यचिद् गुरुकर्मणः स्मारणादिकं विषमिवोद्वेगकृत् भूत्वा परावर्तेत । तथाप्यनुग्रहबुद्ध्या भाषितव्या **हिता-** तिक्ताद्यौषधपानवत्सद्यो मिथ्यात्वगदपरिहारसुन्दरा **भाषा-** स्मारणादिलक्षणा, कीद्दशा ? **स्वपक्षगुणकारिका**-प्रमादपरिहारेण धर्मकायस्योपचयादिगुणविधात्री ॥२११॥



For Private and Personal Use Only

यत: प्रमादवतां गरीयसामपि गरीयस्तरोऽनर्थस्तथा चाह-

**पमायमइरामत्तो, सुयसायरपारओ ।**

**अणंतं णंतकायंमि, कालं सो वि य संवसे ॥२१२॥**

**व्याख्या-'पमायमइ०' प्रमादमदिरामत्तो-** निद्राविकथादिमद्येन मत्तो ज्ञानाद्याचारविराधकत्वेन विशिष्टचैतन्यविकल: **श्रुतसागरपारग:-** सम्पूर्णद्वादशाङ्ग: सोऽपि च किं पुनरबहुश्रुतो**ऽनन्तकाये-** साधारणवनस्पतिरूपे**ऽनन्तं काल**मनन्तोत्सर्पिण्यवसर्पिणीलक्षणं संवसेत् । यदाह-

**'चउदसपुव्वी आहारगा य, मणनाणि वीयरागा य ।**

**हुंति पमायपरिवसा, तयणंतरमेव चउगइत्ति ॥१॥'**

यतश्चैवमतोऽसौ श्रावको वक्तव्य: ॥११२॥ कथमित्याह-

**कल्लं पोसहसालाए, नेव दिट्ठो जिणालए ।**

**साहूणं पायमूलंमि, केण कज्जेण साहि मे ॥२१३॥**

**व्याख्या-'कल्लं पो०'** सुगमा ॥२१३॥ तत: किमित्याह-

**तओ य कहिए कज्जे जइ पमायवसंगओ ।**

**वत्तव्वो सो जहाजोगं धम्मियं चोयणं इमं ॥२१४॥**



For Private and Personal Use Only

**व्याख्या-'तओ य क०'** सुगमा। नवरं **'धम्मियं'** ति धर्मादनपेता धर्म्या सोम ! महात्मन्नित्यादिश्रुत्याह्लादकसम्बोधनरूपतया, सैव धार्मिका ताम् ॥२१४॥ तामेव प्रेरणां षट्सूत्र्याह-

**दुल्लहो माणुसो जम्मो, धम्मो सव्वन्नुदेसिओ।**
**साहुसाहम्मियाणं तु, सामग्गी पुण दुल्लहा ॥२१५॥**

**व्याख्या-'दुल्लहो०'** अत्र च प्रयोगैर्व्याख्या। तथा हि-जीवोऽयमेकदा मानुष्यं जन्म संप्राप्य पुनस्तदेव दुःखेन प्राप्नोतीति प्रतिज्ञा।१। अकृतधर्मत्वे सति बह्वन्तरायान्तरितत्वादिति हेतुः २। यद्यद् बहुभिरन्तरायैरन्तरितं तत्तद्दुःखेन प्राप्यते, ब्रह्मदत्तचक्रवर्तिमित्रस्य लब्धवरस्य ब्राह्मणस्य एकदा चक्रवर्तिगृहे कृतभोजनस्य सकलभरतक्षेत्रवास्तव्यराजादिलोकगृहभोजनपर्यवसाने पुनश्चक्रवर्तिगृहे चोल्लकापरनामभोजनवारकवत् १। चाणक्यवरदत्तपाशकविपरीतपातवत् २। भरतक्षेत्रगतसर्वधान्यमध्यप्रक्षिप्तसर्षपप्रस्थकस्य जरत्स्थविरया पुनर्मीलकवद्वा ३। राज्याकाङ्क्षिकुमारस्याष्टाधिकस्तम्भशतसत्कप्रत्येकाष्टोत्तरशताश्रिधारानिरन्तरद्यूतजयवत् ४। देशान्तरागतमहाश्रेष्ठिनि तत्पुत्रनानादेशीयवणिग्हस्तविक्रीतप्रभूतरत्नसमाहारवत् ५। महाराज्यप्राप्तिहेतुचन्द्रस्वप्नदर्शनाकाङ्क्षि सुप्तकार्प्पटिकपुनस्तादृशस्वप्नलाभवत् ६। मन्त्रिदौहित्रराजसुतसुरेन्द्रदत्ताष्टचक्रारकपरिवर्तान्तरितराधावामलोचनवेधवत् ७। आर्द्रचर्मोपमगाढशेवालावनद्धमहाह्रदराकानिशीथसमयप्रबलपवनोद्भूतैकच्छिद्रविनिर्गतकच्छपग्रीवोपलब्धनिशानाथतत्क्षणसंवलितसेवालपटलपर्यस्तितपुनस्तच्छिद्रलाभवत् ८। अपारपारावारान्तर्वर्तिपूर्वापरान्तक्षिप्तयुगसमिला स्वयं छिद्रप्रवेशवत् ९। ॥११२॥

अनन्तपरमाणुसङ्घातसंघटितमहाप्रमाणस्तम्भत्रिदशसंचूर्णितविभक्ततत्परमाणुसमाहारपुनस्तत्प्रमाणस्तम्भनिष्पादनवच्चेति दृष्टान्ताः १० ॥३। अनेकजात्यन्तरप्राप्तिलक्षणबह्वन्तरायान्तरितं मानुषं जन्मेत्युपनयः ४। तस्माद् दुर्लभं मनुष्यजन्मेति निगमनम् ५ । तथा मनुष्यत्वलाभेऽपि दुर्गतिप्रसृतजन्तुधरणाद्धर्मः सर्वज्ञदेशितो जीवस्य श्रोतुमपि दुर्लभ इति प्रतिज्ञा १ । आलस्यादिबह्वन्तरायान्तरितत्वादिति हेतुः २ । तथा चागमः-

**'आलस्स १ मोह २ वन्ना ३, थंभा ४ कोहा ५ पमाय ६ किवणत्ता ७।**
**भय ८ सोगा ९ अन्नाणा १०, वक्खेव ११ कोउहला १२ रमणा १३ ॥१॥**
**एएहिं कारणेहिं, लद्धूण सुदुल्लहंपि माणुस्सं । न लहइ सुइं हियकरिं, संसारुत्तारणं जीवो ॥२॥**

अत्रापि दृष्टान्तास्त एव ।३। उपनयनिगमनेऽपि प्राग्वदायोज्ये ४,५ । तथा मनुष्यत्वजिनधर्मप्राप्तावपि साधुसाधर्मिकाणां पुनः सामग्री अतीव दुर्लभेति प्रतिज्ञा १ । दुःषमादोषेण धार्मिकजनानां स्वल्पत्वादिति हेतुः २ । उक्तं च-

**'दूरे ता चारित्ती तहाविहा लिंगिनो न सव्वत्थ । संपइ सम्मद्दिट्ठी वि दुल्लहो सुत्तनिद्दिट्ठो ॥१॥**

दृष्टान्तादि पूर्ववदिति श्लोकार्थः ॥२१५॥

ततश्च यावदिति सामग्री समग्राऽप्यस्ति तावद्धर्म एव यत्नो विधेयः । यतः-

**चलं जीयं धणं धन्नं, बंधुमित्तसमागमो ।**
**खणेण ढुक्कए वाही, ता पमाओ न जुत्तओ ॥२१६॥**



For Private and Personal Use Only

**व्याख्या-'चलं जीयं०' चलं-** क्षणविनश्वरं **जीवितमा**युर्बह्वपायाधीनत्वात् । यथा-

**शस्त्रं व्याधिर्विषं च ज्वलनजलभयव्यालवेतालशोकाः, शीतोष्णक्षुत्पिपासागरविवरमरुन्मूत्रविष्ठानिरोधाः । नानाक्षुद्रोपघाताः प्रचुरभुजिरुजः श्रान्तिगात्राभिघाता, विघ्नान्येतानि सद्यश्चिरमपि सहसा जीवितं संहरन्ति ॥१॥**

तथा **धनं-** गण्यादि । **पण्यं-** चतुर्विधम् । **धान्यं-** तु शाल्यादिशस्यमनेकविधम् । तथा **बन्धु** इत्यादि, **बन्धवो-** ज्ञातयो, **मित्राणि-** सुहृदस्तेषां च समागमोऽपि कर्मपरतन्त्रत्वाच्चल एव ।

**एगत्थ रुक्खे व कुडुंबवासे, कालं कियंतंपि खगव्व बंधू ।**
**ठाईण गच्छंति चउग्गईसु, चउद्दिसासुं व सकम्मबद्धा ॥१॥**

तथा क्षणेन ढौकते व्याधिः, शरीरस्येति गम्यते । प्रायो दुःषमायामसातबहुलत्वान्मनुष्याणामतस्तच्चलमेवमवगम्यते । तस्मात् कारणाद्विवेकिनां **प्रमादो**-धर्मानादरलक्षणो **न युक्तो**-नोचितः कर्तुमिति ॥२१६॥

**न तं चौरा विलंपंति, न तं अग्गी विणासए ।**
**न तं जूए विहारिज्जा, जं धम्मंमि पमत्तओ ॥२१७॥**

**व्याख्या-'न तं चो०'** सुगमं, नवरं **'जं धम्मंमि०'** जीवो हि धर्मे प्रमत्तः सन् देवगत्यादिभवविनाशेन यन्मनुष्यत्वप्राप्तिहारणरूपं मूलच्छेदमप्यात्मनः करोति, न तच्चौरादयः सुष्टु दुष्टा अपि कुर्वन्तीति ॥२१७॥

एवमुच्यमानोऽपि प्रमादं न मुञ्चेत्स किं करोतीत्याह- ॥११४॥

 

**किण्हसप्पं करग्गेणं, घट्टए घुंटए विसं ।**
**निहाणं सो पमुत्तूणं, कायखंडं तु गिण्हई ॥२१८॥**

**व्याख्या-'किण्हसप्पं०'** सुगमा ॥२१८॥ निगमयितुमाह-

**ता सोम ! तं वियाणंतो, मग्गं सव्वन्नुदेसियं ।**
**पमायं जं न मिल्हेसि, तं सोइसि भवन्नवे ॥२१९॥**

**व्याख्या-'ता सोम०' ता** इति तस्माद्धेतोर्हे **सौम्य !** श्रद्धासुन्दराशय ! त्वं विजानन्नपि मार्गं, मोक्षस्येति शेषः, सम्यक्ज्ञानादित्रिकरूपं सर्वज्ञदेशितं मनुष्यत्वादिसामग्रीसुदुर्लभतासमन्वितं, प्रमादं यन्न मुञ्चसि तच्छोचिष्यसि भवार्णवे, गत इति शेषः । यदागमः-

**'इय दुल्लहलंभं माणुसत्तणं पाविऊण जो जीवो । न कुणइ पारत्तहियं, सो सोयइ संकमणकाले ॥१॥**
**जह वारिमज्झछूढो, गयवरो मच्छउव्व गलगहिओ । वग्गुरपडिओव्व मिओ, संवट्टइओ जह व पक्खी ॥२॥**
**सो सोयइ मच्चु-जरा-समुत्थओ तुरियनिद्दपक्खित्तो । तायारमविंदंतो, कम्मभरपणुल्लिओ जीवो ॥३॥**
**तं तह दुल्लहलंभं, विज्जुलया चंचलं च माणुस्सं ।**
**लद्धुण जो पमायइ, सो कापुरिसो न सप्पुरिसो ॥४॥ इति ॥२१९॥**



For Private and Personal Use Only

 

भाववात्सल्यमुपसंजिहीर्षुराह-

**एवंविहाहिं वग्गूहिं चोइयव्वो य सावओ ।**
**भाववच्छल्लयं एयं, कायव्वं च दिणे दिणे ॥२२०॥**

**व्याख्या-'एवं वि०'** पाठसिद्धः ॥२२०॥ भोजनद्वार एव कृत्यान्तरमाह-

**नेवदारं पिहावेइ, भुंजमाणो सुसावओ ।**
**अणुकंपा जिणिंदेहिं, सड्ढाणं न निवारिया ॥२२१॥**

**व्याख्या-'नेव दा०'** सुगमः ॥२२१॥ एनमेवार्थं सविशेषं भावयन्नाह-

**सव्वेहिं पि जिणेहिं, दुज्जयजियरागदोसमोहेहिं ।**
**अणुकपादाणं सड्ढयाण, न कहिंचि पडिसिद्धं ॥२२२॥**

**व्याख्या-**सुगमः । नवरं **'न कहिंचि पडिसिद्धं'**ति न कस्मिंश्चिदङ्गोपाङ्गादिसूत्रे प्रतिषिद्धं, प्रत्युत प्रवर्तितं देशनाद्वारेणेति ॥२२२॥ कर्तव्यशेषमाह-

**पेससुण्हाइवग्गस्स, काउं भोयणचिंतणं ।**
**भुंजए जं च साहूणं दिन्नं असणमाइयं ॥२२३॥**



For Private and Personal Use Only

**व्याख्या-'पेससुण्हा०'** गतार्था ॥२२३॥ अत्रैव विधिशेषमाह-

**अणंतकायं बहुबीयवत्थुं, तुच्छोसहिं चेव विवज्जिऊणं ।**
**विगईण दव्वाण य काउ संखं, भुंजेइ तत्तो समयाविरुद्धं ॥२२४॥**

**व्याख्या-'अणंतकाय०'** अनन्तानामपर्यन्तानां साधारणजन्तूनां कायो देहोऽनन्तकायः कन्दादिवनस्पतिविशेषः । तथा **'बहुबीजवस्तु-'** पिंपोटरिङ्गणादिद्रव्यम् । उपलक्षणत्वाच्छेषाऽभक्ष्यद्रव्याणां परिग्रहः । तथा **तुच्छा-**ऽसारा ओषधयः कोमलमुद्गादिशम्ब्यः । ता अपि अतृप्तिहेतुत्वात् बहुसावद्यत्वाच्च विवर्ज्याः । तथा विकृतीनां पारिशेष्यन्यायाद्भक्ष्याणां दुग्धादीनां दिनगतप्रत्याख्यानान्तःसंक्षिप्तानाम् । तथा **द्रव्याणां-** सचित्ताचित्तादिनां **संख्यां कृत्वा-** स्वनियमितवस्तूपयोगरूपां, ततो भुङ्क्ते । कथमित्याह-**'समयाविरुद्धमि'**ति । **समये-** सिद्धान्ते यज्जन्तुमिश्रफलपुष्पपत्रसंयुक्तसन्धानादिकं विरुद्धं यथा न भवति तथाभ्यवहरतीति ॥२२४॥ द्वारं १५ ।

सुसम्प्रदायादिति सद्विधेयप्रस्तावो मध्याह्नकृत्यानुगतो गृहस्थधर्मप्रथायां दिनकृत्यवृत्तौ प्रथितः । अथ षोडशद्वारं विवृण्वन्नाह-

**देवं गुरुं च वंदित्ता, काउं संवरणं तहा ।**
**अंतिये साहूमाईणं, कुज्जा सज्झायमुत्तमं ॥२२५॥**



For Private and Personal Use Only

**व्याख्या-'देवं गुरुं०'** चैत्यवन्दनया देवान् वन्दनेन गुरुं च वन्दित्वा कृत्वा च **संवरणं**-दिवसचरिमग्रन्थिसहितादि वा प्रत्याख्यानं । द्वारं १६ । ततः **साध्वादीनां**- गीतार्थयतीनां- आदिशब्दात् प्रवचनकुशलश्राद्धसिद्धपुत्रादीना-**मन्तिके**- समीपे कुर्यात् **स्वाध्यायं**- वाचनापृच्छनापरावर्तनाधर्मकथानुप्रेक्षालक्षणम् । तत्र निर्जरार्थं यथायोग्यं सूत्रादिदानं ग्रहणं च वाचना ॥ तस्मिंश्च शङ्किते गुरोः प्रच्छनं प्रच्छना २ । पूर्वाधीतस्य सूत्रादेरविस्मृत्याद्यर्थमभ्यासः परावर्तना ३ । जम्बूस्वाम्यादिस्थविरचरितस्याकर्णनं कथनं वा धर्मकथा ४ । मनसैव सूत्रादेरनुस्मरणमनुप्रेक्षा ५ । पञ्चविधोऽप्ययं तत्त्वादिपरिज्ञानगोचरः ॥२२५॥

अन्नं च- **आउट्टि थूलहिंसाइ, मज्जमंसाइचायओ । जहन्नो सावओ होइ, जो नमुक्कारधारओ ॥१॥**
**धम्मजोग्गगुणाइन्नो, उक्कोसो बारसव्वओ । गिहत्थो य सयायारो, सावगो होइ मज्झिमो ॥२॥**

सम्प्रत्यागमश्रवणफलभूतमुत्सर्गविधिं प्रचिकटिषयाह-

**उस्सग्गेणं तु सड्ढो उ, सचित्ताहारवज्जओ ।**
**इक्कासणगभोई य, बंभयारी तहेव य ॥२२६॥**

**व्याख्या-'उस्सग्गेण०'** उत्सर्गेण पुनर्यथोक्तकारितया श्राद्धः सचित्ताहारवर्जकः । तदशक्तस्तु तत्कृतपरिमाणोऽपि स्यात् । यदुक्तम्-



For Private and Personal Use Only

 

**'निरवज्जाहारेणं निज्जीवेणं परित्तमीसेणं । अत्ताणुसंधणपरा सुसावगा एरिसा हुंति ॥१॥**

तथा **एकाशनकभोजी च-** प्राय एकभक्तादितपःकर्मकारी । ब्रह्मचारी तथैव चेति ॥२२६॥

यस्त्वेकभक्तं कर्तुमशक्तस्तद्विधिमाह-

**अह न सक्कइ काउं, जे एकभत्तं जओ गिही ।**
**दिवसस्स अट्ठमे भागे, तओ भुंजे सुसावओ ॥२२७॥**

**व्याख्या-'अह न स०'** अथ कथञ्चिद् यः कोऽपि न शक्नोत्येकभक्तं कर्तुं । 'जे' इति पादपूरणे । ततः किमित्याह-ततो **दिवसस्याष्टमे भागे**ऽन्त्यमुहूर्तद्वयलक्षणे सुश्रावको भुङ्क्ते, न तु यामिनीमुखादौ, निशाशनस्य महादोषप्रसङ्गादिति ॥२२७॥

तानेव दोषानाह-

**तज्जोणियाण जीवाणं, तहा संपाइमाण य ।**
**निसिभत्ते वहो दिट्ठो, सव्वदंसीहिं सव्वहा ॥२२८॥**

**व्याख्या-'तज्जोणि०'** तस्मिन् संसक्तान्नसक्त्वादौ भक्ते निगोदरेणिकादीनां योनिरुत्पत्तिर्येषां ते तद्योनिका जीवास्तेषां, तथा **सम्पातिमानां** कुंथुपिपीलिकादीनां, च शब्दादात्मनश्च कीटिकादिभिर्मेधादिघातान्निशि भक्ते **वधो-** विनाशो दृष्टः सर्वदर्शिभिः सर्वथेति । यदुक्तं निशीथभाष्ये- 

For Private and Personal Use Only

**जइवि य फासुयदव्वं, कुंथू पणगा तहवि दुप्पस्सा । पच्चक्खनाणिणो वि हु, राईभत्तं परिहरंति ॥१॥**
**जइ वि हु पिपीलिआई, दीसंति पईवमाइउज्जोए । तह वि खलु अणाइन्नं मूलवयविराहणा जेण ॥२॥ २२८॥**

निशाभोजिनां दृष्टान्तद्वारेणापायं दर्शयति-

**निसिं जे नहि वज्जंति, बाला कुग्गहमोहिया ।**
**एलगच्छुव्व दुक्खाइं, लहंते मरुओ जहा ॥२२९॥**

**व्याख्या-'निसिं जे०' निशामि**त्युपचारान्निशाभोजनं ये न वर्जयन्ति **बालाः**- सदसद्विवेकविकलाः बालत्वमेव व्यक्तीकुर्वन्नाह-**कुग्रहेण**- निशाभोजनविषयेऽसद्ग्रहेण **मोहिता**- गृद्धिं ग्राहिता ते, किमित्याह- एलकाक्षमरुकवद् दुःखानि लभन्त इत्यक्षरार्थः । भावार्थस्तु कथातोऽवसेयः । सा चेयम्- इह भरते दशार्णपुरे धनसार्थवाहधनवत्योः सुता धनश्रीर्मिथ्यादृष्टिधनदेवेन परिणीतापि श्राद्धधर्मं पत्यौ हसत्यपि कुरुते, एकदा निशिभक्तस्य दोषान् पत्या पृष्टा सा तद्दोषान् प्रकटय्य पतिं दिवसचरिमं कारितवती । ततो देवतया कृतधनदेवभगिनीरूपया परीक्षार्थं भोज्ये आनीते, धनश्रिया नियमे स्मारितेऽपि, भोक्तुमुपविष्टश्चपेटया पातितदृग्युगः सोऽभूत् । पत्न्या कायोत्सर्गतोषितदेवतया पुनर्दत्ततत्कालमारितैडकदृग्युगः प्रातर्जनपृच्छायां कथितस्वव्यतिकरे एडकाक्ष इति प्रसिद्धोऽभूत् ॥

मरुक इति रविगुप्तद्विजस्तत्कथा चेयम्- इह भरते काम्पिल्यपुरे मधुद्विजसुतो वामदेवो निशाभोजी श्रावकमित्रेण जन्ययात्रायां नीतोऽन्तरावासके रात्रौ श्राद्धानुपहसन् स्वार्थपक्वौदनमध्ये धूमार्तपतिताहिपोतविषेण मूर्च्छित- ॥१२०॥

स्तद्ग्रामासन्नदशपुरनृपेण सज्जीकृतः । केवलीपार्श्वे धर्मं श्रुत्वा प्रतिबुद्धः । श्राद्धगर्हास्वपापसंजातदुःखादि प्रकाशितवान् । केवलिनोक्तं-पुरा रात्रिभोजनात्तव बहूनि पापानि लग्नानि सन्ति । ततः तत्प्रश्नेन केवली कथयति-विशालापुर्यां महेन्द्रदेवद्विजसुतरविगुप्तो वेश्याव्यसनादिपात्रं । विशिष्य रात्रिभोजी श्राद्धानुपहसन् जनके मृते गृहस्वामी जातः । ततः सविशेषं पापासक्तः प्रच्छर्दिकादिरोगी जातः । तैश्च मृत्वा तृतीये नरके क्षेत्रजान्योन्योदीरितपरमाधार्मिककृतवेदनानुभूयानन्तभवान् भ्रान्त्वा त्वमत्र जात इति प्राग्भवस्वरूपं श्रुत्वा पश्चादागत्य मिथ्यादृशं पितरं प्रबोध्य पितापुत्रौ प्रव्रज्य द्वावपि स्वर्गत्वा क्रमात् मोक्षं यास्यतः ||२२९|| १७ द्वारम् || साम्प्रतमष्टादशं सत्कारद्वारमाह-

**तओ वियालवेलाए, अत्थमंते दिवायरे ।**
**पुव्वुत्तेण विहाणेणं, पुणो वंदे जिणुत्तमे ||२३०||**

**व्याख्या-'तओ विया०' ततो-** वैकालिकानन्तरं **विकालवेलायाम**न्त्यमुहूर्तरूपायां, तामेव व्यनक्ति- अस्तमयति दिवाकरेऽर्धबिम्बादर्वागित्यर्थः । पूर्वोक्तेन विधानेन, पूजां कृत्वेति शेषः, पुनर्वन्दते जिनोत्तमान् प्रसिद्धचैत्यवन्दनविधिनेति ||२३०|| द्वार० १८||

अथ एकोनविंशं वन्दनकोपलक्षितमावश्यकद्वारमाह-

**तओ पोसहसालाए, गंतूणं तु पमज्जए ।**
**ठावित्ता तत्थ सूरिं तु, तओ सामाइयं करे ||२३१||**



For Private and Personal Use Only

**व्याख्या-तओ पोस० ततः**-तृतीयपूजानन्तरं श्रावकः पौषधशालायां गत्वा यतनया तां प्रमार्ष्टि । ततो नमस्कारपूर्वकं व्यवहित**तु**शब्दस्यैवार्थत्वात् स्थापयित्वैव तत्र **सूरिमि**ति स्थापनाचार्यं, ततो विधिना सामायिकं करोति, न तच्छून्यमपि सामायिकादि करोतीति । अत्राह कश्चिन्ननु किं श्रावकस्यापि क्वाप्यागमे स्थापनाचार्यस्थापनाऽस्त्यस्तीति ब्रूमः-

**'गुरुविरहंमि ठवणा, गुरूवएसोवदंसणत्थं च ।**
**जिणविरहंमि जिणबिंब-सेवणामंतणं सहलं ।।१।।'**

इत्यादि विशेषवचनप्रामाण्यात् । यतिसामायिकप्रस्तावे भदन्तशब्दं व्याख्यानयता 'गुरुविरहंमी'त्यादि भाष्यकृता साधुमाश्रित्योक्तं न श्रावकमिति चेत्, तर्हि प्रष्टव्योऽत्र भवान्, किं श्रावकः सामायिकमुच्चरन् भदन्तशब्दं भणति न वा ? यदि भणति तर्हि साधुवत् साक्षाद्गुरोरभावे सोऽपि स्थापनाचार्यं स्थापयति, उभयत्रापि न्यायस्य समानत्वात् । द्वितीयश्च पक्षो न घटत एव । तद्वर्जसामायिकस्यार्हतैवोच्चरणीयत्वात् । नोदना त्वेतस्य वृत्तितो ज्ञेया ।।२३१।।
अथ तत्र साधवोऽपि सन्ति, श्रावकेण गृहे सामायिकं कृतं, ततोऽसौ साधुसमीपे गत्वा किं करोतीत्याह-

**काऊण य सामाइयं, इरियं पडिक्कमिय गमणमालोए ।**
**वंदित्तु सूरिमाई, सज्झायावस्सयं कुणई ।।२३२।।**



For Private and Personal Use Only

**व्याख्या-'काऊण य०'** साधुसाक्षिकं पुनः सामायिकं कृत्वा ईर्यां प्रतिक्रम्य गमनमालोचयेत् । तत आचार्यादीन् वन्दित्वा स्वाध्यायं काले चावश्यकं करोति ॥२३२॥ साम्प्रतं श्रावकस्य कार्योत्पत्तौ सामायिके पारिते ततः क्षणिकत्वसद्भावे पुनः पुनस्तत्करणेन कालवृद्धेः फलप्रदर्शनायाह-

**जावइयं चेव कालं तु, सड्ढो सामाइयं करे ।**
**तत्तियं चेव कालं तु, विन्नेओ समणो जहा ॥२३३॥**

**व्याख्या-'जावइयं०'** यावन्तमेव कालं पुनः पुनः मुहूर्ताद्यवस्थानलक्षणं श्राद्धः सामायिकं करोति तावन्तमेव पुनः पुनः कालं विज्ञेयोऽसौ श्रमणो यथा । अनेनैव च कारणेनानेकशः सामायिकं करोति । तथा चावश्यकनिर्युक्तौ

**सामाइअंमि उ कए, समणो इव सावओ हवइ जम्हा ।**
**एएण कारणेणं, बहुसो सामाइयं कुज्जा ॥१॥**
**जीवो पमायबहुलो, बहुसो वि य बहुविहेसु अत्थेसु ।**
**एएण कारणेणं, बहुसो सामाइयं कुज्जा ॥२॥ ॥२३३॥**

एवं श्रावकसामायिकमहत्त्वे प्रदर्शिते मा मुग्धमतेः साधुसामायिकविषये गौणबुद्धिरिति तत्प्राधान्यख्यापनपूर्वकमुपदिशन्नाह-



For Private and Personal Use Only

**सावज्जजोगपरिवज्जणट्ठा, सामाइयं केवलियं पसत्थं ।**
**गिहत्थधम्मा परमंति नच्चा, कुज्जा बुहो आयहियं परत्था ॥२३४॥**

**व्याख्या-'सावज्ज०'** सावद्ययोगपरिवर्जनार्थं सामायिकं **कैवलिकं**-प्रतिपूर्णं **प्रशस्तं**-पवित्रं, एतदेव गृहस्थ-धर्मात्**परमं**- प्रधानमिति ज्ञात्वा कुर्याद् **बुधो**- विद्वान् **आत्महितं**- आत्मोपकारकं **परार्थ**मिति, परो मोक्षस्तदर्थं, न तु सुरलोकावाप्त्यर्थम् । अनेन निदानपरिहारमाह ॥२३४॥

**जो समो सव्वभूएसु, तसेसु थावरेसु अ ।**
**तस्स सामाइअं होइ, इइ केवलिभासिअं ॥२३५॥**

प्रसङ्गागतसाधुसामायिकमुपदिष्टमिदानीं तु कृतसामायिकः सन् प्रतिक्रमण-वेलायामावश्यकं करोतीत्येतदेवाह-

**संमत्तमाइयाणं, अइयाराणं विसोहणं ।**
**आवस्सयं च कायव्वं, सड्ढेणं तु दिणे दिणे ॥२३६॥**

**व्याख्या-'सम्मत्तमा०'** सम्यक्त्वादीनामादिशब्दादणुव्रतादीनां अतीचाराणां चतुर्विंशशतसंख्यानां **विशोधनं**-विशुद्धिकारकं षड्विधमावश्यकं पूर्वाचार्यपरम्परायातं, चशब्दान्निरतिचारेणापि तृतीयवैद्यौषधकल्पं **कर्त्तव्यं**- करणीयं **श्राद्धेन** विरतेन । **तु**शब्दादभ्यासाद्यर्थं यथाभद्रकेणापि । **दिने दिने**- प्रतिदिवसमुभयसन्ध्यमिति ॥२३५।२३६॥ ननु



For Private and Personal Use Only

विरताविरतः प्रतिक्रामतु इतरस्य तु किं प्रतिक्रमणेन ? ग्रामाभावे सीमाकरणवत् । उच्यते-नातिचाराणामेव प्रतिक्रमणम्, किन्तु चतुर्षु स्थानेषु इत्यत आह-

**पडिसिद्धाणं करणे, किच्चाणमकरणे य पडिक्कमणं ।**
**असद्दहणे य तहा, विवरीयपरूवणाए य ।।२३७।।**

**व्याख्या-'पडिसिद्धाणं०'** प्रतिषिद्धानि विदितयथावस्थितभवस्वभावस्य श्रावकस्य, यथा- न कर्तव्यं कुलवधूनां वेश्यागृहगमनमिव परतीर्थगमनं । निरोद्धव्या दुरन्ताः कषायाः । वर्जनीयः स्थूलप्राणातिपाताद्याश्रवः । परिहर्तव्यो मधुमद्यादिपरिभोगः । इत्यादीनां निषिद्धानां करणे । तथा कृत्यानां **'नवकारेण विबोहे'**त्यादि शास्त्रोक्तानामकरणे प्रतिक्रमणम् । तथा **अश्रद्धाने-** जिनोक्तभावानां विप्रत्यये । **चः** समुच्चये । तथा विपरीतप्ररूपणायां च, यथा-एकान्ततो वस्त्वनित्यं नित्यं वा, द्रव्यमेव पर्याया एव वेत्यादिकायां प्रतिक्रमणं भवतीति ।।२३७।। पूर्वोक्तार्थं सविशेषं सूत्रकृदेवाह-

**आइन्नं अणवज्जं च, गीयत्थाणं सुसंमयं ।**
**दीसइ अणुओगंमि, तथा वायगभासिए ।।२३८।।**

**व्याख्या- आइन्नं अण०'** सुगमः ।।२३८।। अनुयोगद्वारोक्तं दर्शयन्नाह-



For Private and Personal Use Only

**समणेण सावएण य, अवस्स कायव्वयं हवइ जम्हा ।**
**अंतो अहोनिसिस्स, तम्हा आवस्सयं नाम ॥२३९॥**

**व्याख्या-'समणेण०'** श्रमणेन श्रावकेन, चशब्दात् श्रमणीश्राविकाणां चावश्यं कर्तव्यं भवति । **'जम्हा०** यस्मात् **'अन्तो अहो०'** अहोरात्रमध्ये, सन्ध्याद्वय इत्यर्थः, तस्मादावश्यकमिति निरुक्तं नाम भवतीति शेषः ॥२३९॥

आवश्यकस्यैवानुयोगद्वारोक्तानि पर्यायनामान्याह-

**आवस्सयं १ अवस्सकरणिज्जं, २ धुव ३ निग्गहो ४ विसोही ५ य ।**
**अज्झयणछक्क ६ वग्गो ७ नाओ ८ आराहणा ९ मग्गो १० ॥२४०॥**

**व्याख्या-'आवस्सयं०'** एतानि दश पर्यायनामानि । तत्रावश्यकं प्रथमं पर्यायनाम गाथाद्वयेन व्याख्यायते-

**'जदवस्सं कायव्वं, तेणावस्सयमिदं गुणाणं वा । आवस्सयमाहारो, आमज्जायाभिविहिवाई ॥१॥**
**आवासं वा जीवं, करेइ जं नाणदंसणगुणाणं । संनिज्झभावणाछायं, णेहि वावस्सयं गुणओ ॥२॥**

**यद्-** यस्मादवश्यं कर्तव्यं **तेन-** तस्मादावश्यकमिदं समणेणं सावएणमित्यादिगाथायाः पर्यवसितार्थकथनमेव । अथवा मर्यादयाऽभिविधिना वा गुणानामाश्रय आधार इदमित्यर्थः । यद्वा ज्ञानादिगुणानामासमन्ताद्वश्यकमात्मानं करोतीत्यावश्यकम् । अथवा वस निवास इति गुणशून्यमात्मानं गुणैरासमन्ताद्वासयति गुणसान्निध्यमात्मनः करोतीत्यावसिकं । अथवा यथा वस्त्रं वासधूपादयस्तथा गुणैरासमन्तदात्मानं वासयति भावयति रञ्जयतीत्यावश्यकमिति ।



For Private and Personal Use Only

आद्यं पर्यायनाम व्याख्यातम् १। एवं शेषाण्यपि ज्ञेयानि। तद्यथा-मुमुक्षुभिरवश्यं क्रियत इत्यवश्यकरणीयमिति २। तथार्थतो ध्रुवत्वाच्छाश्वतत्वाद् ध्रुवम् ३। निगृह्यन्ते इन्द्रियकषायादयो भावशत्रवोऽनेनेति निग्रहः। अन्ये तु प्रवाहतोऽनादिकालीनत्वात् ध्रुवं कर्म तन्निगृह्यतेऽनेनेति ध्रुवनिग्रह इत्येकमेवेदं पर्यायनाम व्याचक्षते ४। कर्ममलिनस्यात्मनो विशुद्धिहेतुत्वाद्विशुद्धिः ५। सामायिकादि षड्ध्ययनात्मकत्वादध्ययनषट्कम् ६। वृजीण् वर्जने, वृज्यन्ते दूरतः परिह्रियन्ते रागादयो दोषा अनेनेति वर्ज्यः। अन्ये तु षडध्ययनकलापात्मकत्वादध्ययनषड्वर्ग इत्येवमप्येकमेव पर्यायनाम ब्रुवते ७। अभिप्रेतार्थसिद्धेः सम्यगुपायत्वान्न्यायः। अथवा जीवकर्मसम्बन्धापनयनान्न्यायः ८। मोक्षाराधनहेतुत्वादाराधना ९। मोक्षपुरप्रापकत्वान्मार्ग इव मार्गः १०॥२४०॥

प्रतिक्रमणस्थानानि दर्शयन्नाह-

**तं तु पोसहसालाए, घरे वा जिणमंदिरे।**
**साहूणं पायमूलंमि, करेई जह संभवं ॥२४१॥**

**व्याख्या-'तं तु पोस०'** उक्तार्था। नवरं **तं तु**त्ति तत्पुनरावश्यकं दैवसिकादि पञ्चप्रकारम्। तद्विस्तरो वृत्तितोऽवसेयः ॥२४१॥ आवश्यककरणे विधिशेषमाह-



For Private and Personal Use Only

**आवस्सयं करेमाणो, अट्टमट्टं न चिंतए ।**
**उवउत्तो सुत्तत्थे, अइयारेसु तहेव य ॥ २४२॥ द्वारं-१९**

**व्याख्या-'आवस्सयं०'** आवश्यकं षड्विधमपि कुर्वन् **आर्तम्**-आर्तध्यानं न चिन्तयेत् । स्वल्पस्य त्वशक्यपरिहार्यत्वात्तस्यापि मिथ्यादुष्कृतं दद्यात् । उपयुक्तश्च सूत्रार्थयोर्विशेषे**णातिचारेष्व**तिचारपदेषु सुष्ठूपयुक्तस्तथैव चेति उक्तः करणविधिः ॥२४२॥ द्वारम् १९।

साम्प्रतं यतिविश्रामणाद्वारमुल्लङ्घ्य

**सज्झाएण पसत्थं, ज्झाणं जाणइ य सव्वपरमत्थं । सज्झाए वड्ढंतो खणे खणे जाइ वेरग्गं ॥१॥** तथा
**'कम्ममसंखिज्जभवं खवेइ अणुसमयमेव आउत्तो । अन्नयरंमि वि जोगे सज्झायंमि विसेसेणं ॥२॥'**
इत्याद्यनेकगुणहेतुत्वात् प्राधान्यख्यापनार्थमावश्यकद्वारानन्तरं स्वाध्यायद्वारं विवृण्वन्नाह-

**आवस्सयं तु काऊणं, सज्झायं च तहेव य ।**
**तओ य पुच्छे सुत्तत्थे, गुरुणो गुणसायरे ॥२४३॥**

**व्याख्या-'आवस्सयं०'** अवश्यकरणादावश्यकं कृत्वैव **स्वाध्यायं-** स्वप्रज्ञानुसारेण पूर्वाधीतकर्मग्रन्थादिपरावर्तनरूपं शीलाङ्गरथनमस्कारावलिकादिगुणनरूपं वा । ततश्च पृच्छेत् सूत्रार्थौ यौ गुणयता नावबुद्धौ **गुरून् गुणसागरान्-** ज्ञानादिगुणगणमणिसमुद्रानिति ॥२४३॥ अधुना श्लोकपूर्वार्धेन यतिविश्रामणाख्यैकविंशद्वारव्याख्यानपूर्वकमुत्त- ॥१२८॥

रार्द्धेन द्वाविंशं धर्मदेशनाद्वारं प्रस्तावयन्नाह-

**विस्सामणं च काऊणं, पुच्छित्ता सेसकिच्चयं ।**
**गंतुं निययगेहंमि, करेइ धम्मदेसणं ॥२४४॥**

**व्याख्या-'विस्सामण०'** अत्र च साधुभिरुत्सर्गतः सम्बाधना न कारयितव्या । द्वितीयपदे साधुभ्यः सकाशात्, तदभावे तथाविधश्रावकादेरपि । अत्र सुबाहुदृष्टान्तानुसारेण श्रावकस्यापि फलं योजनीयम् । सुबाहुवृत्तान्तः पुनरन्यत्र भरतेश्वरचरित्रादिष्ववसेयः । यद्यपि चैते भगवन्तो महर्षयो विश्रामणां न कारयन्ति, तथापि परिणामविशुद्ध्या तद्विषये क्षमाश्रमणं ददतो निर्जरालाभो विनयश्च कृतो भवति इत्येवं विश्रामणां च कृत्वा पृष्ट्वा **शेषं कृत्यं**-सुखसंयमयात्रादिकमिति ॥ द्वारम् ॥२१॥ ततः सामायिकं पारयित्वा गत्वा च निजगृहे करोति धर्मदेशनामिति ॥२४४॥

यदग्रे च तां करोति तद्दर्शनाय द्विसूत्रीमाह-

**भज्जा पुत्ता य नत्तू य, धीया सुण्हा य बंधवा ।**
**भिच्चा मित्ता य पेसा य, आरंभेसु पसत्तया ॥२४५॥**
**जओ सव्वन्नुपन्नत्तं, धम्मं न सुणंति ते पुणो ।**
**तेणं धम्मोवएसं तु, देई स घरमागओ ॥२४६॥**



For Private and Personal Use Only

**व्याख्या-'भज्जा पु०' 'जओ सव्व०'** सुबोधौ । नवरं **'नत्तुय'**त्ति नप्तारः पौत्राः । **'भिच्च'**त्ति भृत्याः पदातयः । **मित्राणि-** सुहृदः । **प्रेष्याः-** कर्मकराः । **च**शब्दाः सर्वेऽपि समुच्चये । एते च किमित्याह- **आरम्भेषु-** पृथिव्याद्युपमर्देषु सार्थकेष्वनर्थकेषु च **प्रसक्ता**स्तत्पराः, सर्वत्रायतनाकारिण इत्यर्थः । **यतो-** यस्माद्धेतोः सर्वज्ञप्रज्ञप्तं जीवदयाप्रधानं धर्मं न **शृण्वन्ति-** नाकर्णयन्ति, पुनःशब्दश्चात्र विशेषणार्थः, स च प्रमादबाहुल्यं तेषां विशिनष्टि । ततश्चायमर्थो-गाढप्रमादपरतया क्षणिका अपि ते क्षणमपि न धर्मं शृण्वन्ति, तेन कारणेन **धर्मोपदेशं-** सम्यग्दर्शनमूलदेशविरत्यादिप्रतिपादनरूपं, तुशब्दाद्यतनोपदेशादि च, ददाति स्वगृहमागत इति ||२४५-२४६||

ननु यदि तेषामुपदेशं न ददाति तदा को दोष इत्याशङ्क्याह-

**सव्वन्नुणा पणीयं, जई धम्मं नावगाहए ।**
**इह लोए परलोए य, तेसिं दोसेण लिप्पए ||२४७||**

**व्याख्या-'सव्वन्नुणा०'** सर्वज्ञेन प्रणीतं तु यदि धर्मं, तानिति शेषः, **नावगाहयति,** न ज्ञापयति सति सामर्थ्ये इति भावः, तदा इहलोके परलोके च तेषां दोषेण **लिप्यते**-गृह्यते । तत्रेहलोकदोषश्चौर्यादिप्रवृत्तेर्वधबन्धनादिः, परलोकदोषस्तु दुर्गतिगमनादिरिति ||२४७|| किं कोऽप्यन्यकृतगुणदोषाभ्यां गृह्यते ? येनेदमुच्यते, सत्यं, तथा चाह-

**जेणं लोगट्ठिई एसा, जो चोरभत्तदायगो ।**
**लिंपइ सो तस्स दोसेणं, एवं धम्मे वियाणह ||२४८||**



For Private and Personal Use Only

**व्याख्या-'जेणं लोग०'** सुगमः । नवरं **लिप्यते-** राजपुरुषैर्दण्ड्यते, **तस्य-** चौरस्य दोषेण चौरिकादिसंभवेन, तथा च नीतिः-'**चौरश्चौरापको मन्त्री, भेदज्ञः काणकः क्रयी । अन्नदः स्थानदश्चैव चौरः, सप्तविधः स्मृतः ॥१॥**' इति ॥२४८॥

निगमनमाह-

**तम्हा नायतत्तेणं, सड्ढेणं तु दिणे दिणे ।**
**दव्वओ भावओ पुव्विं, कायव्वमणुसासणं ॥२४९॥**

**व्याख्या-'तम्हा नाय०'** प्रकटार्थः । नवर**मनुशासनं-** सुस्थितदुःस्थितत्वादिचिन्तनम् ॥२४९॥ तदेवाह-

**दव्वओ वत्थमाईणि, भावओ धम्मदेसणं ।**
**सुद्धं धम्मं जिणुद्दिट्ठं, वक्खमाणो न बज्झए ॥२५०॥**

**व्याख्या-'दव्वओ वत्थमाईणि भावओ धम्मदेसणं०'** द्रव्यतः पुत्रकलत्रदुहित्रादीनां यथायोग्यं वस्त्रादि ददाति, 'पोष्यपोषक' इति वचनात् । भावतस्तु तेषामेव धर्मदेशनां करोति । यद्येवमपि ते न प्रतिबुध्यन्ते ततः किमित्याह- शुद्धं धर्मं जिनोद्दिष्टं **व्याचक्षाणः-** स्वशक्त्या कथयन् **न बध्यते-** न लिप्यते जिनाज्ञाराधकत्वेन, तत्कृतकर्मणेति शेषः ॥२५०॥ तमेव धर्मदेशनाविधिमाह-



For Private and Personal Use Only

**भो भो सुणेह तुब्भे, धम्मस्स य कारणं जिणुद्दिट्ठं ।**
**पढमं ठाणनिवेसो, जिणभवणं जत्थ साहम्मी ॥२५१॥**

**व्याख्या-'भो भो सुणेह०'** स्पष्टार्थः ॥२५१॥ साधर्मिकानेव भेदत आह-

**साहम्मिया य दुविहा, दव्वे भावे य हुंति नायव्वा ।**
**भावे जिणधम्मविऊ, भवभीया निच्चमुज्जुत्ता ॥२५२॥**

**व्याख्या-'साहम्मिया य०'** साधर्मिकास्तु द्विविधा । द्रव्ये भावे च भवन्ति ज्ञातव्याः । तत्र द्रव्यसाधर्मिका जातिकुलकर्मादिभिः समानाचाराः प्रतीतत्वान्न सूत्रे व्याख्याताः । भावे तु जिनधर्मविदो भवभीता नित्यमुद्यता इति शेषः ॥२५२॥

एवंविधानां श्राद्धानां मध्ये वसतां न धर्महानिः स्यादित्युपदर्शयंस्तत्रैव वसनोपदेशमाह-

**तेसिं मज्झट्ठियाणं तु, मंदा सड्ढा न जायई ।**
**ताव तत्थ उवसियव्वं, जत्थ गुणधारिणो सड्ढा ॥२५३॥**

**व्याख्या-'तेसिं०'** स्पष्टार्था ॥२५३॥ सतां संसर्गोऽपि कुसंसर्गवर्जनादेव फलवान् भवतीति प्रतिषेधार्थमाह-

**जूआरवेस नडनट्ट, भट्ट तह कुकम्मकारीणं ।**
**संवासं वज्जिज्जा, घरहट्टाणं च मित्ती य ॥२५४॥**



For Private and Personal Use Only

**व्याख्या-'जूयारवेस०' द्यूतकारा:-** कितवा: । **वेश्या:-** पण्ययोषित: । **नटा-** नाटककर्तार: । **नट्टा:-** स्वयं ये नृत्यन्ति । **भटाश्चारणा:** । ततो द्यूतकाराश्च वेश्याश्चेत्यादिद्वन्द्वस्ततस्तैर्लुप्ततृतीया बहुवचनाश्चैवं सूत्रे पाठ: । तथा कुकर्मकारिणो मात्सिकवागुरिकादय:, षष्ठी वा तृतीयार्थेऽतस्तैश्च किमित्याह-**संवासं-** सह वसनं वर्जयेत् । कथमिति चेदुच्यते, **'घरहट्टाणं चे'**ति सूचनात् सूत्रस्येति कृत्वा प्रातिवेश्मिकत्वाभावेनेति भाव: । तथा तै: सह मैत्री वर्जनीयेति पृथक् क्रियाध्याहार: ॥२५४॥ तथा

**कुतित्थियाण संसग्गी, कुतित्थगमणं च वज्जणिज्जं तु ।**
**भट्ठायारेहिं समं संथवणं, तहय आलावो ॥२५५॥**

**व्याख्या-'कुतित्थियाण०'** कुत्सितमसारं संसारसागरोत्तारकत्वायोगात्तीर्थमेकान्तवादात्मकं प्रवचनम्, तच्च तत्तीर्थं, तद्विद्यते येषां ते कुतीर्थिका: । ते च क्रियावाद्यादय: कुलिङ्गिन: । त्रिषष्ट्यधिकत्रिशतसंख्यानामेतेषां कुतीर्थिकानां **संसर्ग:-** एकत्र संवासभाषादिरूप: तथा **कुतीर्थगमनं च-** तत्परिगृहीतदेवतायतनेषु च कुतूहलादिना व्रजनम् । एतच्च मिथ्यात्वस्थैर्यादिदोषसंभवाद्वर्जनीयमेव । उक्तं च-

**'वेसागिहेसु गमनं जहा विरुद्धं महाकुलवहूणं । जाणाहि तहा सावयसावियाणं कुतित्थेसु ॥१॥**
**भणइ जणो नारीणं, सइत्तणं कत्थ ? वेसगिहगमणे । एवं कुतित्थगमणे, सम्मत्तं सावगस्स कहं ? ॥२॥**
**किल धम्मंमि य कुसलो, सुसावओ सोवि आगओ इहइं । तम्हा एस पहाणो, सिवाइभणिओ उ जो धम्मो ॥३॥**



For Private and Personal Use Only

**एवं तब्भत्ताणं थिरकरणं कुणइ तत्थ वच्चंतो । वड्ढारइ मिच्छत्तं, सुबोहिबीयं हणए तेसिं ॥४॥**

तथा भ्रष्टश्च्युत आचारो ज्ञानादि पञ्चप्रकारो येषां ते भ्रष्टाचारास्ते च समयप्रसिद्धाः पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दरूपाः । एतत्स्वरूपं वन्दनविचारादवसेयम् । एतैश्च समं **संस्तवः**- परिचयस्**तथा चालापः**- सुखादिप्रश्नः, स चाकीर्त्यादिहेतुत्वाद्वर्जनीय इत्यत्रापि सम्बध्यते । उक्तं च-

**'पासत्थाइं वंदमाणस्स, ने व कित्ती न निज्जरा होइ । कायकिलेसं एमेव, कुणइ तह कम्मबंधं च ॥१॥**

तथा-'**अविरयसंजयवसहीगमणागमणं न तत्थ कायव्वं । जायइ जेणालावो, आलावो पीइ पणउत्ति ॥२॥**

**तीए वि य दक्खिनं, दक्खिन्ने उचियकज्जपडिवत्ती । तीए संथवणाइं करंति, पुणो पुणो ताणं ॥३॥**

**तेहिं कीरंतेहिं समत्तं, एत्थ दूसियं होइ । सम्मत्तदूसणाए नासइ, जिणदेसिओ धम्मो ॥४॥**

**जिणवर धम्मेण विणा, संसारमहोयही अपारिल्लो । तरिउं न चेव तीरइ, तेण निसिद्धो गमो तत्थ ॥५॥**

इति गाथार्थः ॥२५५॥

**जेसिं संसग्गिदोसेणं, संमत्तंपि विणस्सए ।**

**विणट्ठे खलु सम्मत्ते, अणुट्ठाणं निरत्थयं ॥२५६॥**

**व्याख्या-'जेसिं जं०'** येषां संसर्गदोषेण **सम्यक्त्वम्**-अर्हतप्रणीततत्त्वश्रद्धानरूपमपि विनश्यत्यपगच्छति, आस्तां तावद्देशविरत्यादिकमित्यपिशब्दार्थः । विनष्टे च सम्यक्त्वे**ऽनुष्ठानं** तपोनियमावश्यकादिकं **निरर्थकं**- निष्फल- ॥१३४॥

मेव बीजाभावे कृषिकर्मकरणवत् । एवं सर्वोपाधिविशुद्धदर्शनवतो जीवस्य विशेषकर्तव्यताद्वारेण लिङ्गादि दर्श्यते । यथा-

**'सव्वत्थ उचियकरणं गुणाणुराओ रई य जिणवयणे । अगुणेसु य मज्झत्थं सम्मद्दिट्ठिस्स लिंगाइं ॥१॥**

एवं चैतन्निरुपमसुखसाधनमनुपमं सम्यक्त्वरत्नमासाद्य वक्ष्यमाणोत्तरगुणरक्षार्थमनन्तरोक्तद्युतकारादिकुसंसर्गी प्रयत्नेन वर्जनीयेति श्लोकार्थः ।२५६। अविरतसम्यग्दृष्टिश्चतुर्गतिभागपि स्यादतोऽणुव्रताद्युपदेशार्थमाह-

**पाणिवहस्स य विरई, अलिअस्स विवज्जणं अदिन्नस्स ।**
**बंभव्वयस्स धरणं, कायव्वं पव्वदियहेसु ॥२५७॥**
**परिग्गहपरिमाणं चिय, निसिभत्तविवज्जणं च कायव्वं ।**
**दिसिवयपरिमाणं तह, तहेव भोगस्स परिमाणं ॥२५८॥**

**व्याख्या-'पाणिवह०' 'परिग्गहपरिमाणं०'** व्याख्या चैतेषां व्रतानां प्रतिक्रमणसूत्रवत् ॥२५७॥ २५८॥

प्रतिदिनोपयोगित्वात्तु भोगोपभोगव्रतं सूत्रकृदेव किञ्चिद्विवृण्वन्नाह-

**कम्मओ य वज्जिज्जा, खरकम्माईणि पावजणगाणि ।**
**इंगालाईणि तहा, भोयणओ वक्खमाणाणि ॥२५९॥**
**मज्जं महुं नवनीयं, जावज्जीवं तु वज्जणिज्जाणि ।**
**सेसेसु वि परिमाणं, कायव्वं विविहदव्वेसु ॥२६०॥**



For Private and Personal Use Only

**व्याख्या**-मद्यादिस्वरूपं प्रागुक्तं, दोषास्तूच्यन्ते । तत्र मद्यदोषाः-

**वैरूप्यं व्याधिपीडा स्वजनपरिभवः कार्यकालातिपातो । विद्वेषो ज्ञाननाशः स्मृतिमतिहरणं विप्रयोगश्च सद्भिः ।**
**पारुष्यं नीचसेवा कुलबल-तुलना धर्मकामार्थहानिः, कष्टं भो षोडशैते, निरुपचयकरा मद्यपानस्य दोषाः ॥१॥**

मधुनस्तु- **मक्षिकामुखनिष्ठ्यूतं, जन्तुलक्षक्षयोद्भवम् । कथमास्वाद्यते क्षौद्रं, सुधीभिर्नरकावहम् ॥२॥**

नवनीतस्यापि- **ऊर्ध्वमन्तर्मुहूर्तात्स्यु-र्बहवो यत्र जन्तवः । विवेकिभिः कथंकारं, नवनीतं तदद्यते ॥३॥**

उपलक्षणत्वान्मांसस्य च-

**हिंसामूलममेध्यमास्पदमलं, ध्यानस्य रौद्रस्य यत् । बीभत्सं रुधिराविलं कृमिगृहं, दुर्गन्धिपूयाश्रितम् ।**
**शुक्रासृक्प्रभवं नितान्तमलिनं, सद्भिः सदा निन्दितम् । को भुङ्क्ते नरकाय राक्षससमो, मांसं सदात्मद्रुहः ॥४॥**

तदेवं मद्यादीनि यावज्जीवं तु वर्जनीयानि । तुशब्दादनन्तकायपञ्चोदुम्बर्यादीनि । शेषेष्वपि सचित्तादिविविध-द्रव्येषु **परिमाणं-** नियन्त्रणं कर्तव्यमिति ॥२५९॥ २६०॥ द्रव्याण्येव कानिचित् सूत्रत्रयेणाह-

**अच्चित्तं दन्तवणं, मेयफलाणं च तोलियाणं च ।**
**गणिमफलाणं च तहा, उच्छुलट्ठीणं पत्ताणं ॥२६१॥**
**अब्भंगे उव्वलणे खलि-प्पमाणं च होइ कायव्वं ।**
**आहरणविलेवणगंधमल्लवत्थासणाणं च २६२ ॥**



For Private and Personal Use Only

**विगईणं परिमाणं, दव्वाणं तह सचित्तइयराणं ।**
**सयणीयजाणवाहण, एवमाई विभासा उ ॥२६३॥**

**व्याख्या-'अचित्तं दंतवणं०' 'अब्भंगे उव्वलणे०' 'विगईणं परिमाणं०** । उत्तानार्था, नवरं **विभाषा-** विस्तरेण व्याख्या, सा पुनः स्वयमूह्या ॥२६१-२६२-२६३॥ उपसंहारपुरस्सरमुपदेशमाह-

**एवं उवभोगवयं, संखेवेणं तु साहियं तुम्ह ।**
**ता कुणह इत्थ माणं, जइ इच्छह सासयं ठाणं ॥२६४॥**

**व्याख्या-'एवं उवभोगवयं संखेवेणं०'** । सुगमा ॥२६४॥ इदानीमनर्थदण्डः । स च चतुर्धा । प्रमादाचरित-पापध्यानहिंस्रप्रदान-पापोपदेशभेदात् । तत्र जलक्रीडान्दोलनकुर्कटादियोधनभाजनानाच्छादनद्यूतरमणविकथाकरणा-द्यनेकविधः प्रमादः । तत्र जलक्रीडायामप्कायपूतरकादिवधः । अन्दोलने तु पवनवधः आत्मोपघातादयश्च । जन्तु-योधने तदुपघातस्त्रसादिवधश्च । भाजनानाच्छादने तु मक्षिकामूषकादिपातः स्यात् । द्यूतं च बहुदोषहेतुः । यथा-

**'कुलकलंकणु सच्चपडिवक्खु, गुरु-लज्जासोयहरु धम्मविग्घु ।**
**अत्थह पणासणु जं दाणभोगिरहिउ, पुत्तदारपियमायमोसणु ।**
**जहिं न गणिज्जइ देवगुरु, जहिं नवि कज्ज अकज्ज । तणु संतावणु कुगइ पहु, तहिं को जूइ रमिज्ज ? ॥१॥**

विकथास्तु सूत्रेणैव दर्शयन्नाह-



For Private and Personal Use Only

**इत्थिकहा भत्तकहा, देसकहा रायजणवइकहा य ।**
**नडनट्टमल्लमुट्ठिय, संगामाइ न वत्तव्वा ॥२६५॥**

**व्याख्या-'इत्थिकहा०'** यथा- स्त्रीणां जातिकुलरूपनेपथ्यलक्षणा कथा **स्त्रीकथा** । तत्र ब्राह्मणीप्रभृतीनामन्यतमायाः प्रशंसा निन्दा वा यासौ जातिकथा, यथा-

**धिग् ब्राह्मणी धवाभावे, या जीवति मृता इव । धन्या मन्ये जने शूद्री, पतिलक्षेऽप्यनिन्दिता ॥१॥'**

एवं चोग्रादिकुलोत्पन्नानामन्यतमाया यत् प्रशंसादि । सा कुलकथा ।

**'अहो चौलुक्यपुत्रीणां, साहसं जगतोऽधिकं । पत्युर्मृत्यौ विशन्त्यग्नौ, याः प्रेमरहिता अपि ॥२॥**

तथाऽऽन्ध्रीप्रभृतीनामन्यतमाया रूपस्य यत्प्रशंसादि सा रूपकथा-

**'चन्द्रवक्त्रा सरोजाक्षी, सद्गीः पीनघनस्तनी । किं लाटी नो मता सास्य, देवानामपि दुर्लभा ? ॥३॥**

तासामेवान्यतमायाः कच्छाबन्धादिनेपथ्यस्य यत्प्रशंसादि सा नेपथ्यकथा । यथा-

**'धिग् नारीरौदीच्या, बहुवसनाच्छादिताङ्गलतिकत्वात् । यद्यौवनं न यूनां, चक्षुर्मोदाय भवति सदेति ॥'**

अस्याश्चैते दोषाः-

**'आयपरस्स मोहुदीरण, उड्डाहो सुत्तअत्थपरिहाणी । बंभव्वए अगुत्ती पसंगदोसा य गमणाइ ॥१॥**



For Private and Personal Use Only

तथा भक्तमोदनादि तस्य कथा **भक्तकथा** । सा चतुर्धा आबाधादिभेदात्-
तथाचार्षम्-'**भत्तकहावि चउद्धा, आवाहकहा तहेव निव्वाहे । आरंभकहा य तहा, निट्ठाणकहा चउत्थी उ ॥१॥**
**आवाहत्ति य दव्वा, सागघयाई य इत्थ उवउत्ता । दसपंचरूव इत्तिय, वंजणभेयाइ निव्वाहे ॥२॥**
**आरंभ छागतित्तिरमहिसारण्णाइ वहियए इत्थं । रूवगसयपंचसया-निट्ठाणं जा सयसहस्सं ॥३॥**
तथा देशो राष्ट्रं, तस्य कथा **देशकथा** । सापि च्छन्दो-विधि-विकल्प-नेपथ्यभेदाच्चतुर्धा । यदार्षम्-
'**छंदो गंमागमं जह, माउलधीय गंम लाडाणं । अन्नेसिं सा भयणी, गोल्लाईणं अगम्माओ ॥१॥**
**भोयणविरमणिभूमिगाइं, जं वावि भोज्जए पढमं । वीवाह विरयणावि य, चउरंतगमाइया होइ ॥२॥**
**एमाई देसविही, देसवियप्पं तु सासनिप्फत्ती । जह वप्प कूवसारणि, नदिरिल्लगसालिरोप्पाई ॥३॥**
**घरदेउले विगप्पा तहय, निवेसा य गामनयराई । एमाइ विगप्प कहा, नेवत्थकहा इमा होइ ॥४॥**
**इत्थीणं पुरिसाण य, साहाविय होइ तहय वेउव्वी । मोलिगयालगमाई देसकहा एस भणियव्वा ॥५॥**'
इति । तथा राज्ञः कथा **राजकथा**, इयमपि नरेन्द्रनिर्गमादिभेदेन चतुर्धैव । यदागमः-
'**रायकह चउहनिग्गम, अइगमणं बले य कोसकोट्ठारे । निज्जाइ अज्जराया, एरिसइड्ढी विभूईए ॥१॥**
**उदयायलंमि सुरुव्व, हत्थिक्खंधंमि सोहए एसो । एमेवय अइयाई, इंदो अमराउरिं चेव ॥२॥**
**एवइ य आसहत्थी-रहपाइक्काण बलवइ कहेसा । एवइ कोडी कोसो, कोट्ठागारा य एवइय ॥३॥**



For Private and Personal Use Only

तथा-जनपदेषु भवा जना जानपदाः । ह्रस्वत्वं च प्राकृतत्वात् । यद्वा जनव्रजा जनसमूहास्तत्कथा, यथा-

**'रुवस्सी तेयस्सी, धणवन्तो तहय दाणवन्तो य । जह इत्थ जणो निवसइ, तहन्ने नत्थि सग्गेवि ॥१॥**

इत्यादि । तथा **नटा-** नाटयितारस्तत्कथा, यथा-

**'नाडगकत्ता एसो, उज्झाओ रुववं भरहकुसलो । सिक्खाविंतो पत्ते, नज्जइ सक्खं मकरकेऊ ॥१॥'**

तथा **नटा,** नटनर्तकास्ततत्कथा, यथा-

**'नच्चंतो भूमिगओ, उप्पयमाणो खणेण गयणयले । रंगंगणंमि रेहइ, एसो नट्टो खगिंदुव्व ॥१॥'**

तथा **मल्ला,** बाहुभ्यां योधकास्तत्कथा-

**'मल्लेण समं मल्लो, उन्नयखंधो विसालवत्थयलो । जुज्झइ दीहभुयाहिं सुंडाइ गओ गएणं व ॥१॥'**

तथा मुष्टिभिर्ये प्रहरन्ति ते **मुष्टिका,** मल्लविशेषा एव, तत्कथा, यथा-

**'घणनिचिय गायलट्ठी, वरवत्थनियंसणो कठिणमुट्ठी । पहरइ मुट्ठीइ परं, वज्जी वज्जेण सेलंव ॥१॥'**

तथा **संग्रामस्य-** रणस्य कथा, यथा-

**'सन्नद्धबद्धकवया, सुहडा चूरंति पट्टिसाईहिं । एए परबलसेन्नं, मुग्गरघाएहिं लेट्टुव्व ॥१॥'**

इत्यादि प्रशंसन्तीति । निन्दयन् विभाषणवत् ब्रूते । तथाहि-

धरणीप्रतिष्ठितनगरे शत्रुमर्दनो राजा । सार्थवाहो विभाषणः । इतश्च मालवनृपसमरसिंहजयाय राज्ञि संमुखं ॥१४०॥

 

चलिते निर्बलत्वादेष राजा बहुसैन्यत्वाद् बलवता मालवीयनृपेण पराजेष्यते इति विभाषणेनोक्ते पूर्जनो दिशोदिशं पलायितः । शत्रुमर्दननृपश्च वैरिणं जित्वा नगरं प्रत्यागतः । उद्वसं दृष्ट्वा जने नन्तुमागते मूलशुद्ध्या बिभाषणस्य जिह्वां चिच्छेद । स च मृत्वा नरकं प्रापत् । एवं सर्वासु कथासु निन्दाद्वारेणापि विकथात्वमवसेयम् । आदिशब्दात् सुतजन्मनामकरणमुण्डनलेखशालाप्रक्षेपणविवाहोत्सवादिका नगनगरप्रासादोद्यानवापीकूपप्रपासरःसरित्समुद्रकथा अपि निःप्रयोजनं न वक्तव्याः । एतत्करणे च स्वपरात्मनोरवश्यं रागद्वेषसंभवात्तद्गतसावद्यानुमोदनेन तदन्यथावादिभिः सह विरोधसंभवेन च धर्मार्थयोर्हानिप्रसक्तेरित्यादि प्रमादाचरितमिति । एतस्माच्च प्रायः खचरत्वनरेन्द्रत्ववैरिघातचिन्तादिरूपपापध्यानसंभवोऽतस्तदपि निषिद्धमेवेति गाथार्थः ॥२६५॥ हिंस्रप्रदानपापोपदेशावऽभिधित्सुराह-

**आउहअग्गिदाणं, विसदाणं संजुयाहिगरणं च ।**
**खित्ताणि कसह गोणे, दमह एमाइ उवएसं ॥२६६॥**

**व्याख्या-'आउह०'** सुगमः ॥२६६॥ अपि च

**अन्नं चिय सावज्जं, पढमं सड्ढेण नेव कायव्वं ।**
**जं दट्ठूण पयट्टइ, आरंभे सयललोओ वि ॥२६७॥**

**व्याख्या-'अन्नं चिय साव०'** अन्यदपि सावद्यमासन्नपर्वणि स्वगृहलेपनधवलनादि न कार्यम् । शेषं स्पष्टार्थम् ॥२६७॥ उक्तो यावत्कथिकः श्रावकधर्मोपदेशः । साम्प्रतं प्रतिदिनोपयोगियतनोपदेशमाह- 

For Private and Personal Use Only

**सव्वत्थवि जयणाए, पयट्टियव्वं तु दुक्खभीएहिं ।**

**गिहिवासे वि वसंता जयणाजुत्ता दिवं जंति ||२६८||**

**व्याख्या-'सव्वत्थ०' सर्वत्र-** द्रव्यक्षेत्रादिष्वपि यतनयैव प्रवर्तितव्यम्,

**परिसुद्धजलग्गहणं दारुय धन्नाइयाण तह चेव । गहियाण वि परिभोगो, विहीइ तसरक्खणट्ठाए ||१||**

इत्यादिकया, **दुःखभीतैश्च-** गर्भवासादिवेदनाभीरुभिर्यतितव्यम् । अस्या गुणमाह- **गृहवासे** बह्वारंभकारणेऽपि **वसन्तस्तिष्ठन्तो** यतनायुक्ता **दिवं-** स्वर्गे यान्ति । यदाह-

**'अविराहियसामन्नस्स, साहुणो सावगस्स वि जहन्ने । सोहम्मे उववाओ भणिओ तेल्लुक्कदंसीहिं ||१||' ||२६८||**

व्यतिरकेमाह-

**सुट्ठु वि तवं कुणंतो, जयणविहूणो न पावइ सिद्धिं ।**

**सुसढोव्व लहइ दुक्खं, किं पुण जीवो तवविहूणो ||२६९||**

**व्याख्या-'सुट्ठुवि तवं कुणंतो०'** । अक्षरार्थः सुगमः । भावार्थस्तु सुसढकथातोऽवसेयः ||२६९||

**एसो सावगधम्मो, संखेवेणं तु साहिओ तुम्ह ।**

**इण्हिं सुणेह तुब्भे, अभिग्गहा जे उ सड्ढाणं ||२७०||**



For Private and Personal Use Only

 

**व्याख्या-**'स्पष्टार्था ||२७०|| सम्प्रति श्रावकधर्मोपदेशं समर्थयन् विशेषाभिग्रहानेव सूत्रद्वयेनाह-

**चिइवंदणं तिकालं, पच्चक्खाणं अपुव्वपढणं च ।**
**गाहद्धगाहसुणणं, गुणणं नवकारमाईणं ||२७१||**
**विस्सामणं जईणं, ओसहदाणं गिलाण पडियरणं ।**
**लोयदिणे घयदाणं, दायव्वमभिग्गहजुएहिं ||२७२||**

**व्याख्या-'चिइवंदण० विस्सामणं०' चिइवंदणं**ति चैत्यवन्दनं द्रव्यभावपूजात्मकं, कार्यमिति सर्वत्र क्रियाध्याहारः । कथम् ? त्रिकालं, सूर्योदयमध्याह्नास्तसमयरूपसन्ध्यात्रय इत्यर्थः । तथा **प्रत्याख्यानं-** नमस्कारसहितादि । तथा**ऽपूर्वपठनं-** पूर्वाधीताविस्मारणेन नूतनाध्ययनम् । तथा **'गाहद्धगाहसुणणं'**ति अत्रापेर्गम्यमानत्वात् गाथार्धगाथयोरपि श्रवणं । कोऽर्थो ? यदि प्रभूतं श्रोतुं न पारयति तदैतन्मात्रस्यापि श्रवणं कार्यं विशिष्टतरफलहेतुत्वात् । तथा चोक्तम्-'सोच्चा जाणइ कल्लाणमित्यादि । तथा **गुणनं-** यथागृहीतसंख्यानां नमस्कारणामादिशब्दाच्छेषस्वाध्यायपरिग्रहः । तथा **विश्रामणं-** सम्बाधनं यतीनाम् । तथा तेषामे**वौषधदानम्** । तथा **ग्लानप्रतिजागरणं-** ग्लानिप्राप्तसाध्वादिशरीरनिराबाधवार्त्तादिप्रच्छनं । तथा लोचदिने घृतदानं दातव्य**मभिग्रहयुक्तै**र्नियमपरैरिति भावः । उपलक्षणमिदं श्रावकसत्कदर्शनादिप्रतिमाभिग्रहाणामेकैकमासवृद्धानां, तासां विशेषस्वरूपं दशाश्रुतस्कन्धादिभ्योऽवसेयमिति ||२७१|| २७२|| पूर्वगाथायां **लोयदिणे घयदाण**मित्युक्तं, तच्च किं क्वाप्यन्यत्र भणितं वा न वेति कस्यचिदा- 

For Private and Personal Use Only

रेकानिरेकार्थं भूताचार्यप्रणीतां प्रस्तुतार्थप्रख्यापिकां सविशेषार्थप्रतिपादनपरां गाथामाह-

**पहसंतगिलाणेसु, आगमगाहीसु तहय कयलोए ।**
**उत्तरपारणगंमि य, दिन्नं सुबहुप्फलं होइ ॥२७३॥**

**व्याख्या-'पहसंत०'** सुबोधार्था ॥२७३॥ साम्प्रतमभिग्रहान्निगमयन् स्वजनानामेव धर्मे स्थिरीकरणार्थं मनुष्यत्वादिसामग्रीदुर्लभत्वं प्रस्तावयन्नाह-

**संखेवेणं एए, अभिग्गहा साहिया मए तुम्ह ।**
**इण्हिं सुणेह तुब्भे, जं दुल्लहं इत्थ संसारे ॥२७४॥**

**व्याख्या-'संखेवेणं एए०'** सुबोधार्था ॥२७४॥ एतदेव सूत्राष्टकेन भावयन्नाह-

**अणोरपारम्मि भवोअहिंमि, उबुड्डनिबुड्ड कुणंतएहिं ।**
**दुक्खेण पत्तं इह माणुसत्तं, तुब्भेहिं रोरेण निहाणभूयं ॥२७५॥**

**व्याख्या-'अणोरपारंमि०' अनर्वाक्पारे-** बहुयोनिलक्षपरिभ्रमणस्वभावत्वेनाप्राप्यमाणतीर इत्यर्थः, भवश्चातुर्गतिकः संसारः, स च प्रचुरजन्मजरामरणादिपयःपूरितत्वादुदधिरिव तस्मिन्, **'उब्बुड्डनिब्बुड्ड'**त्ति किञ्चित् कर्मलघुतायां त्रसत्वाद्यवाप्त्या उन्मज्जनमिवोच्छलनमिवोन्मज्जनम्, तथाविधकर्मगुरुतायां च स्थावरत्वाद्यवाप्त्या निमज्ज-



For Private and Personal Use Only

नमिव विशिष्टचैतन्यलक्षणजीवत्वादर्शनेन ब्रुडनमिव निमज्जनम् । तत्कुर्वद्भिः **दुःखेन-** नरकतिर्यगादिभवासातानुभवलक्षणेन, यद्वा चेल्लकादिदृष्टान्तदशकघटनावदतिवैषम्येण प्राप्तम्, **इह-**आत्मप्रत्यक्षतयाऽस्मिन् जन्मनि मानुषत्वं युष्माभिः **रोरेणा**जन्मदारिद्र्योपद्रुतेन निधानमिवेति ॥२७६॥

**तत्तो देसं कुलं जाई, रूवं आरोग्गसंपया ।**

**विन्नाणं तहय संमत्तं, दुल्लहं भवचारए ॥२७६॥**

**व्याख्या-'तत्तो देसं०' ततो-** मनुष्यलाभादनन्तरं 'देसं'ति प्राकृतत्वाद् देशो मगधादिः, सार्धपञ्चविंशत्यार्यजनपदानामन्यतमोऽत्रैवोत्पन्नस्य धर्मसाधनयोग्यत्वात् । तथा **कुलं-** पैतृकमिक्ष्वाक्वादि, प्रायस्तदुत्पन्नो हि सदाचारवान् स्यात् । **जाति**र्विशुद्धो मातृपक्षस्तज्जातो हि प्रायः कृच्छ्रेऽपि न विकारमाधत्ते । देशादिसामग्रीयुक्तोऽपि यदि हीनाङ्गः स्यात् तदा न तथाविधधर्मार्ह इत्याह- **रूपमि**ति, स्पष्टपञ्चेन्द्रियता । रूपवानपि यदि ज्वरादिरोगाभिभूतो भवेत्तदा न विशिष्टं धर्ममाधातुमीश इत्याह- **आरोग्यसम्पद्-**आमयवर्जितत्वमिति । एतद्वानपि विज्ञानविरहितो न कृत्याकृत्यविवेचने विचक्षणः स्यादित्याह- **विज्ञानं-** हेयोपादेयविचारणबुद्धिः । एवंविधगुणयुक्तस्याप्यनादिमिथ्यावासनावासितान्तःकरणग्रामस्य कस्यचित् सम्यक्त्वं दुर्लभमित्याह- **सम्यक्त्वम्-**अर्हत्प्रणीततत्त्वश्रद्धानमिति । तथाचशब्दः समुच्चये । एतत्सर्वं किमित्याह-**दुर्लभं-** दुःप्राप्यं, भवः प्रभूतासातसम्पातहेतुत्वात् चारक इव- गुप्तिरिव चारकस्तत्रेति ॥२७६॥



For Private and Personal Use Only

**पुणो चारित्तसंपत्तो सुयसायरपारओ ।**
**जहोवइट्ठधम्मस्स देसओ दुहनासओ ॥२७७॥**

**व्याख्या-'पुणो चारित्त०'** मनुजत्वादिसामग्रीसद्भावेऽपि सद् गुरुविरहात् कुशास्त्रश्रवणोत्पन्नवैराग्याः प्रायः प्रभूतजन्तवः प्रचुरमज्ञानकष्टमनुष्ठाय, पापानुबन्धिपुण्यानुभावतः सांसारिकसुखलवमासाद्य, मिथ्यात्वादिभिरुपचित-कर्मसंभारा भूयस्तथैव भवार्णवनिमज्जनोन्मज्जनेऽनेकशः कुर्वन्तीत्यतो विशेषेण सद् गुरुदुर्लभताद्योतकोऽत्र पुनः शब्दः । स च कीदृगित्यत आह- **चारित्रसम्पन्न**श्चरणकरणक्रियान्वितः । **श्रुतम**ङ्गानङ्गप्रविष्टादि, तत्सूत्रतः सामायि-कादिलोकबिन्दुसारपर्यवसानं, दुःषमादिदोषादिना तु कदाचित् कियदपि भवति । अर्थस्तु-

**सव्वनईणं जा होज्ज वालुया, सव्वउदहिणं जं तोयं ।**
**तत्तो वि समहिओ खलु, अत्थो इक्कस्स सुत्तस्स ॥१॥'**

इत्यतोऽतिबहुत्वादुत्सर्गापवादादिना अतिगम्भीरत्वाच्च **सागर इव** श्रुतसागरस्तस्य **पारगः,** समयानुसारि-सूत्रार्थधारक इत्यर्थः । **यथोपदिष्टधर्मस्य देशकः-** यथा तीर्थकरगणधरादिभिरुपदिष्टो यथोपदिष्टः स चासौ धर्मश्च श्रुतचारित्रात्मकस्तस्य देशकः । अत एव दुःखनाशकः, स्वपरयोरिति शेषः, स्थविरकल्पिकस्य हि स्वपरतारकत्वेन प्रसिद्धत्वादिति ॥२७७॥



For Private and Personal Use Only

**सुद्धधम्मस्स दायारो, सूरी माया पिया भवे ।**
**दुल्लहो एसो हु जीवाणं, बुड्डंताणं भवन्नवे ॥२७८॥**

**व्याख्या-'सुद्धधम्म०' शुद्धधर्मस्य दाता-** शुद्धस्यासद्ग्रहत्याजनेन निर्दोषस्य धर्मस्य प्रागुक्तस्वरूपस्याज्ञापनाशिक्षणादिभि**र्दाता-** लम्भयिता सूरिर्गुरुः, स च सर्वसुखहेतुत्वेन मातेव **माता** पितेव **पिता** च भवेत् । इदं चास्योपमानाभिधानं लोकेऽनयोर्विनाऽन्यस्य प्रायो हितकर्तुरभावख्यापकम्, न तु गुरूपकारस्य साद्दश्यदर्शकम् । अन्यस्य भीमभवकूपकुहरोद्धरणसामर्थ्याभावात् । यदुक्तम्-

**'पिता माता भ्राता, प्रियसहचरी सूनुनिवहः, सुहृत् स्वामी माद्यत्करिरथभटाश्वः परिकरः ।**
**निमज्जन्तं जन्तुं, नरयकुहरे रक्षितुमलम्, गुरोर्धर्माधर्मप्रकटनपरात्कोऽपि न परः ॥१॥' इति**

स च किमित्याह- दुर्लभ एषः, हुशब्दो भिन्नक्रम एवकारार्थः । ततश्च हुण्डावसर्पिणीभस्मकग्रहोदयादिदोषाद् स्वल्पा एव सच्चारिणः । उक्तं च- **'कलहकरा डमरकरा, असमाहिकरा अनिव्वुइकरा य ।**
**होहिंति भरहखित्ते, बहुमुंडे अप्पसमणे य ॥१॥**

तेष्वपि सूत्रार्थनिष्णातोऽनेकगुणमणिधारणरत्नाकरो गुरुरतिशयेन दुःप्रापः ॥२७८॥

**ता एयं दुलहं लहिउं, सव्वसुक्खाण दायगं ।**
**सुइं जे उ न कुव्वंति, ते अंधाओ पाणिणो ॥२७९॥**



For Private and Personal Use Only

 

**व्याख्या-'ता एयं०' तत** इति मनुजत्वादिलाभादनन्तरं गुणयुक्तं गुरुमपेर्गम्यमानत्वाद् दुर्लभमपि लब्ध्वा, **सर्वसौख्यानां दायकामै**हिकामुष्मिकापायव्यपोहेन सकलसुखप्रापिकां श्रुतिं, प्रक्रमादागमस्य, ये आलस्यादिकुहेतूपहतचित्ता न कुर्वन्ति तेऽन्धा एव प्राणिनो हिताहितविवेचनं प्रति ज्ञानचक्षुषोऽभावाद्। उक्तं च-

**'न देवं नादेवं, न गुरुमकलङ्कं न कुगुरुम्, न धर्मं नाधर्मं न गुणपरिणद्धं न विगुणम्।**
**न कृत्यं नाकृत्यं, न हितमहितं नापि निपुणम्, विलोकन्ते लोका जिनवचनचक्षुर्विरहिताः ॥१॥ ॥२७९॥**

एनमेवार्थं सदृष्टान्तं भावयति-

**हा ते अन्नाणमोहंधा, लद्धूणं रयणायरं।**
**कायखंडं तु गिन्हन्ति, न सुणंति जे जिणागमं ॥२८०॥**

**व्याख्या-'हा ते अन्ना०' हा** इति बहुहारणान्महाखेदे। **अज्ञानं**- हिताहिताविवेचनं। **मोहः**- पुत्रकलात्रादिषु गाढः प्रतिबन्धः। ताभ्यां विवेकचक्षुष आवृतत्वादन्धा इवान्धाः अज्ञानमोहान्धास्ते च किं कुर्वन्तीत्याह-लब्ध्वा रत्नाकरमपि काचखण्डमेव ते गृह्णन्ति। ये किं ? ये न शृण्वन्ति जिनागमं, गुरुमपि लब्ध्वेति वाक्यशेषः ॥२८०॥

**दुल्लहं सुइं च लद्धूणं, सद्दहंति न जे पुणो।**
**अमयं च ते पमुत्तूणं, विसं घुट्टंति पाणिणो ॥२८१॥**



For Private and Personal Use Only

**दुल्लहं सद्धं च लद्धूणं, उज्जमन्ति न जे पुणो ।**
**धम्मे जिणपन्नत्ते, तेहिं अप्पा हु वंचिओ ॥२८२॥**

**व्याख्या-'दुल्लहं०'** दुर्लभामपि, चशब्दस्य भिन्नक्रमस्याप्यर्थत्वात् । श्रुतिमपि लब्ध्वा ये पुनर्न **श्रद्दधति-**
**'प्रचलति यदि मेरुः, शीततां याति वह्नि-रुदयति यदि भानुः पश्चिमायां दिशायाम् ।**
**विकसति यदि पद्मं, पर्वताग्रे शिलायाम्, नहि भवति हि मिथ्या केवलज्ञानदृष्टम् ॥१॥'**

इत्यादि स्वबुद्ध्या श्रद्धानं न कुर्वन्ति, ते च किमित्याह- **अमृतं चे**ति, आस्तां तावत् तिक्तकटुकाद्यशुभरसं द्रव्यममृतमपि ते प्रमुच्य विषं **घुण्टन्ति**-पिबन्ति प्राणिनः । अयमत्र भावार्थः, यथा-

**सम्मत्तंमि उ लद्धे, ठइयाइं नरयतिरियदाराइं । दिव्वाणि माणुसाणि य, मुक्खसुहाइं सहीणाइं ॥१॥**
**कल्लाणपरंपरयं, लहंति जीवा विसुद्धसम्मत्ता । सम्मदंसणरयणं नग्घइ ससुरासुरे लोए ॥२॥**

इत्यादिना परमसुखहेतुत्वादमृतमिव सम्यक्त्वं विमुच्य,

**'पावइ इहेव वसणं तुरुमणिदत्तुव्व दारुणं पुरिसो । मिच्छत्तमोहियमणो साहुपउसाउ पावाओ ॥१॥'**

इत्यादि दारुणदुक्खजनकत्वेन विषमिव मिथ्यात्वं ते आसेवन्ते इत्यर्थः ।

**'दुल्लहं स०'** दुर्लभां श्रद्धामपि लब्ध्वा ये पुन**र्नोद्यच्छन्ते-** नोद्यमं कुर्वन्ति, क्व ? **धर्मे-** देशसर्वविरतिरूपे जिनप्रज्ञप्ते तैरात्मैव वञ्चितः । इयमत्र भावना-प्रभतभाग्यसंभारलभ्यदर्लभसर्वसामग्रीसद्भावेऽपि ये क्रियाकरणालसा- ॥१४९॥

 

स्तैर्विषमविषसमविषयसुखलवलिप्सुभिरनन्तशिवसुखसुधारसास्वादपराङ्मुखतयात्मैव वञ्चितः । उक्तं च-

**'लोहाय नावं जलधौ भिनत्ति, सूत्राय वैडूर्यमणिं दृणाति ।**

**सच्चन्दनं प्लोषति भस्मनेऽसौ, यो मानुषत्वं नयतीन्द्रियार्थे ॥१॥**

इति सूत्राष्टकार्थ इति ॥२८२॥

एवं धर्मे स्वजनानां स्थिरीकरणमाधाय सम्प्रति धर्ममेवोपमानैः स्तुवन् सूत्रचतुष्टयमाह-

**जिणधम्मो हु लोगंमि, अपुव्वो कप्पपायवो ।**

**सग्गापवग्गसुक्खाणं, फलाणं दायगो इमो ॥२८३॥**

**व्याख्या-'जिणधम्मो०'** जिनधर्म एव जीवानामपूर्वः कल्पपादपः । कुत इत्याह-**'सग्गापवग्गसुक्खा०'** अत्र लक्षणशब्दाध्याहारात् स्वर्गापवर्गसौख्यलक्षणानां फलानां दायको यतोऽयमिति । यथा-

**'संकल्पनातीतमनुष्यदेव-निर्वाणसत्सौख्यफलप्रदायी । सनातनो नो परतन्त्रवृत्तिः, तद्धर्मकल्पद्रुरपूर्व एषः ॥१॥॥२८३॥**

**अहवा चिंतामणि एसो, सव्वत्थ सुखदायगो ।**

**निहाणं सव्वसुक्खाणं, धम्मो सव्वन्नुदेसिओ ॥२८४॥**

**व्याख्या-'अहवा०'** । पूर्वोपमानोपेक्षयोपमानान्तरसूचकोऽपूर्व इति पदं यथायोगमनुवर्तनीयम् । ततश्चायं धर्मः सर्वज्ञदेशितोऽपूर्वचिन्तामणिः । कस्मादिति विशेषणद्वारेण हेतुमाह- **सर्वत्र**, इहलोके परलोके च सुखदायकत्वात् यथा-



For Private and Personal Use Only

**'वन्दारुवृन्दारकवृन्दवन्द्यैः, सेव्यो मुनीन्द्रैरपि सर्वकालम् ।**
**सदैहिकामुष्मिकसौख्यदायी, तद्धर्मचिन्तामणिरेष नव्यः ॥'** इति

तथायं धर्मोऽपूर्वमक्षय्यसर्वसौख्यसन्दोहजनकत्वान्निधानमिव निधानम् । यथा-

**यज्जन्माग्रकुले यदेतदरुजं देहं भवेद्देहिनाम् । विष्वग् यच्च सुधांशुधामधवलं स्फूर्जत्यनल्पं यशः ।**
**यत्स्यात् केशवसार्वभौमकमला यन्निर्वृतिस्वःसुखं, अक्षय्यस्य सदापि धर्मसुनिधेस्तन्नूनमुज्जृंभितम् ॥१॥'**

इति ॥२८४॥

**धम्मो बंधू सुमित्तो य, धम्मो य परमो गुरू ।**
**मुक्खमग्गे पयट्टाणं, धम्मो परमसंदणो ॥२८५॥**

**व्याख्या-'धम्मो०'** अयं धर्मोऽपूर्वः सर्वदा हितविधायित्वाद्बन्धुरिव बन्धुर्यथा-

**निःकृत्रिमसर्वजनानुकूलः, सदाप्यभीष्टार्थविधानधाता ।**
**अतो जिनेन्द्रोदितधर्ममेनं नवीनबन्धुं प्रवदन्ति तज्ज्ञाः ॥१॥'**

तथायं धर्मः समस्तापत्समूहनिवारकत्वेन समस्तसम्पत्तिसम्पादकत्वादपूर्वं सुमित्रम् । यथा-

**'आपत्कलापोद्दलनेन शश्वत्सम्पत्तिसम्पादनबद्धकक्षः ।**
**प्रेत्यापि जीवेन सहानुगामी, तद्धर्म एवाभिनवं मित्रं ॥१॥'** ॥१५१॥

तथा धर्मश्च जन्मान्तरेऽपि सम्यगुपासितः सन् प्रत्येकबुद्धादीनां जातिस्मृत्यादिना तत्त्वावबोधजनकत्वात्परमः प्रकृष्टो गुरुरिव परमगुरुर्यथा-

**'धर्मः सम्यगुपासितस्तनुभृतां जन्मान्तरेऽपि स्फुटम्, बोधं बन्धुरमादधाति यदयं नूनं प्रकृष्टो गुरुः ।**
**श्रूयन्ते च पुरा कृतातिविलसद्धर्मा वृषादीक्षणा-देव द्राक् करकण्डुमुख्यमुनयः, सद्बोधिमासंश्रिताः ॥१॥'** इति

तथा मोक्षमार्गे प्रवृत्तानां, जीवानामिति शेषः, धर्मः **परमः-** प्रधानमचिरेण निर्वृतिनगरीप्रापकत्वात्स्यन्दन इव परमस्यन्दनः । यथा-

**कुत्रापि नो भंगुर एककाष्ठो, वाहौ विना याति यथेष्टभूमिं ।**
**शल्यैर्वियुक्तः खलु सर्वतोऽपि, तत् स्यन्दनो नूतन एष धर्मः ॥१॥** इति ॥२८५॥

**धम्मो पत्थयणं दिव्वं, धम्मो रयणसंचओ ।**
**सत्थाहो मुक्खमग्गस्स, धम्मो सुट्ठु निसेविओ ॥२८६॥**

**व्याख्या-'धम्मो प०'** धर्मः **पथ्यदनं-** पाथेयं **दिव्यं-** प्रधानं सदाप्यविनश्वरत्वाद्, यथा-

**'अहर्निशं भोज्यमतीव पूतं, निःशेषदोषापहमव्ययं च ।**
**अनर्घ्यमुच्चैरविनश्वरं च, धर्मस्ततः पथ्यदनं हि दिव्यम् ॥१॥'**

तथा-धर्मो **रत्नसंचयो-** रत्नकोशो राजाद्यधीनवृत्तित्वाभावाद्, दिव्य इति शेषः । यथा-



For Private and Personal Use Only

**'न राजदायादमलिम्लुचादि- स्वाधीनवृत्तिर्न च हानिगामी ।**
**अभीष्टकर्ता परलोकयायी, तद्रत्नकोशो वर एष धर्मः ॥१॥' इति ।**
तथा धर्मः सुष्ठु निषेवितः सन् मोक्षमार्गस्य सार्थवाहः, दिव्य इति गम्यम् । यथा-
**संसारकान्तारमदृश्यपारं, सुभीष्ममुत्तार्य निरस्तलोभः ।**
**सत्सिद्धिपुर्यां नयते यदेष, धर्मो हि दिव्यः खलु सार्थवाहः ॥१॥'**
इति सूत्रचतुष्टयार्थः ॥२८६॥
एवमनेकोपमानैः धर्मं स्तुत्वा तस्यैव दृष्टान्तोपदर्शनद्वारेण सर्वोत्तमत्वख्यापनाय सूत्रपञ्चकमाह-

**जिणधम्माउ य लोगंमि, सारो अन्नो न विज्जए ।**
**दिट्ठंता एवमाईया, जओ सुव्वन्ति सासणे ॥२८७॥**

**'सुव्वंते जिणसासणे'** । इति पाठान्तरम् ।
**व्याख्या-'जिणधम्माउ०'** जिनधर्मात् लोकेऽन्योऽपरः सुमहार्घ्योऽपि पदार्थसार्थः **सारः**- प्रधानं **न विद्यते**- नास्ति । कुत इत्याह-दृष्टान्ता एवमादिका यतः श्रूयन्ते **शासने**- जिनप्रवचने इति ॥२८७॥

**अयाईओ जहा लोए, सुवन्नं उत्तमं भवे ।**
**ओसहीणं तु सव्वाणं, जहा धन्नं सुओसही ॥२८८॥**



For Private and Personal Use Only

**व्याख्या-'अयाईओ० अय आदितो-** लोहप्रभृतिभ्यो धातुभ्यः स्वर्णं विषापहारित्वाद्यनेकगुणयुक्तत्वादुत्तमं भवेत् । तथा **औषधीनां च-** दृग्बन्धाग्निस्तम्भादिकर्त्रीणां सर्वासां, मध्ये इति शेषः, यथा धान्यमेव सकलपुरुषार्थसाधनसमर्थ मनुजदेहपरिपालकत्वेन स्वौषधिरिति ॥२८८॥

**धणाणं संचयाओ य, जहा रयणसंचओ ।**
**उत्तमो होइ देहीणं, तहा धम्मो जिणाहिओ ॥२८९॥**

**व्याख्या-'धणाणं०' धनानां-** गणिमधरिमादीनां संचयाच्च यथा रत्नसंचयः सुमहार्घ्यत्वादिभिरुत्तमो भवति देहिनां तथा धर्मो जिनाख्यात इति ॥२८९॥

**गोसीसं चन्दणाणं च, वणाणं नंदणं वणं ।**
**मुणीणं जिणनाहोत्ति, जहा णं होइ उत्तमो ॥२९०॥**

**व्याख्या-'गोसीसं चंदणा०' गोशीर्षं-** दिव्यचन्दनमिति सौरभ्यादिगुणेन चन्दनानां, मध्ये गम्यते । वनानां नन्दनं वनं सदा फलितत्वादिना । मुनीनां च जिननाथश्चतुस्त्रिंशदतिशयत्वादिना । **इति**रुपमानपरिसमाप्तौ । **यथे**ति दृष्टान्तसाधर्म्ये । **णमि**त्यलङ्कारे । भवति उत्तमः । अत्र च यथोत्तमशब्दयोरसकृदभिधानं शुद्धधर्मविषयेऽत्यादरख्यापकत्वाददुष्टं । आह च-**'अनुवादादरवीप्सासु भृशार्थविनियोगहेत्वसूयासु । ईषत्संभ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम्' ॥१॥** इति **॥२९०॥**



For Private and Personal Use Only

**तहा सव्वाण धम्माणं, मज्झे होइ सुउत्तमो ।**
**धम्मो जिणेहिं पन्नत्तो, अहिंसाए विभूसिओ ॥२९१॥**

**व्याख्या-'तहा सव्वाण०'** तथेति दार्ष्टान्तिकयोजनार्थः । ततो यथा स्वर्णाद्या अनन्तरोक्ताः पदार्था उत्तमत्वेन दर्शिताः, तथा सर्वेषां धर्माणां मध्ये भवति ऐहिकामुष्मिकसुखावहत्वेन धर्मो जिनैः प्रज्ञप्तः । अस्य च सर्वोत्तमत्वे हेतुद्वारेण विशेषणमाह- अहिंसया विभूषितः । इयमत्र भावना-न चैनं विनाऽन्यत्र धर्मे मूलमहिंसा सम्यग् ज्ञायते पाल्यते चेत्यतोऽयमेव सर्वोत्तम इति सूत्रपञ्चकार्थः ॥२९१॥

जिनधर्मोत्तमत्वमुपदर्श्योपदेशमाह-

**ता पमायं महासत्तुं, उज्जमेण वियारिउं ।**
**कायव्वो अप्पमत्तेहिं, धम्मे तुब्भेहिं उज्जमो ॥२९२॥**

**व्याख्या-'ता पमायं०' ता** इति ततस्तदुत्तमतावगमानन्तरं **प्रमादो-** मद्यविषयनिद्रादिविकथालक्षणः पञ्चविधः । अज्ञानसंशयादिभेदतोऽष्टविधो वाऽनन्तदुःखजनकत्वान्महाशत्रुस्तम् । उद्यमेन जीववीर्योल्लासरूपेण खड्गेनेव विदार्य कर्तव्योऽप्रमत्तैर्धर्मे युष्माभिरुद्यमो वक्ष्यमाणलक्षणः । तथा चोक्तम्-

**'केवलं रिपुरनादिमानयं, सर्वदैव सहचारितामितः ।**
**यः प्रमाद इति विश्रुतः परा-मस्य वित्त शठतामकुंठिताम् ॥१॥**



For Private and Personal Use Only

**यत्करोति विकथाः प्रथावतीर्यत् खलेषु विषयेषु तृप्यति ।**
**सुप्रमत्त इव यद्विचेष्टते यन्न वेत्ति गुणदोषयोर्भिदाम् ॥२॥**
**क्रुध्यति स्वहितदेशनेऽपि यद्, यच्च सीदति हितं विदन्नपि ।**
**लोक एष निखिलं, दुरात्मन-स्तत् प्रमादकुरिपोर्विजृम्भितम् ॥३॥**
**इत्यवेत्य परिपोष्य पौरुषं दुर्जयोऽपि रिपुरेष जीयतां ।**
**यत् सुखाय न भवन्त्युपेक्षिता व्याधयश्च रिपवश्च जातुचिदिति ॥४॥**

यथा अप्रमत्तप्रमत्तयोः स्वल्पेनापि कालेन महान् फलविपाको भवति । अत्र च प्रमादविदारणेनैवाप्रमत्तत्वस्य गतार्थत्वात् पुनरस्योपादानमुपदेशप्रस्तावान्न पुनरुक्तमिति । ॥२९२॥

धर्मे उद्यम इत्युक्तम्, स च धर्मो जिनपूजादिविषय इति तमेवोद्दिश्योपदिशन्नाह-

**जिणाणं पूयजत्ताए, साहूणं पज्जुवासणे ।**
**आवस्सयंमि सज्झाए, उज्जमेह दिणे दिणे ॥२९३॥**

**व्याख्या-'जिणाणं०' जिनानामि**ति जिनप्रतिमानां पूजा च यात्राश्च पूजायात्रास्तासु, प्राकृतत्वादेवं निर्देशः उद्यच्छत इति क्रिया सर्वत्र सम्बध्यते । तत्र **पूजा** त्रिसन्ध्यमनुदिनं अतिसुगन्धगन्धादिभिरभ्यर्चनम् । यथोक्तम्-
